कोशः

AGAMA KOŚA

[illegible]



Rashtriya Sanskrit Vidyapeetha
TIRUPATI
1993

वैखानसागमकोशः

VAIKHĀNASA ĀGAMA KOŚA

Volume I











वैखानसागमकोशः

[प्रथमसंपुटम्]

तिरुपतिराष्ट्रियसंस्कृतविद्यापीठग्रन्थमालासंख्या-५६

वैखानसागमकोशः

[प्रथमसंपुटम्]

संपादकमण्डलम्

00=081

डा.एन्.एस्. रामानुजताताचार्यः
डा. यु. शंकरभट्टः
श्री. लक्ष्मीनरसिंहभट्टः
श्री. के. ए. बालसुब्रह्मण्यम्
डा.टि.जि. अनन्तसुब्रह्मण्यम्
डा.एम्. अनन्तपद्मनाभभट्टः

राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः
१९९१

प्रथमं संस्करणम्
प्रकाशनवत्सरः १९९१
सर्वेऽधिकाराः तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन स्वायत्तीकृताः

मूल्यम् : 180=00

तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन
(मानितविश्वविद्यालयेन)
प्रकाशितः

मुद्रापकः
कलाभारती इन्स्टण्ट् प्रिण्टर्स् अण्ड् पब्लिषर्स्
११. भीमसेनगार्डन् रोड्, मैलापूर्, मद्रास्-६०० ००४.

Rashtriya Sanskrit Vidyapeetha, Tirupati Series No.56

VAIKHĀNASA ĀGAMA KOŚA

(Volume I)

Editorial Board

Dr. N.S. Ramanuja Tatacharya
Dr. U. Shankara Bhatta
Sri. Lakshminarasimha Bhatta
Sri. K.A. Balasubrahmanian
Dr. T.G. Anantasubrahmanyam
Dr. M. Anantapadmanabha Bhatta

RASHTRIYA SANSKRIT VIDYAPEETHA
TIRUPATI
1991

First Edition 1991

Copy Rights Reserved

Price Rs. : 180=00

Published by

Rashtriya Sanskrit Vidyapeetha
(Deemed to be University)
Tirupati - A.P. (INDIA)

Laser Typeset & Printed by :
KALABHARATI Instant Printers & Publishers
No.11, Bheemasena Garden Road, Mylapore, Madras - 600 004. Ph.71181.

सूचीपत्रम्
CONTENTS

प्रकाशकीयम् ... vii—viii

FOREWORD .... ix—xiii

उपोद्धातः ... xv—xxvi

१. अर्चनप्रकरणम् ... 1—17

२. वास्तुविधानप्रकरणम् ... 18—99

३. आलयनिर्माणप्रकरणम् ... 100—452

  १. भूपरीक्षा ... 100-115
  २. कर्षणम् ... 116-139
  ३. बालालयः ... 140-170
  ४. वास्तुपूजनम् ... 171-181
  ५. आद्येष्टकान्यासः ... 182-207
  ६. गर्भन्यासः ... 208-241
  ७. विमानकल्पनम् ... 242-361
  ८. प्राकारकल्पनम् ... 362-377
  ९. परिवारालयकल्पनम् ... 378-405
  १०. मण्डपकल्पनम् ... 406-433
  ११. गोपुरकल्पनम् ... 434-441
  १२. मूर्धेष्टकान्यासः ... 442-452

१३. शोधनानि ... 453-456

प्रकाशकीयम्

केन्द्रीयसंस्कृतविद्यापीठं क्रिस्तूत्तरद्वाषष्ट्यधिकनवशतोत्तरैकसहस्रतमवत्सरे (1962 A.D.) भारतकेन्द्रशासनेन भगवतो वेंकटेश्वरस्य राजधान्यां तिरुपतिक्षेत्रे संस्कृतस्योज्जीवनाय केन्द्रसंस्कृतायोगोपदेशानुरोधेन इदंप्रथमतया प्रतिष्ठापितमास्ते। तत्र चतुःषष्ट्यधिकनवशतोत्तरैक सहस्रतमे क्रिस्तुवत्सरे (1964 A.D.) अप्रकाशितानां प्रकाशनार्हणां च संस्कृतग्रन्थानां प्रकाशनाय प्रचारणाय अनुसंधानप्रकाशनविभागः समुदघाटि। तत्कार्यान्तर्गततया विषयप्रधानः समग्रः आगमकोशः कश्चिन्निर्मातव्य इति संकल्पितवतां विद्यापीठस्य संस्थापकनिदेशकानां डा.बि.आर्. शर्ममहोदयानां (Dr. Bellikoth Ramachandra Sharma) सूचनामनुरुध्य तदानींतनतिरुपतिकेन्द्रीयसंस्कृतविद्यापीठसंघस्याध्यक्षैः प्रथितयशोभिः कीर्तिशेषैः डा.वि. राघवन्महोदयैः नियुक्तायाः देशविदेशख्यातानां विमर्शकविदुषां मण्डल्याः परामर्शकविद्वन्मण्डल्याश्च उपदेशमनुरुध्य मुद्रितेभ्यः अमुद्रितेभ्यश्च उपलभ्यमानेभ्यः वैखानसपञ्चरात्रशैवागमग्रन्थेभ्यः आगमकोशोपयोगिनः विषयाः अनुसंधानप्रकाशनविभागस्य विद्वद्भिः यथापद्धति संकलिताः।

तदनु त्रयःसप्तत्यधिकनवशतोत्तरैकसहस्रतमे क्रैस्तवीये संवत्सरे विद्यापीठेन तेन वैखानसागमकोशनिदर्शनग्रन्थः (Fascicule of Vaikhānasa Āgama Kośa) प्रकाशितः विमर्शनार्थं प्रथितानां गवेषणतत्त्वविदां विदुषां सकाशं प्रेषितश्च।

तं निदर्शनग्रन्थं परिशील्य भारतीयैः विदेशीयैश्च विद्वद्भिः सूचितान् अपेक्षितान् परिष्कारानन्तर्भाव्य आगमकोशप्रथमभागस्य वैखानसागमकोशस्य प्रथमं संपुटं संपादयितुं नवदेहलीराष्ट्रियसंस्कृतसंस्थानस्य तदानींतननिदेशकैः अद्यतननवदेहलीलालबहादुरशास्त्रीराष्ट्रिय संस्कृतविद्यापीठस्य कुलपतिभिः तत्रभवद्भिः डा.मण्डनमिश्रमहोदयैः नियुक्तेन डा.एन्.एस्. रामानुजताताचार्य-डा.यु. शंकरभट्ट-श्रीलक्ष्मीनरसिंहभट्ट-श्री के.ए.बालसुब्रह्मण्यम्-डा.टि.जि. अनन्तसुब्रह्मण्यम्-श्री.एम्.ए.भट्टसंज्ञकैः विद्वद्भिरुपेतेन संपादकमण्डलेन नवभिर्मासैः यथाविधि संपादितं चिरात् विद्वद्भिः प्रतीक्ष्यमाणस्य आगमकोशस्य प्रथमभागात्मकं वैखानसागमकोशस्य प्रथमं संपुटमधुना मुद्राप्य तिरुपतिराष्ट्रियसंस्कृतविद्यापीठेन प्रकाश्यत इति मोमुद्यते नश्चेतः।

आगमग्रन्थेषु न केवलं विग्रहाराधनं प्रत्युत वास्तुकलादिसंबन्धीनि बहूनि विज्ञानानि निहितानि सन्ति । तेषां सर्वेषामपि विषयाणां संकलनात्मकोऽयं कोशः अधिकृतैः विद्वद्भिः महता प्रयासेन सज्जीकृतः सन् अनुसंधातॄणाम् आगमिकानाम् अन्येषां च विपश्चितां महते उपकाराय कल्पिष्यत इति विश्वसिमो वयम् । एतत्कोशसज्जीकरणपद्धतिमधिकृत्य उपोद्घाते सविस्तरं निर्दिष्टमास्ते । वैखानसागमकोशस्य प्रथमसंपुटस्यास्य सज्जीकरणे ये प्राधान्येन प्रायस्यन् ये च साक्षात् परंपरया च उपाकुर्वन् परामर्शादिकं चादुः तेभ्यः सर्वेभ्यः हार्दमाधमर्ण्यमत्र प्रकाशयामः । अस्य वैखानसागमकोशप्रथमसंपुटस्य सुन्दरं मुद्रणं विधाय अस्मान् उपकृतवद्भ्यः मद्रास्कलाभारती इन्स्टण्ट मुद्रणालयाधिकारिभ्यः हार्दीं कृतज्ञतां व्याहरामः ।

वैखानसागमकोशस्य प्रथमं संपुटमद्य प्रकाश्यमानं भगवतो वेंकटाचलनायकस्य कृपया लोकोपकारकं विजयतामिति सततमाशास्महे ।

राष्ट्रियसंस्कृतविद्यापीठम्
तिरुपतिः
१६-८-१९९१

डा.एन्.एस्.रामानुजताताचार्यः
कुलपतिः

FOREWORD

As I write this foreword my thoughts go back to the days, now separated by a long period of 21 years in my weary fleeting life. From this distance it all looks like a reverie of a young mind, a puerile disposition. Well, after certain age, the faded memories of the happenings in the past in one's life might look like a dream, if only one could look inward, with amusement. The vivid reflections of some of the events and the hard work we had put in with emotional attachment to the new Vidyapeetha for its growth and development, all appear at this moment on the screen of my mind. I close my eyes and sit a while सुप्तश्रोत्रे च शून्यदृक् (भा.12.6.40b).

I recollect, in particular, those golden days in the life of the Vidyapeetha, when the entire staff, from class IV to the top, all worked together shoulder to shoulder, inspired with one aim and object, that was to build an institution, which should ever remain as an active and a proud monument of Sanskrit learning and research in our country.

The Vidyapeetha came into existence in August, 1962. The Tirumala Tirupati Devasthanams, Tirupati gave accommodation - for the Vidyapeetha, the building of Sri Venkateswara Oriental Research Institute, which was just shifted to the Sri Venkateswara University, in order to make room for the new Vidyapeetha. For the Hostel the Komalamma Choultry was kept at the disposal of the Vidyapeetha. It may be gratefully remembered on this occasion that at the first Convocation of the Vidyapeetha, the Executive Officer of the Tirumala Tirupati Devasthanams, Tirupati, handed over a cheque for rupees ten lakhs and 42 acres of land for the building and campus of the Vidyapeetha as the T.T. Devasthanam's donation. The Vidyapeetha is now located at this place.

The Vidyapeetha admitted the first batch of students for Shiksha-Shastri (B.Ed.) course which was inaugurated by the then Chairman of the Kendriya Sanskrit Vidyapeetha Tirupati Society, the late Justice Patanjali Shastri, the Retired Chief Justice of the Supreme Court of India. This was the auspicious beginning and the Institute started functioning with all earnestness.

In a short time of two years, the Vidyapeetha were able to have a fairly good collection of books for the library. Within a few years with the liberal grant received from the Government of India, the Vidyapeetha library equipped with all available books and journals as made it an efficient tool for advanced study and research in all branches of Sanskrit learning. A Manuscript-Section was opened as a part of the library. Some of the manuscripts were purchased and the remaining precious manuscripts were donated to the Institute by the learned families of Tumkur, Mysore, Shivara, Namagondalu etc., as gift.

The next item, in the phased programme for the development of the Vidyapeetha, was of starting of the Research Wing. A Project of *Āgama-Kośa* was prepared and got approved by the Research and Publication Committee and then by the Kendriya Sanskrit Vidyapeetha Tirupati Society. In this programme materials for the *Āgama Kośa* were collected, perhaps classified too, and considerable progress was made from the Vaikhānasa and Pāñcarātra āgamas before I had laid down my office.

Simultaneously important Āgamasamhitas were assigned to some of the members of the staff to bring out critical editions of them, and the members were encouraged to do the original research in this almost neglected but very important field, next only to the Vedas. Some of the members, later earned doctorate on their dissertations on the Samhitas allotted to them. The Samhitas edited by the staff were sent to the press.

A project to tape recording of the Vedic recitation was undertaken. The plan was to record the recitation of all the four Vedas, with their prevailing *shākhas* as chanted in different linguistic regions. To begin with, the Sāmaveda was taken up and soon the Kauthuma and part of Rāṇāyanīya recensions were also completed.

It was decided to start a Research Journal for which articles from scholars, Indian and Foreign were collected. It was planned as a half-yearly journal and named *Vimarśa*. The articles for the first issue divided into two parts - one with articles in Sanskrit, and the other with articles in English - were sent to the Press.

The Teaching Wing was the last item in the phased programme of the Vidyapeetha. For this a well-thought out syllabus, consulting the syllabi of various Universities was prepared. Besides the intensive study of Sanskrit in the syllabus, at all level of school education, the general subjects, viz., maths, science, History etc.,- were included and English was made compulsory upto the Graduate level i.e., the Shastri Course. Meanwhile the Shastri and Acharya degrees were got recognised by the S.V. University as equivalent to their B.A., M.A., degrees respectively and by Union Public Service Commission for All India competitive examinations and appointment in the Central Government service.

Thus it was possible to implement most of the recommendations, one by one, made by the Sanskrit Commission 1956-57, for which the Vidyapeetha was established by the Government of India at Tirupati, I had a feeling of fulfilment of my life's mission.

Meanwhile some of the good scholarly publications in the newly started Kendriya Sanskrit Vidyapeetha series were brought out. The Sāmavidhāna Brāhmaṇa - which was the first in the series was released on the occasion of the Second Convocation. Later every year till I left Tirupati one or two titles, on the average, all of high standard, belonging to the area of the great heritage of India, came out in this series. Very few institutions in India had done such rapid stride of progress in its academic achievement in such a short period.

Now that the Vidyapeetha has been raised to the status of a Deemed University, I would suggest to give a serious thought to this great Āgama project and now, under this changed atmosphere, restart the work as planned before and finish it.

Here I may add a note on the relevance of the Āgama in the life of Post-Vedic-India. The Veda which extended upto the Brāhmaṇas - in some cases even upto the Āraṇyakas-was concerned with the institution of sacrifices and rituals whereas the Upanishads exclusively dwelt on the higher plane of thought, - philosophy and metaphysics. The Vedangas, which belonged to this wider area of knowledge dealt with linguistic Science, Astronomy, etc. Thus the Vedic tradition pervaded directly only to the higher strata of social structure of Indians in the Vedic India. But the Āgama, on the other hand, introduced in the Vedic India the religion of worship of God in human form, the institution of Bera-pūja, in the Āgama terminology, without breaking the great Vedic tradition which believed in the manifestation of divinity, in the various phenomena in the Cosmos, perceptible or not-and it was believed that the pervasive divine power, guided the destiny of the Universe. Anthropomorphic supernaturalism has not come into existence in the spiritual dominion of Vedic age.

The Āgama, it may be said was the *Veda* of the mass appeal, which dominated the mundane and spiritual life of an Indian in equal measure in which the Vedic pantheon of abstract notion made place to anthropomorphic Gods of certain form and nomenclature endowed with all supernatural power. This is the origin of the temple cult of the Hindu religion.

The Āgama recognises the urge of the human mind in all its level with its graded capability to understand and practice the tenets of religious life. It includes even the town planning in its purview, making provision in the plan for a place where all necessary amenities - for the people living therein could be made available with the temple complex at the central location. All this was the concern of the Shilpis, the traditional architects, who trace their origin to Tvaṣṭṛ, the divine Shilpi and Maya was the epic figure of this dominion like Vyāsa of the Vedic tradition.

The whole structural design of a Hindu temple with its premises represents an epitome of the universe as conceived by the great architect Maya of the Asura race. The idol installed in the *sanctum sanctorum,* the innermost apartment of a temple, symbolizes the universal soul dwelling therein. The ornamental designs and figures on the exterior structures of a temple and its *gopuras* are deeply symbolic. The rituals followed as also the mode of worship practised are often suggestive, impregnate with great significance. It is a form of visual education for the devotees and neophytes, the first step towards the path of gradual spiritual development, leading to liberation and ultimate merger in the *divya-jyotis,* the great divine light, or to *Nirvāna,* complete extinction in the term of the Buddhist philosophy. The act of *Nīrājana,* one of the sixteen upacāras that is performed almost in the conclusion of worship represents the *ātmajyotis* of a devotee, an *Ālvār,* a servant of God, urging to merge into His feet. The *naivedya,* again the ceremony of offerings of cooked food, fruit etc., represents the renunciation of the hard earned fruits of one's own *Karma,* action, at the feet of the Almighty God, represented by the idol in our present context. Bhagavan Sri Krishna appreciates this renunciation as the greatest tyāga, that a devotee could aim at- **सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥ (भ.गी.XVIII-2)**

This great tradition of the Āgamas, which covers the entire domain of man's life has been well preserved in all its aspects in the Peninsular India. It is still a living tradition in the South India. Therefore, the Research Committee recommended this long term major project and expected that the Vidyapeetha, would successfully accomplish this great task entrusted to it. In this connection I gratefully remember the co-operation I received throughout from the Research and Publication Wing, and the encouragement from the Kendriya Sanskrit Vidyapeetha Tirupati Society, and the Research Committee, particularly from Shri P.N. Dhir, and Dr.R.K. Sharma from the Ministry of Education and Shri Sacchidanandam, Ministry of Finance, Government of India, and valuable guidance and instruction from Dr.P.L. Vaidya and Dr.S.M.Katre, besides Dr.V. Raghavan, who was the then Chairman of the Kendriya Sanskrit Vidyapeetha Tirupati Society - was always available for consultation. He took active interest in all the activities of the Vidyapeetha.

It gives me a great pleasure, to know that the first volume of Vaikhānasa Āgama Kośa, is now being published, though delayed, I thank the Editorial Board for having fulfilled this obligation of the Vidyapeetha to the world of scholars who have long been waiting for its release. The Vidyapeetha came into existence with the blessings of Lord Venkateswara and it is now offering a small *jyotis,* a *nīrājana* in the form of this Āgama Kośa at His feet. May this *Kośa* be a harbinger, an *Aruṇodaya,* in the life of Research and Publication Wing and may the other volumes follow one by one as planned by the Research Committee.

B.R. SHARMA
Director (Retd.),
Kendriya Sanskrit Vidyapeetha,
TIRUPATI.

Secunderabad
23 - 9 - 1991.

उपोद्घातः

०.१.० प्रस्तावना

सुविदितमिदमास्तिकानां विदुषां यन्निगमः आगमश्च भारतीयां सुदृढां सनातनसंस्कृतिमभिव्यञ्जयन् मानवानामाध्यात्मिकोन्नतये प्रवर्तत इति । निगमागम-भेदेन द्विविधमिदं संस्कृतवाङ्मयं मानवसमुदायस्य सर्वाङ्गीणामभ्युन्नतिमावहतीत्येतन्निश्चितं प्रचितं च तत्त्वमास्ते ।

निगमः अमूर्तभगवदुपासनं श्रेयःप्रदमुपदिशति चेदागमः समूर्तभगवदर्चनं श्रेयःसाधनमुपपादयतीति निगमागमौ श्रेयःप्राप्त्युपायभेदावेव न पुनस्तयोः फलभेद इत्यभ्युपगच्छन्ति तत्त्वज्ञाः । श्रेयःप्राप्त्युपायत्वे निगमागमयोः समाने सत्यपि भारतीयसनातनसंस्कृतिनिधेर्निगमस्येव आगमस्य अध्ययनमध्यापनं प्रचारणं प्रसारणं च न प्रचुरतया प्रवर्तत इत्येतदतिरोहितं संख्यावताम् । तथा चोपेक्षितप्रायस्य विरलप्रचारस्य आगमसंज्ञकस्य संस्कृतवाङ्मयस्य प्रतिपाद्यपरिचयमुपकल्प्य तदध्ययनादिषु जनान् प्रेरयितुं भगवतो वेंकटेश्वरस्य कृपाकटाक्षैः भारतशासनेन तिरुपतिनगरे सर्वप्रथमतया प्रतिष्ठापितेन केन्द्रीयसंस्कृतविद्यापीठेन आगमप्रतिपाद्य-संकलनात्मा (Exhaustive Encyclopaedia of Āgamas) आगमकोशसंज्ञकः संशोधनोपकरणरूपो (Research Tool) ग्रन्थविशेषः अनुसंधानप्रकाशनविभागस्य (Research and Publication Wing) प्रमुखकर्तव्यत्वेनाभ्युपगतो महीयते । तदङ्गतया वैखानसागमकोशस्य प्रथमं संपुटमधुना वाचकानां करकमलान्युपनीयते ।

०.१.१ आगमः

गुरुशिष्यपरंपरया प्रवृत्तं समूर्तार्चन(विग्रहाराधन)महिमादिप्रतिपादनपरं ग्रन्थजातमागमशब्दो रूढ्याभिधत्ते । 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्'[१], 'अजायमानो बहुधा विजायते'[२], 'रूपं रूपं प्रतिरूपो बभूव'[३] इत्यादिना निगमेन मनसा –

---

१. ऋ. 1-22-17 २. तै.आ. 3-13-1 ३. ऋ. 6-47-18.

चिन्तनीयतयोपदिश्यमानां विष्ण्वादीनां विविधरूपतामाधृत्य विविधरूपभगवद्विग्रहाराधनं श्रेयःप्रदमभ्युपगतवद्भिः ऋषिमुनिभिरुपपादितां भगवद्विग्रहाराधनप्रक्रियां विस्तरेणोपदिशन् भगवद्विग्रहाराधनस्य यज्ञयागाद्यमूर्तभगवदर्चनापेक्षया प्राशस्त्यं पुराणवदुपपादयन् निगमार्थोपबृंहणाय प्रवर्तमानोऽयमागमः सर्वगतस्यापि भक्तानुग्रहकामस्य भक्ताभीष्टविग्रहात्मना अवतिष्ठमानस्य भगवतः स्वरूपादिज्ञानविशेषान् चिन्तनोपयोगियोगविशेषान् आलयनिर्माणादिक्रियाविशेषान् आराधनादिचर्याविशेषांश्च विषयीकुर्वन् प्रथते ।

०.१.२ आगमभेदाः

समूर्तभगवदर्चनप्रतिपादनपरः सोऽयमागमः शिवपारम्यपरः शैवागमः, विष्णुपारम्यपरो वैष्णवागमः, शक्तिपारम्यपरः शाक्तागमः, गणपतिपारम्यपरो गाणपतागमः, कुमारपारम्यपरः कौमारागमः, सूर्यपारम्यपरः सौरागमश्चेति षोढा भिद्यते । यद्यप्येतदागमषङ्कानुसारिणो देवालयाः भक्तजनाश्च पुरा भारते पर्याप्ततया अवर्तन्त तथापीदानीं गाणपतागम-कौमारागम-सौरागमसंज्ञका अन्तिमास्त्रय आगमा नाममात्रेणावशिष्यन्ते । वामाचार-दक्षिणाचारभेदभिन्नं शाक्तागममनुसृत्य यद्यप्यद्य भारते विभिन्नेषु कोणेषु शक्त्यर्चनं प्रचलति तथापि तच्छक्त्यर्चनं शैव-पाशुपत-सोम-लाकुलभेदेन चतुर्विधेन शैवागमेन उताहो वैखानस-पञ्चरात्रभेदेन द्विविधेन वैष्णवागमेन प्रतिपाद्यमानया आलयनिर्माणविग्रहप्रतिष्ठाराधनादिप्रक्रियया समानतया न प्रचलति, नापि प्रथते । शैववैष्णवागमोक्तक्रमेण आलयनिर्माणादिक्रियाकलापाः परमद्यानुस्यूततया विपुलतया च भारते प्रतिकोणं प्रवर्तन्ते इत्येतदेव न यावद्विदेशेष्वपि यथासंभवं प्रचलन्तीत्येतदप्यविप्रतिपन्नमास्ते।

०.१.३. आगमकोशः

अविपुलप्रचारस्य उपेक्षितप्रायस्य चागमसंज्ञकस्य संस्कृतवाङ्मयस्य अध्ययनाध्यापनगवेषणादिकार्येषु आगममर्मजिज्ञासून् प्रवर्तयितुमुपेक्षितं संस्कृतवाङ्मयमुज्जीवयितुं च संकल्पितवता तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठेन वैखानसागमकोश-

पञ्चरात्रागमकोश-शैवागमकोशसंज्ञकभागत्रयघटितः आगमकोशः कश्चित् क्रिस्तूत्तर-त्रयःषष्ट्यधिकनवशतोत्तरैकसहस्रतमे (1963 A.D.) वत्सरे प्रकाशनीयग्रन्थकोटिं प्रवेशितो वर्तते । तदनुगुणतया वैखानसागमे पञ्चरात्रागमे चोपलभ्यमानेभ्यः सर्वेभ्यः, शैवागमे परं कतिपयेभ्य एव-इत्येवं मुद्रितेभ्यः हस्तलिखितेभ्यश्च ग्रन्थेभ्यः आगमकोशे समावेशनीयाः भगवत्पारम्यादिबोधकाः ग्रन्थभागाः समुचितशीर्षकोप कल्पनपुरःसरं विद्यापीठस्य संशोधनप्रकाशनविभागस्य विद्वद्भिः संकलिताः संशोधिताः समायोजिताश्च समासन् । समापितविषयसंकलनेषु वैष्णवागमग्रन्थेषु सूचीकटाहन्यायेन प्रथमं वैखानसागमकोशः संपुटत्रयात्मकः आगमकोशस्य प्रथमो भागः प्रकाशनस्तरमधिरूढ इति, वैखानसागमकोशस्य तस्य अर्चन-वास्तुविधान-आलयनिर्माणसंज्ञकप्रकरणत्रयोपेतं प्रथमं संपुटमद्य मुद्राप्य प्रकाश्यत इति च संतुष्यत्येतत्संपादकमण्डलम् ।

०.२.० वैखानसागमकोशः

'अग्नौ नित्यहोमान्ते विष्णोर्नित्यार्चागृहे देवायतने वा भक्त्या भगवन्तं नारायणमर्चयेत्' इति विखनसा सूत्रे समासेनोक्तं तदव(हम)शेषविशेषेण समन्त्रकसप्रयोगं क्रियामार्गं क्रमेण विस्तरतो वक्ष्यामि'[४] इत्येतद्वाक्यानुरोधेन 'धेनुर्वहाणामदितिः सुराणां ब्रह्मा ऋभूणां विखना मुनीनाम्'[५] इत्येवं स्तूयमानेन भगवता विखनसा गृह्यसूत्रे समासेनोक्तस्य विखनःशिष्यैरत्रि-कश्यप-भृगु-मरीचिभिर्विस्तरेणोपन्यस्तस्य गृहालयभगवत्प्रतिमाप्रतिष्ठाराधनादिविधानस्य प्रतिपादको ग्रन्थसमुदायो वैखानसागमसंज्ञया व्यपदिश्यते ।

०.२.१ वैखानसागमग्रन्थाः

विखनःशिष्येण अत्रिणा पूर्वतन्त्र - आत्रेयतन्त्र-विष्णुतन्त्र-उत्तरतन्त्रसंज्ञकाश्चत्वारः, कश्यपेन सत्यकाण्ड-तर्ककाण्ड-ज्ञानकाण्डसंज्ञकास्त्रयः, भृगुणा खिल-

---

४. म.वि. 1. पृ. 3.
५. ऋ. (खिल) (Quoted)-प्रस्ता. म. वि. पृ. 2.

पुरातन्त्र-वासाधिकार-चित्राधिकार-मानाधिकार-क्रियाधिकार-अर्चाधिकार-यज्ञाधिकार-वर्णाधिकार-प्रकीर्णाधिकार-प्रतिगृह्याधिकार-निरुक्ताधिकार-खिलाधिकारसंज्ञका स्त्रयोदश, मरीचिना जयसंहिता-आनन्दसंहिता-संज्ञानसंहिता-वीरसंहिता-विजयसंहिता- विजितसंहिता - विमलसंहिता - ज्ञानसंहितासंज्ञका अष्टौ-इत्येवं चतुर्भिर्महर्षिभिरष्टाविंशतिर्ग्रन्थाः (Texts of Canonical Status) प्रोक्ताः समभवन्नित्येकत्र[६], अङ्गिरसा अनन्तसंहिता-परसंहिता-ज्ञानसंहिता-जयसंहिता-वीरसंहिता-सत्यसंहिता-ज्ञानसंहिता(?)संज्ञकाः सप्त, अत्रिणा पाद्मतन्त्र-उत्तरतन्त्र-विष्णुतन्त्र-आत्रेयतन्त्रसंज्ञकाश्चत्वारः, कश्यपेन सांतानकाण्ड-काश्यपकाण्ड-सत्यकाण्ड-तर्ककाण्ड-ज्ञानकाण्डसंज्ञकाः पञ्च, भृगुणा खिल-खिलाधिकार-पुरातन्त्र-वासाधिकार-चित्राधिकार-क्रियाधिकार-मानाधिकार-प्रतिग्रहाधिकारसंज्ञका अष्टौ-इत्येवं चतुर्भिर्महर्षिभिश्चतुर्विंशतिर्ग्रन्थाः प्रोक्ताः समासन्नित्यन्यत्र[७] च यद्यपि प्रथिततया निर्दिश्यते यद्यपि च वैखानसागमसंप्रदायविदोऽत्र प्रथमं पक्षं भृशमाद्रियन्ते तथापीदानीमत्रिप्रोक्तं समूर्तार्चनाधिकरणम्, कश्यपप्रोक्तो ज्ञानकाण्डः, भृगुप्रोक्ताः अर्चनाधिकार - क्रियाधिकार - खिलाधिकार - निरुक्ताधिकार - प्रकीर्णाधिकार-यज्ञाधिकार - वासाधिकाराः, मरीचिप्रोक्तो विमानार्चनाकल्पः - इत्येवं दशसंख्याका एवार्षग्रन्था अस्मद्दृष्टिपथमायान्तीत्यस्त्ययं खेदस्य कश्चिदवसरः ।

उपलभ्यमानानां दशानां वैखानसागमग्रन्थानां समूर्तार्चनाधिकरणमात्रेयतन्त्रमिति विमानार्चनाकल्पः[*] आनन्दसंहितेति च वयमभ्युपगच्छामः । या च काचिदानन्दसंहिता पूर्वोक्तानन्दसंहितापेक्षया भिन्नप्रतिपाद्या मुद्रापिता क्वचिदुपलभ्यते सा वैखानससंप्रदायप्राशस्त्यप्रतिपादनाय पञ्चरात्रादिसंप्रदायान्तरदूषणाय च प्रवर्तमाना स्वसंप्रदायप्रतिष्ठापनमात्रतत्परैः कैश्चित् वैखानसागमसंहितात्वेन प्रक्षिप्ता स्यादिति विमर्शकाः वैष्णवसंप्रदायविदश्चाभिप्रयन्ति ।

---

[६] म.वि. CI पृ. 521,2 [७] अ.स. Appendix-क IV. 27-33

[*] द्र. 'तेषु एतद्विमानार्चनाकल्प आनन्दसंहितायाम् अयुतग्रन्थेनोक्तः ।' म.वि. CI पृ. 522.

पूर्वोक्तेष्वष्टाविंशतिसंख्याकेषु वैखानसागमग्रन्थेषु नाममात्रावशिष्टानामष्टादशानां वाक्यानि, वाक्यवृन्दानि, विशकलिता ग्रन्थभागा वा वैखानसागमानुसारिणामर्चकानां प्रयोगग्रन्थेषु (Manuals) वैष्णवाचार्याणां संप्रदायग्रन्थेषु वा यद्यपि क्वचिदुपलभ्येरन् तथापि तेषां प्रामाण्यं परीक्षापेक्षमिति नष्टान् तानष्टादश ग्रन्थानपहाय प्रामाणिकत्वेन परिगण्यमानान् मुद्रापितानमुद्रापितांश्चोपलभ्यमानान् दशैव वैखानसागमग्रन्थानाधृत्य वैखानसागमकोशोऽयं सज्जीकृतो वर्तते ।

०.२.२ वैखानसागमग्रन्थानां बाह्यपरिचयः

वैखानसागमकोशेऽस्मिन् अङ्गीकृतानां वैखानसागमग्रन्थानामत्रिप्रोक्तं समूर्तार्चनाधिकरणं, कश्यपप्रोक्तो ज्ञानकाण्डः (काश्यपज्ञानकाण्डः), भृगुप्रोक्तौ क्रियाधिकार-खिलाधिकारौ-इत्येते चत्वारो देवनागर्यां, भृगुप्रोक्तौ प्रकीर्णाधिकार-यज्ञाधिकारौ आन्ध्र्यां, मरीचिप्रोक्तो विमानार्चनाकल्पः पुनर्देवनागर्यामान्ध्र्यां च लिप्याम्- इत्येवं सप्त मुद्राप्य प्रकाशिताश्चेत् भृगुप्रोक्ताः अर्चनाधिकार-निरुक्ताधिकार-वासाधिकारास्त्रयो हस्तलिखितपुस्तकरूपाः सन्ति । हस्तलिखितपुस्तकरूपाणां त्रयाणामर्चनाधिकार-निरुक्ताधिकारौ आन्ध्रलिप्यां, वासाधिकारः परमान्ध्रलिप्यां ग्रन्थलिप्यां च पार्थक्येन लिखितो विद्यते । एतेषां दशानां ज्ञानकाण्ड-(काश्यपज्ञानकाण्ड)विमानार्चनकल्पौ गद्यात्मानौ, अन्येऽष्टौ पद्यात्मकाः सन्ति । तत्र विमानार्चनाकल्पे पटलसंज्ञया अन्यत्र परमध्यायसंज्ञया ग्रन्थावान्तरभागः परिगण्यते ।

वैखानसागमकोशे स्वीकृतानां ग्रन्थानां संस्कृतभाषा आगमान्तरग्रन्थानां संस्कृतभाषेव पारिभाषिकपदबहुला वैयाकरणनियमानियन्त्रिता विलक्षणपदोपेता च सती सर्वसुलभा न वर्तते । पद्येषु चैतद्ग्रन्थगतेषु पदे पदे छन्दोदोषाः मध्ये मध्ये ग्रन्थपाताश्च दरीदृश्यन्ते । दोषा एते वैखानससंप्रदायशरणानां जनानां पठन-पाठन-लेखन-संरक्षणप्रक्रियादोषाद्ग्रन्थेषु समवेताः स्युरिति, ग्रन्थानां परीक्ष्यासंपादनात् तथैवानुर्तमानाः स्युरिति चात्र वक्तव्यमास्ते ।

०.३ वैखानसागमकोशसंकलनम्

आगमकोशं निर्मातुं प्रवृत्तैस्तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठस्य संशोधनप्रकाशनविभागस्य विद्वद्भिस्तदानींतनतिरुपतिकेन्द्रीयसंस्कृतविद्यापीठसंघेन (Kendriya Sanskrit Vidyapeetha Tirupati Society) नियुक्तायाः विश्वविख्यातैः संशोधनप्रकाशनमर्मज्ञैः डा.एस्.एम्.कत्रे-डा.पि.एल्.वैद्य-डा.आर्येन्द्रशर्म-डा.बि.आर्.शर्मभिः सदस्यैरुपेतायाः विमर्शनिपुणानामन्ताराष्ट्रियख्यातिभृतां विद्यापीठसंघाध्यक्षाणां डा.वि.राघवन् महोदयानामाध्यक्ष्ये प्रचलितवत्याः संशोधन-प्रकाशनसमिते(Research and Publication Committee)स्तदानींतनायाः मार्गदर्शनमनुरुध्य वैखानसागमग्रन्थान् प्रत्येकं सम्यगधीत्य तत्र प्रतिपाद्यमानान् विचारान् समुचितविविधशीर्षकानुगुणतया विश्लेष्य आराध्यदेवतानिर्णयादिभगवद्विग्रहाराधनफलपर्यन्ताः कोशोपयोगिविषयविशेषाः समुपकल्पिताः । ते च आराध्यदेवतानिर्णयमारभ्य आलयविरहिते प्रदेशे आलयनिर्माणे आलयार्चने च करणीयानां क्रियाविशेषाणां क्रमम् (Order of events) अनुरुध्य कोशेऽस्मिन् संकलिताः । अत्र संकलितानां विषयविशेषाणां शीर्षकेषु सामान्यतः नूतनशोधपद्धत्यनुरोधेन उचितानि प्रातिपदिकानि समावेशितानि । यथा-

आलयनिर्माण - यजमान - अधिकृत-[(Topic ३.१.१]
(आलयनिर्माणे यजमानः अधिकृतः - इत्यस्य स्थाने)

इत्यादौ ।

क्वचित् तु प्रतिपाद्यस्पष्टीकरणाय शीर्षकेषु पदान्येव प्रयुक्तानि । यथा-

आराध्यदेवतानिर्णयः [T. १.१]
विष्णोः पारम्यम् [T. १.२]

इत्यादौ ।

क्वचिच्च पुनः शीर्षकेषु प्रातिपदिकानि पदानि च प्रतिपाद्यस्पष्टीकरणाय समायोजितानि । यथा-

अर्चन - द्विविध - अमूर्तार्चनादिभेदेन [T. १.४.०]
(अर्चनं द्विविधम् अमूर्तार्चनादिभेदेन-इत्यस्य स्थाने)

समूर्तार्चन - द्विविध - आलयार्चादिभेदेन [T. १.५.१.०]
(समूर्तार्चनं द्विविधम् आलयार्चादिभेदेन - इत्यस्य स्थाने)

इत्यादौ ।

तथा च कोशेऽस्मिन् संकलितानां विषयाणां शीर्षकेषु प्रयुक्तेषु प्रातिपदिकेषु यथायोगं विभक्तिं संयोज्य शीर्षकस्य समग्रं स्वरूपमवगन्तुमर्हन्ति वाचका इत्येतदत्र निवेदनीयमास्ते ।

कोशेऽस्मिन् संकलितानां विषयाणां शीर्षकेषु प्रयुक्तैः प्रातिपदिकैः पदैर्वा (वामतो दक्षिणं प्रति) प्रथमं प्रधानविषयः, ततस्तद्भेदः, ततस्तदवान्तरभेदः, ततस्तमधिकृत्य ग्रन्थे प्रतिपाद्यमानो विचारः - इत्येवं यथासंभवं निर्दिष्टमास्ते । अग्रिमेषु शीर्षकेषु पूर्वतनशीर्षके प्रयुक्तस्य प्रातिपदिकस्य पदस्य पदसमुदायस्य वा पुनःप्रयोगस्य प्रसक्तौ पौनरुक्त्यपरिहाराय मुद्रापणसौकर्याय च तत्स्थाने दीर्घं संयोगचिह्नं (Long hyphen) प्रयुक्तं वर्तते । यथा -

१. समूर्तार्चन - द्विविध - आलयार्चादिभेदेन
——— आलयार्चा-
——— गृहार्चा-
——— आलयार्चा - श्रैष्ठ्य-
[T. १.५.१.०—१.५.२]

२. वास्तुविधान - ग्राह्यदेश - शान्तिकादिभेदेन
——— ——— शान्तिक-
——— ——— पौष्टिक-
[T. २.१.०—२.१.२]

इत्यादौ ।

अत्र विभिन्नेभ्यो वैखानसागमग्रन्थेभ्यः संकलितानां विषयाणां कोशात्मना संकलने वैखानसागमसंप्रदायमर्मज्ञानां विदुषां विमर्शकानामर्चकानां चाभिप्रायान्

पुरस्कृत्य प्रतिपाद्यं सुस्पष्टमुपदिशन् ग्रन्थः प्रतिनिधिग्रन्थत्वेन (Representative Text) परिगण्यते, तद्भागस्तत्संकेतादिभिः सह संपूर्णतया शीर्षकमधोऽधो निर्दिश्यते । प्रतिनिधिग्रन्थसमानाभिप्रायाः अन्ये ग्रन्थाः परम् अकारादिवर्णक्रमानुरोधेन (ग्रन्थप्रवक्तुः ग्रन्थस्य च) संकेतसहितम् अध्यायश्लोकसंख्याभ्यां (गद्यात्मानो ग्रन्थाश्चेत् अध्यायस्य पटलस्य वा संख्यया पृष्ठसंख्यया च) सह ग्रन्थभागान् विना प्रतिनिधिग्रन्थभागमनु निर्दिश्यन्ते । निर्दिष्टे विषये प्रतिनिधिग्रन्थेन ग्रन्थान्तरस्य अल्पः अभिप्रायभेदश्चेत् अभिप्रायभेदवान् सः विषयांशः [अत्र - - -- - - - -इति विशेषः ।] इत्येवं संपादकटिप्पणीरूपेण (Editor's Note) चतुरश्रावरणाभ्यन्तरे (Square Bracket) ग्रन्थसंकेतादेरधस्तादुपकल्प्यते । प्रतिनिधिग्रन्थेन ग्रन्थान्तरस्य निर्दिष्टे विषये विपुलः अभिप्रायभेदश्चेत् तत्तद्ग्रन्थभागस्तत्तद्ग्रन्थसंकेतादिभिः सह संपूर्णतया यथास्थानं निर्दिश्यते । विषयाणां कोशात्मना संकलने आकरग्रन्थेषु वैखानसागमसंप्रदायविदां प्रबलप्रमाणतया संमतस्य विमानार्चनाकल्पस्य यथायोगं प्राथम्यमुपकल्प्यत इति मनसि कुर्वन्तु वाचकवरेण्याः ।

तथा चात्र संकलितानां विषयाणां परिशीलनेन आगमप्रतिपाद्यजिज्ञासुः कश्चित् जिज्ञासिते विषये केन केन ग्रन्थेन किं किमुच्यते ? कथं नाम तत्रैकस्य ग्रन्थस्य ग्रन्थान्तरेण संवादः विवादो वेति कोशादस्माद्विभिन्नग्रन्थान्वेषणं विना अनायासेनावगन्तुं निर्णेतुं च प्रभवेदिति, कोशोऽयं वैखानसागमप्रतिपाद्यनिधिः संभवेदिति च विश्वसित्येतत्संपादकमण्डलम् ।

०.४ वैखानसागमकोशस्य प्रथमं संपुटम्

त्रिषु संपुटेषु संकलनीयत्वेन संकल्पितस्य वैखानसागमकोशस्य प्रथमं संपुटमिदमर्चन - वास्तुविधान-आलयनिर्माणसंज्ञकप्रकरणत्रययुतम् आराध्यदेवतानिर्णयतो मूर्धेष्टकास्थापनपर्यन्तैर्द्वासप्तत्यधिकपञ्चशतसंख्याकैर्विषयविशेषैः समन्वितं वैखानसागमतत्त्वजिज्ञासूनामुपकाराय प्रवर्तते ।

संपुटमेतत् विद्यापीठेन क्रिस्तूत्तरत्रयःसप्तत्यधिकनवशतोत्तरैकसहस्रतमे (1973 A.D.) वत्सरे प्रकाशितं वैखानसागमकोशनिदर्शनग्रन्थं (Fascicule of Vaikhānasa

Āgama Kosa) परिशील्य तत्रापेक्षितान् परिष्कारानुपदिष्टवतां भारतीयानामन्येषां च विदुषां विमर्शकानां सांप्रदायिकानां चोपदेशान् मनसिकृत्य क्रिस्तूत्तरषडशीत्यधिकनवशतोत्तरैकसहस्रतमे (1986 A.D.) वत्सरे नवदेहलीराष्ट्रियसंस्कृतसंस्थानस्य निदेशकैः डा.मण्डनमिश्रमहोदयैर्वैखानसागमकोशप्रथमसंपुटस्य संकलने नियुक्तेन श्रीमद्भिः डा.एन्.एस्.रामानुजताताचार्य-डा.यु.शंकरभट्ट-लक्ष्मीनरसिंहभट्ट-के.ए.बालसुब्रह्मण्यम्-डा.टि.जि. अनन्तसुब्रह्मण्यम्- एम्.ए.भट्ट संज्ञकैः सदस्यैरुपेतेन संपादकमण्डलेन यथाविधि सज्जीकृतमास्ते । विद्यापीठस्य अनुसंधानप्रकाशनविभागस्य विद्वद्भिः क्रिस्तूत्तरचतुःषष्ट्यधिकनवशतोत्तरैकसहस्रतमवत्सरतः क्रिस्तूत्तरषडशीत्यधिकनवशतोत्तरैकसहस्रतमवत्सरं यावत् (1964-1986 A.D.) संकलिताः संशोधिताः अपेक्षिताश्च वैखानसागमग्रन्थभागाः संपुटेऽस्मिन् समावेशिताः सन्तीत्येतदत्राविस्मरणीयमास्ते ।

०.५ कृतज्ञताविष्करणम्

वैखानसागमकोशस्य प्रथमं संपुटमिदं तिरुपतिकेन्द्रीयसंस्कृतविद्यापीठसंघस्य तदानींतनाध्यक्षाणां कीर्तिशेषाणां डा.वि.राघवन्महाभागानां, माडभूषि अनन्तशयनम् अय्यंगार् महोदयानां, विद्यापीठस्य तदानींतनसंशोधनप्रकाशनसमितेः सदस्यानां प्रथितयशसां डा.एस्.एम्.कत्रे-डा.पि.एल्.वैद्य - डा.आर्येन्द्रशर्म-डा.बि.आर्. शर्ममहाशयानां चोपदेशानुसारेण वैखानसागमसंप्रदायमर्मज्ञानां कीर्तिशेषाणां आर्. पार्थसारथिभट्टाचार्यमहाभागानां परामर्शानुरोधेन च विद्यापीठस्य अनुसंधानप्रकाशनविभागस्य विद्वद्भिः श्रीमद्भिः डा. एम्.डि. बालसुब्रह्मण्यम्-डा.मुरलीधर पाण्डेय-डा.आर्.महादेवन्-वि.स्वामिनाथन्-डा.पि.पि.आप्टे-डा.यु.शंकरभट्ट - डा. राघवप्रसाद चौधरी-लक्ष्मीनरसिंहभट्ट-ए.श्रीनिवास अय्यंगार्-के.शठकोपाचार्य-डा.एन्.एस्.रामानुजताताचार्य - के.ए. बालसुब्रह्मण्यम्-डा.उमारमणझा-यः नाल खजूरिया-जयप्रसादबलोधी-डा.टि.जि.अनन्तसुब्रह्मण्यम्-एम्.ए.भट्ट - के.रघुनाथन्-श्रीराममिश्र - डा.के.हैमवतीशम् - डा.के.ई.गोविन्दन् - एम्. सायिरामसुब्रह्मण्यशर्मसिहेच्.पि.सत्यनारायण-एस्.सुब्बय्यसंज्ञकैः विद्यापीठस्य निदेशकयोस्तत्रभवतोः डा.बि.आर्.शर्म-वि.एस्.वेंकटराघवाचार्यमहाभागयोः, प्राचार्याणां तत्रभवतां

वि.एस्.वेंकटराघवाचार्य-डा.मण्डनमिश्र-आर्.करुणाकरन्-डा.एम.डि.बालसुब्रह्मण्यम् महोदयानां, कार्यवाहकप्राचार्ययोस्तत्रभवतोः डा.एन्.एस्.रामानुजताताचार्य-डा.आर्.महादेवन्महाशययोश्च धूर्वहत्वे संकलितैः संशोधितैः समायोजितैश्च वैखानसागमप्रतिपाद्यांशैर्विलसतीति एतद्विलासे परंपरया साक्षाद्वा हेतुतामावहद्भ्यः उपरिनिर्दिष्टेभ्यः सर्वेभ्यः उपदेशकेभ्यः परामर्शदातृभ्यो निदेशकेभ्यः प्राचार्येभ्यः कार्यवाहकप्राचार्येभ्यो विद्वद्भ्यश्च कृतज्ञतामावहति, वैखानसागमकोशस्य प्रथमसंपुटस्यास्य समायोजने प्रकाशने चापेक्षितं कार्यजातमविरतमतिशयेनाततवद्भ्यः श्रीमद्भ्यः डा.यु.शंकरभट्टमहाभागेभ्यः लक्ष्मीनरसिंहभट्टमहोदयेभ्यश्च भृशमाधमर्ण्यं प्रकाशयति, वैखानसागमकोशस्य प्रथमसंपुटस्याधुना वाचकानां करकमलान्युपनीयमानस्य विद्वदादरपात्रतां लोकोपकारकतां चाशास्त एतत्संपादकमण्डलमित्यलमतिप्रसङ्गेन ।

इति शम् ॥

राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः, आन्ध्रप्रदेशः;
प्रजापति (शकाब्द १९१३)-वैशाख-
पूर्णिमा - इन्दुवासरः-27-5-1991

संपादकमण्डलम्

वैखानसागमकोशे परामृष्टानां ग्रन्थानां संकेताः विवरणानि च ।

संकेतः	ग्रन्थः	प्रवक्ता	संस्करणम्
स.	समूर्तार्चनाधिकरणम्	अत्रिः	तिरुमलतिरुपतिदेवस्थानेन 1943 क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितम्।
ज्ञा.	ज्ञानकाण्डः	कश्यपः	तिरुमलतिरुपतिदेवस्थानेन 1960 क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः।
अ.	अर्चनाधिकारः	भृगुः	१. आकुलमन्नाडु आर्. पार्थसारथिभट्टाचार्याणाम् आन्ध्रलिप्यां लिखितः करगजमातृकारूपः । २. तिरुवनन्तपुरकेरलविश्वविद्यालयस्य हस्तलिखितग्रन्थालयस्य देवनागर्यां लिखितः करगजमातृकारूपः ।
क्रि.	क्रियाधिकारः	’’	तिरुमलतिरुपतिदेवस्थानेन 1953 क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः।
खि.	खिलाधिकारः	’’	तिरुमलतिरुपतिदेवस्थानेन 1961 क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः।
नि.	निरुक्ताधिकारः	’’	आकुलमन्नाडु आर्. पार्थसारथिभट्टाचार्याणाम् आन्ध्रलिप्यां लिखितः करगजमातृका रूपः।
प्र.	प्रकीर्णाधिकारः	’’	मद्रास् हिन्दूरत्नाकरगोपालकृष्णमुद्रणालयाभ्याम् 1929 क्रिस्तुवर्षे आन्ध्रलिप्यां मुद्राप्य प्रकाशितः ।

य.	यज्ञाधिकारः	भृगुः	मद्रास् हिन्दूरत्नाकरमुद्रणालयेन 1931 क्रिस्तुवर्षे आन्ध्रलिप्यां मुद्राप्य प्रकाशितः ।
वा.	वासाधिकारः	,,	आकुलमन्नाडु आर्. पार्थसारथिभट्टाचार्याणाम् आन्ध्रलिप्यां ग्रन्थलिप्यां च पार्थक्येन लिखितः तालपत्रमातृकाद्वयरूपः ।
वि.	विमानार्चनाकल्पः	मरीचिः	मद्रास्वेंकटेश्वरमुद्रणालयेन 1926 क्रिस्तुवर्षे देवनागर्यां मुद्राप्य प्रकाशितः ।

श्रीः

वैखानसागमकोशः

१. अर्चनप्रकरणम्

[आराध्यदेवतानिर्णयः; विष्णोः पारम्यम् ;
अर्चनभेदाः; तत्तारतम्यम् ; अधिकारी; विष्णवर्चनविधयः ।]

१.१ आराध्यदेवतानिर्णयः

वि. १.२

श्रीमरीचिं महामुनिं स्वशिष्यार्पितकुशासने समासीनं सर्वज्ञं जितेन्द्रियं शुद्धं नानालोकनिवासिनो धर्मसंसक्ता ऋषयः समागम्य आनम्य भगवन् ! केन मार्गेण कैर्मन्त्रैः कं देवमर्चयन्तः कान् लोकान् गमिष्यन्ति? इत्यूचुः ।

मरीचिरुवाच - सुप्रसन्नं परमात्मानं नारायणं ध्यात्वा अभिवन्द्य श्रुत्यनुकूलेन मार्गेण चतुर्वेदोद्भवैर्मन्त्रैः तमर्चयन्तः श्रुतिभिः अभिहितं शाश्वतम् अतीन्द्रियं परात् परतरं देवैः अनभिलक्ष्यं तद्विष्णोः परमं पदं गच्छेयुः इति ।

स. १. १-६, १७,८
[अत्र वक्ता अत्रिरिति विशेषः ।]

ज्ञा. १. १,२
[अत्र वक्ता कश्यप इति विशेषः ।]

अ. १
[अत्र वक्ता भृगुः इति, प्रष्टारः ऋषयः स्वयमेव विष्णुमाराध्यत्वेन निर्णीय तदाराधनक्रमं पृच्छन्ति इति च विशेषः ।]

क्रि. १.२-६
[अत्र वक्ता भृगुरिति विशेषः ।]

खि. १.१-१३
[अत्र वक्ता भृगुः इति, ऋषयः स्वयमेव विष्णुमाराध्यत्वेन, वैखानसशास्त्रम् आराधनमार्गत्वेन च निर्णीय विष्ण्वर्चनक्रमं पृच्छन्ति इति च विशेषः ।]

नि. १
[अत्र अर्चनाधिकारवत् ।]

प्र. १.१-५
य. १.१-७
वा. १
[अत्र वक्ता भृगुरिति विशेषः ।]

१.२ विष्णोः पारम्यम्

वि. १. २,३

श्रुतिस्तावत् 'विष्णु(र्वै) सर्वा देवताः, पुरुष एवेदं सर्वम्' (ऋ.सं. ८-४-१७) 'स ब्रह्मा स शिवः सेन्द्रः' (तै.आ. ८.२६) 'एष ब्रह्मा एष इन्द्रः

एष प्रजापतिः एष सर्वा देवताः, अग्निर्वै देवानामवमः विष्णुः परमः तदन्तरेण सर्वा अन्या देवताः (ऐ.ब्रा. १.प. १.अ) ‘त(य?)स्मात् परं नापरमस्ति किंचित् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् । (तै.उ. ४),(परं ब्रह्म परं ज्योतिः आपो ज्योतिः ।) इति ।

स. १.६,७, ९-१२, २२-७

सर्वेषामपि देवानां परो नारायणः स्मृतः ।
नारायणः परं ब्रह्म परमात्मा परोऽव्ययः ॥

स ब्रह्मा स शिवश्चेति श्रुतिराह सनातनी ।
- - - - - - - - - - - - - - - -
- - - - - - - - - - - - - - - -

सर्ववेदमयो देवः सर्वदेवमयो विभुः ॥

सर्वयज्ञमयो विष्णुः सर्वधर्ममयो हरिः ।
सर्वेशः सर्वभूतात्मा सर्वाधारः सुरेश्वरः ॥

नित्योऽचिन्त्योऽप्रमेयश्च निर्गुणोऽतीन्द्रियः परः ।
अनादिनिधनः स्रष्टा पाता हर्ताखिलस्य च ॥

परं धाम परं ज्योतिः सर्वकारणकारणम् ।
- - - - - - - - - - - - - -
- - - - - - - - - - - - - -

परात् परतरं नित्यमर्चयन्ति नमन्ति ते ॥

ऋषयश्चाखिलैर्यज्ञैस्तं यजन्त्यर्चयन्ति च ।
ऋग्यजुःसामभिर्वेदैः स्तुवन्ति प्रणमन्ति ते ॥

उपवासं व्रतं दानं स्वाध्यायं च तपांसि च ।

सर्वाणि श्रौतकर्माणि तुष्ट्यै तस्याचरन्ति च ॥

तस्य स्मृत्या भवेत् पूर्णो यज्ञे न्यूनः प्रमादतः ।
धर्मत्वमेव यज्ञस्य विष्णुरित्याह वै श्रुतिः ॥

यमैः सनियमैर्युक्ता यं ध्यायन्ति हि योगिनः ।
यस्य स्मृतिर्मुमुक्षूणां मोक्षायैव भवेद्ध्रुवम् ॥

तस्मिन् देवेऽर्चिते देवाः सर्वे सन्त्यर्चितास्ततः ।

ज्ञा. १.२

पद्मकोशप्रतीकाशे हृदये महति विश्वस्यायतने विज्वलद्वैश्वानरशिखामध्यस्थः परमात्मा नारायणः । तमेव परं ज्योतिरक्षरं ब्रह्मेति ब्रह्मविदो विदुः । सोऽयं प्रकृतिस्थः सन् अस्वप्राद्यगोचरोऽपि भूतं भवत् भव्यं चेदं भवति । पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यमिति श्रुतिः । त्रयीमयोऽयं स्वाध्यायैः श्रौतैः कर्मभिः तोष्यते । स यज्ञेशो यज्ञेनेड्यते ।

१.३.० अर्चन - त्रिविध - मानसार्चनादिभेदेन

खि. १. १४-६

नारायणस्य भूतानामात्मनः परमात्मनः ।
लीलया जगदुत्पत्तिस्थितिसंहारकारिणः ॥

देवदेवेशितुर्विष्णोः लक्ष्मीशस्य जगत्पतेः ।
उपायस्त्रिविधः प्रोक्तः पूजायाः शृणुत द्विजाः ॥

मानसी होमपूजा च बेरपूजेति सा त्रिधा ।

१.३.१ ——— मानसार्चन-

खि. १.१६-२३

हृदये हृदयेशानं जगदीशं परात्परम् ।
ध्यात्वा तु हृदयान्तःस्थं हेमवर्णमजं विभुम् ॥

कृत्वैकाग्रं मनः सम्यक् कृतस्नानजपादिकः ।
रश्मिमालासहस्राढ्यं मण्डलं विपुलं रवेः ॥

तदन्तः शीतलाभिस्तु रश्मिभिः सोममण्डलम् ।
ततः स्फुलिङ्गकलिलज्वालाभिर्वह्निमण्डलम् ॥

तस्य मध्ये सुखासीनं तप्तहाटकसंनिभम् ।
चतुरङ्गुलमात्राङ्गं शुकपत्रनिभाम्बरम् ॥

हारकेयूरकटककटिसूत्रोपशोभितम् ।
कौस्तुभोद्भासितोरस्कं श्रीवत्साङ्कितवक्षसम् ॥

उद्दामकाञ्चीविलसन्मुक्तवीरोपशोभितम् ।
रक्तनेत्रधरं रक्तपाणिपादनखं शुभम् ॥

शङ्खचक्रधरं देवं चतुर्बाहुधरं परम् ।
तद्गतेनैव मनसा नैरन्तर्येण चिन्तयेत् ॥

ध्यात्वैवमर्चयेद्देवं सा पूजा मानसी स्मृता ।

क्रि. १.७

वा.१

देवस्य मन्दिरं प्राप्य नित्यपूजोक्तमार्गतः ।
चन्दनादीन् समानीय ऊर्ध्वपुण्ड्राणि कारयेत् ॥

केशवादि न्यसित्वा तु कारयेत्तु विचक्षणः ।
देहन्यासं ततः कृत्वा करन्यासं ततः परम् ॥

पञ्चाङ्गं वा षडङ्गं वा ह्यष्टाङ्गं वात्र कारयेत् ।
देवपार्श्वे सुखासीनः प्राङ्मुखो वाप्युदङ्मुखः ॥

अथवा चात्र तिष्ठन् वा ह्यात्मसूक्तं जपेद्बुधः ।
प्राणायामं ततः कृत्वा रेचपूरककुम्भकैः ।
हृन्मध्ये कमलं ध्यात्वा दलैः षोडशभिर्युतम् ॥

कलाक्षरसमायुक्तं कर्णिकं प्रकृतिं स्मरेत् ।
तन्मध्ये कल्पयेद्विद्वान् रविसोमाग्निमण्डलम् ॥

तन्मध्ये दीपवत् ध्यात्वा साक्षात्प्रणवरूपकम् ।
आदिबीजं सुसंन्यस्य ह्यकारं तस्य तस्थितः(?) ॥

स ब्रह्मेति श्रुतिश्चैव सर्वदेवमयं हरिम् ।
बौद्धाद्यार्हतशैवं च केशवादीनि भेदतः ॥

एतैर्भेदैः समाख्यातं तत्त्वमेकं प्रचक्षते ।
प्रतिरूपं प्रतिग्राह्यं तत्त्वमेकं कुतस्तथा ॥

किरीटहारवलयैः अङ्गुलीयादिभेदकैः ।
एतद्रूपस्य भेदेऽपि रूप्यमेकं प्रकीर्तितम् ॥

तस्मात्तत्पञ्चधैकं तु न ग्रामे द्विजसत्तमाः ।
☆अन्तर्यागमिदं प्रोक्तं - - - - - - - - -॥

वि. १.४

[अत्र रवि-सोम-वह्निमण्डलकल्पना नास्तीति विशेषः ।]

☆ मानसार्चनमेव अन्तर्यागपदेन व्यपदिश्यते ।

१.३.२ —— होमार्चन-

क्रि. १. ९-१२

ध्यात्वाग्निमण्डलं तस्य ध्यायेन्मध्ये प्रभां शुभाम् ।
प्रभामध्यगतं ध्यायेत् आसीनं वा जनार्दनम् ॥

तप्तहाटकसंकाशं चतुःशृङ्गं द्विशीर्षकम् ।
सप्तहस्तं त्रिचरणं दुष्प्रेक्ष्यं सप्तजिह्वकम् ॥

स्रुक्स्रुवौ चाक्षमालां च शक्तिं दक्षिणपाणिषु ।
चामरं व्यजनं चैव घृतपात्रं च वामतः ॥

ध्यात्वा यथोक्तहविषा यजेत् तत् होमपूजनम् ।

खि. १.२४,५

[अत्र अग्निमण्डलध्यानं तन्मध्ये जनार्दनस्य ध्यानं च नास्तीति विशेषः ।]

१.३.३ —— बेरार्चन-

खि. १.२५,६

कृत्वा यत् प्रतिमां विष्णोः यथालक्षणमादरात् ।
संस्थाप्य तां तु विधिना देवागारेऽथ वेश्मनि ।
नित्यमाराधनं भक्त्या सा पूजा बेरपूजनम् ॥

क्रि. १.८
वा. १
[अत्र बेरहृदये आदिबीजादिन्यासो विधीयते,
बेरपूजा बहिर्याग इति व्यवह्रियत इति च विशेषः ।]

१.३.४ —— —— श्रैष्ठ्य -

क्रि. १. १२-४
यथोपयोगशक्यत्वात् कर्तुं पुष्पादिपूजनम् ॥

चक्षुषः प्रीतिकरणात् मनसो हृदयस्य च ।
प्रीत्या संजायते भक्तिः भक्तस्य सुलभो हरिः ॥

तस्मात् *त्रयाणामेतेषां बेरपूजा विशिष्यते ।

१.४.० —— द्विविध - अमूर्तार्चनादिभेदेन

स. १.२८;२७.१

अमूर्तेति समूर्तेति द्विविधा सार्चना मता ॥

- - - - - - - - - - - - - - - - - ॥

देवार्चनं द्विधा प्रोक्तममूर्तं च समूर्तकम् ।

ज्ञा. १.३
अ. ९
य. १.१०

---

*मानसहोमबेरार्चनानाम् ।

वि. १.५

१.४.१ —— अमूर्तार्चन-

य. १.१०
अग्नौ हुतममूर्तं स्यात् - - - - - - - - - - - - ॥
स. १.२९; २७.२
ज्ञा. १.३
अ. ९
वा. १

[अत्र अग्नाविव सवितरि, हृदये, स्थण्डिले, सलिले च भगवदर्चनम् अमूर्तमिति परिगण्यते इति विशेषः ।]

वि. १.५

१.४.२ —— समूर्तार्चन-

य. १.१०

- - - - - - - - - - - - -समूर्तं बेरपूजनम् ॥

सं. १.२९
ज्ञा. १.३
अ. ९
[अत्र बेरपूजनमित्यस्य स्थाने आलयार्चनमिति निर्दिश्यते इति विशेषः ।]

वा. ७

[अत्र बेरपूजनमित्यस्य स्थाने आलये बिम्बे अर्चनम् इति निर्दिश्यते इति विशेषः ।]

वि. १.५

१.५.१.० समूर्तार्चन - द्विविध - आलयार्चादिभेदेन

स. १.३५

आलयार्चा गृहार्चेति समूर्तार्चा द्विधा मता ।

क्रि. १.१४

खि. २.३

१.५.१.१ —— आलयार्चा-

स. १.३६,७

देवस्यैव निवासत्वात् परिवारैः समायुता ।
बल्युत्सवादिभिः सर्वैरुपचारैश्च संयुता ॥
आलयार्चा सुपूर्णेयमुत्तमेति प्रकीर्तिता ।

वा. १

[अत्र मृदादिभिः देवस्य रूपं परिकल्प्य प्रतिष्ठाप्य वास्त्वङ्गालये पूजनं परार्थयजनमिति परिगण्यते इति विशेषः ।]

१.५.१.२ —— गृहार्चा-

स. १.३५

बल्युत्सवादिभिर्हीना न्यूना तस्माद्गृहार्चना* ।

वा. १

[अत्र स्वगृहे नित्यं सकृत् द्विर्वा देवं स्थापयित्वा अर्चनम् आत्मार्थयजनम् (गृहार्चा) इति परिगण्यते इति विशेषः ।]

१.५.२ —— आलयार्चा - श्रैष्ठ्य-

ज्ञा. १.२

आलये विधिना विष्णोः नित्यार्चनमनाहिताग्नीनाम् अग्निहोत्रसमं यस्मादेतच्चाग्निहोत्रफलं ददाति । आहिताग्नीनामपि एतत् सर्वप्रायश्चित्तहेतुकं सर्वकामावाप्त्यर्थं च द्वितीयं भवति । यतः यजमानमरणेऽपि आलयार्चनं भूम्याम् अन्यैरविच्छिन्नं प्रवर्त्यते ततः शाश्वतं तिष्ठेत् । एतन्नित्यं परमं पुण्यं भक्त्या यत्नतः कुर्यात् । ग्रामादिषु च एतद्वास्तुनिवासिनां सर्वेषां सामान्यमग्निहोत्रं सर्वसंपत्करम् इति ब्रह्मा च आशंसत् । तद्विष्णोरेव उत्पत्तित्राणलयानवाप्नुवन्तः देवाश्च तमेवार्चयन्ति । तस्मिन् देवेशेऽर्चिते देवाः सर्वेऽप्यर्चिताः भवन्ति ।

स. २७.४-८

[अत्र 'अग्न्याधानं प्रतिष्ठा स्यादिष्टिः पर्वार्चनाधिका ।
यागश्चावभृथान्तः स्यात् उत्सवस्तद्विधानतः ॥- इत्यधिकं वर्तते इति विशेषः ।]

---

*गृहार्चनापदं गृहार्चापर्यायवाचकम् ।

अ. ९
क्रि. १.१५,६
खि. १.२७-३२
य. १.७-९,११
वा. १

वि. १. ३-५
[अत्र आलयार्चनं विमानार्चनमिंति व्यपदिश्यते इति विशेषः ।]

१.५.३. —— गृहार्चा - परार्थयजननिषेध-

वा. १

श्रौतवत् दीक्षितो विद्वान् काश्यपीयोक्तवत् क्रमात् ॥
आत्मार्थयजने तत्र परार्थं तत्र नाचरेत् ।
आत्मार्थयजनं कुर्यात्- - - - - - - - - - -॥

१.५.४.० —— द्विविध - शुद्धादिभेदेन

वा. १

तेनैव ऋषिणा प्रोक्तं सूत्रे तद्द्विविधं स्मृतम् ।
तयोर्भेदं पृथग्वक्ष्ये शुद्धं मिश्रं तथोच्यते ॥

१.५.४.१ —— शुद्ध-

वा. १

चत्वारिंशत्तु संस्कारैः निषेकादिक्रियान्वितः ॥

स्वगृहे देवमानीय पूजयेत् विष्णुमव्ययम् ।
अतन्द्रितमना भूत्वा नित्यहोमपरायणः ॥

परार्थं नैव कुर्वीत एतच्छुद्धमिति स्मृतम् ।
आत्मार्थयजनं कुर्यात् - - - - - - - - - -॥

१.५.४.२ —— मिश्र-

वा. १

- - - - -- - - -परार्थे त्वर्चयेत् बुधः ॥

सर्वशान्तिकरं चैव सर्वपुष्ट्यर्थमेव च ।
सर्वाशुभविनाशार्थं चतुर्वर्गस्य साधकम् ॥

अर्चनं पूजनं चैव शान्तिकं पौष्टिकं च तत् ।
बल्युत्सवादिना युक्तं परिवारैः समायुतम् ॥

मणिकादिद्वारदेवान् सप्तत्येकोत्तरं पृथक् ।
वाहनायुधवर्णे तु परिषद्कं समर्चयेत् ॥

एतैश्च सर्वं संपूर्णं षद्कालं चैव पूजयेत् ।
अग्निहोत्रादिहोमे च किंचित् न्यूनाधिकं यदि ॥

तस्य दोषस्य संपूर्णं विष्ण्वर्चनमिदं पुरा ।

वैखानसेन सूत्रेण निषेकादिक्रियान्वितः ॥

गृहस्थो ब्रह्मचारी वा भक्त्यैवार्चनमारभेत् ।
शास्त्रं च कृत्स्नं चाधीत्य नित्यं विधिवदर्चयेत् ॥

एवं क्रमेण संप्रोक्तं मिश्रमेतदिति स्मृतम् ।

१.५.५.० —— द्विविध - शान्तिकादिभेदेन

ज्ञा. १.३

एतदैहिकामुष्मिकभुक्तिमुक्तिफलप्रदं सर्वकालिकं शान्तिकपौष्टिकभेदेन द्विविधं भवति ।

वा.१

१.५.५.१ —— शान्तिक-

ज्ञा. १.३
सर्वशान्त्यर्थं शान्तिकम्

१.५.५.२ —— पौष्टिक-

ज्ञा. १.३
सर्वपुष्ट्यर्थं पौष्टिकम्

१.५.६. —— चतुर्विध - शान्तिकादिभेदेन

खि. १.४

शान्तिकं पौष्टिकं चापि निष्कृतिश्चाभिचारिकम् ।
एवं चतुर्धा संप्रोक्तं पुरा तु हरिपूजनम् ॥

पूजनोपायमन्त्रैस्तु मार्गभेदश्चतुर्विधः [†] ।

१.६.० —— द्विविध - ध्रुवकौतुकसंयुक्तार्चनादिभेदेन

ज्ञा. ५४.९५

ध्रुवकौतुकसंयुक्तं ध्रुवार्चनमित्यर्चना द्विविधा भवति ।

१.६.१ —— ध्रुवकौतुकसंयुक्तार्चन-

अ. ९

सहैव कौतुकाद्यैश्च स्थापितव्यं ध्रुवं तथा ॥

शिलाया वर्णरहितं ब्राह्मे दैविकमानुषे ।
तेषां च मध्यमे वाथ स्थापितव्यं च कौतुकम् ॥

ध्रुवार्चन[*]मिदं प्रोक्तं सर्वाशुभविनाशनम् ।

[†] अत्र शान्तिकाद्याः चतस्रः संज्ञा एव दृश्यन्ते, न विवरणानि ।

[*] ध्रुवार्चनशब्देन ध्रुवकौतुकसंयुक्तार्चनमेव अभिधीयते ।

१.६.२ —— ध्रुवार्चन-

ज्ञा. ५४.९५

ध्रुवबेरविधानेन शिलयैवं कृत्वा ब्राह्मे कौतुकबिम्बस्थाने अर्चनार्थं वर्णविहीनं प्रतिष्ठाप्यार्चनं ध्रुवार्चनम् । एतत् स्थानकासनयोरेव विहितम् । नैव शयने कर्तव्यम् ।

१.७ —— —— परिवारवियोग - निर्दोष-

य. १६.३१
परिवारवियोगे तु दोषो नास्ति ध्रुवार्चने ।

१.८ —— ध्रुवकौतुकसंयुक्त - अधिकारिन्-

ज्ञा. ५४.९५
ऐहिकामुष्मिकापेक्षी ध्रुवकौतुकसंयुक्तम्†

१.९ —— ध्रुवार्चन- ——

ज्ञा. ५४.९५

केवलमामुष्मिकापेक्षी ध्रुवार्चनं कुर्यात् ।

---

†अर्चनं कुर्यादित्यध्याह्रियते ।

१.१० आलयार्चन - भृग्वादिविधिचतुष्टयानुरोधेन

स. १.३७-४१

देवदेवस्य विष्णोस्तु उत्तमार्चाक्रमस्य वै ॥

चतुर्भिः मुनिभिः प्रोक्ताश्चत्वारो विधयः शुभाः ।
चतुर्वेदोद्भवैर्मन्त्रैः चतुर्वेदसमाश्रिताः ॥

चातुर्वर्ण्यसमृद्ध्यर्थं चातुराश्रमसिद्धिदाः ।
धर्मार्थकाममोक्षाख्यचतुर्वर्गस्य साधनम् ॥

भृगुणा काश्यपेनापि मया* चैव मरीचिना ।
ज्ञेयास्ते भगवद्भक्तैः द्विजैः पूजोत्सवादिकाः ॥
तदुक्तेनैव मार्गेण हरेरर्चां समाचरेत् ।

वा. १

१.११. ——— अग्निकार्य - वैखानससूत्रानुरोधेन

य. १. १२,३
सूत्रे विखनसा प्रोक्तमग्न्याधानादिकं तथा ।
अग्न्याधारप्रभृत्यन्तं स्विष्टाकारं च सर्वतः ॥
तथाचरेद्यथामार्गं प्रतिमाराधनेऽपि च ।

स. १. ३३,४; २७.२,३
ज्ञा. १. २,३
वि. १.३

---

*अत्रिणा

२. वास्तुविधानप्रकरणम्

[वास्तुविधाने शान्तिकादिदेशाः, ग्रामादिविन्यासविशेषाः, तत्र विप्राद्यावासस्थानानि, ग्रामादौ वीथ्यादिकल्पनम् , गृहनिर्माणक्रमः, ब्राह्मणादिगृहेषु शालादिस्थाननिर्देशः, गृहेषु देवागारकल्पनम्, देवागारे ब्राह्मणादीनां आराधनीयाः देवताः, ग्रामादिषु गर्भन्यासक्रमः, प्ररोपणीयाः वृक्षाः, आलयकल्पनम्, आलयनिर्माणयोग्या भूमिः ।]

२.१.० वास्तुविधान - ग्राह्यदेश - शान्तिकादि-

ज्ञा. ११.१७

शान्तिकं पौष्टिकं वा देशमाश्रित्य वृद्धिदेशं गृह्णीयात् ।

२.१.१ —— —— शान्तिक-

ज्ञा. ४.६

भूमौ रम्यं सुभिक्षं साम्राज्यं धर्मपुण्यजयान्वितं साध्वाचारनृभूयिष्ठं वैष्णवैः संकीर्णं वेदध्वनियुतं कृष्णमृगकपोतशुकशारिकामयूरहंसचक्रवाकैः मुख्यपक्षिभिः मुनिवरैरप्याकीर्णं कुशदर्भपलाशापामार्गतुलसीयुतं पुण्यनदीपर्वतयुतं क्षेत्रं प्रागानतं सुगन्धं शङ्खगोक्षीरकुमुदाभमशर्करपाषणं सुदर्शनमक्षारमकर्दमं स्रोतसा परिवृतं दूर्वापामार्गधातकीचिरमालिकासोमवकुलकदलीकपित्थाश्वकर्णीविष्णुक्रान्ताशोकतिमि-

शचन्दनागरुकोष्ठूशीरैलालवङ्गकर्णिकारनीपार्जुनासनबिल्वमातुलुङ्गाश्वगुणावरसोमरा(?) वल्लीप्रकुड्यपताकाद्यैः पुंवृक्षैः परिवृतं शान्तिकं क्षेत्रमिति ।

२.१.२ —— —— पौष्टिक-

ज्ञा. १०.१५,६

किञ्चिद्रक्तयुतं पाण्डुरं कुशदर्भापामार्गपलाशदूर्वातुलस्याद्यैर्यज्ञवृक्षैः तापसैराकीर्णं कदल्याम्रपनसपुन्नागार्जुनचम्पकाशोकवकुलसरलसिन्दुवारपाटलेन्दीवरहरिपत्रपरालाशनकपुष्प(?)तमालकैरन्यैः पुंवृक्षैश्च परिवृतं समशीतोष्णं प्रागुत्तरानतमपाषाणशर्कराकीर्णं वालुकायुतं सुगन्धमेतत् पौष्टिकं क्षेत्रम् ।

२.२ —— देशपरीक्षा - आवश्यकता

ज्ञा. ११.१७

वास्तुसम्पत् सर्वसम्पन्मूलम् । अविरुद्धे वास्तुन्युषिते ऐहिकामुष्मिकाणां सिद्धिर्भवति । अतः सम्यक् परीक्ष्यैव सर्वकर्माणि कारयेत् ।

२.३ —— —— परीक्षणीयांश-

ज्ञा. ११.१८

तत्र रूढतरुजन्तुगन्धवर्णरसैः परीक्ष्याहरेत् ।

२.४.० —— देश - नवविध - वैष्णवादिभेदेन

ज्ञा. ११.१८

तत्र वैष्णवं ब्राह्मं रौद्रमैन्द्रं गारुडं भौतिकमासुरं राक्षसं पैशाचमिति नवविधो देशः ।

२.४.१ —— —— वैष्णव-

ज्ञा. ११.१८

तत्राशोकार्जुनकर्णिकाराश्वत्थधातकीप्रभृतिभिः पुंवृक्षैः स्थलारविन्दंदधित्थविष्णुक्रान्ताखुकर्णीतुलसीदूर्वाद्यैः द्विजर्षिनृपाद्याधारकं हरिवारणशार्दूलवृषभहंसशुकशारिकाकपोताद्यैः स्वभावाह्लादिभिः आकृतिवर्णभद्रकैराकीर्णं सोदकं पद्मचन्दनगन्धाढ्यं स्निग्धं श्वेतसंमिश्रं सरक्तं रसनामोदनं मधुररसं वृद्धिसत्त्वबलप्रदं गम्भीरशब्दं सुश्लक्ष्णं समोष्णशीतं वैष्णवमिति ।

२.४.२ —— —— ब्राह्म-

ज्ञा. ११.१८

बिल्वपलाशादियाज्ञिकैर्वृक्षैः कुशदर्भदेवनन्दासुरघ्नीगुल्मप्रभृतिभिर्युक्तं प्राज्ञद्विजहरिणहंसशकुनिभिराकीर्णं हूयमानाज्यचरुपुरोडाशगन्धितं श्वेतवर्णमीषत्कषायमधुररसं सौम्यं सात्त्वगुणोपेतं ब्रह्मवर्चसकरं सर्वकल्याणसम्पत्प्रदं यत्तद्ब्राह्ममिति ।

२.४.३ ——— ——— रौद्र-

ज्ञा. ११.१८

कण्टकीतिन्दुकतिन्त्रिणीकरञ्जवेणुजपार्ककार्पासकालरक्तकरन्दालाङ्कुलाभिगन्धमाद्यैः रूक्षवृक्षैः शूद्रपाषण्डिचण्डैः हिंस्रसमुपचण्डिपक्षिभिरसुखासीनैः तलमाघ्राय त्रासयुक्तपशुभिराकीर्णं स्तोकरक्तासितवर्णं कपोतसदृशरूक्षं लालारसामोदाम्लरसं क्रूरकर्मपदं सुखप्रीतिविवर्जितं शौर्यवीर्यप्रदं श्रुतिधर्मविरुद्धं यत्तद्रौद्रमिति ।

२.४.४ ——— ——— ऐन्द्र-

ज्ञा. ११.१८,९

पनसाम्लकदल्यर्जुनपुन्नागवकुलपाटलसिन्दुवारेन्दीवरसेरिन्दारिन्दीपाकान्दिका- - - - मालाजालिकापुष्पमालाप्रभृतिभिः वैश्यशूद्राढ्यतमनायकालङ्कृतं क्रीडामृगपक्षिरिरंसुप्राणिभिर्बहुवर्णयुतैराकीर्णं पाटल्यगुरुगन्धाढ्यं हरितवर्णं पिप्पलीरसं धनधान्यविवृद्धिदं पशुकृषिबलाह्लाददं राजसगुणप्रदं यत्तदैन्द्रम् ।

२.४.५ ——— ——— गारुड-

ज्ञा. ११.१९

ङ्कोलदमलकरधामाकादित्यसाम्यसर्पघ्नैरण्डजर्जरहंससिंहपुष्पाद्यैः मार्जारनकुलचकोरगोधाशशवृकादिभिराकीर्णं मल्लिकामालतीनिम्बधूमगन्धाश्रयं हरितवर्णनिभं मदाह्लादपण्यसंयुक्तं कषायरसं शौर्यवीर्यकरं प्रजासंपद्वृद्धिदं यत्तद्गारुडमिति ।

२.४.६ ——— ——— भौतिक-

ज्ञा. १२.१९

अग्निमन्थकेतकनिर्गुण्डीकरवीरकिंशुकहिन्तालमाधवीभूतमोदिनीनन्दादूर्वाराजवल्लिकाद्यैर्मिश्रं गुलोपेतैः(?) प्राणिभिः स्थूलैः मण्डूकाद्यैश्चाध्युषितं चूर्णकभस्मगन्धितं संमिश्रवर्णं तिलरसं प्रजानामन्नदं पुष्टिवर्धनं निद्रातन्द्राविवृद्धिदं यत्तद्भौतिकमिति।

२.४.७ ——— ——— आसुर-

ज्ञा. १२.१९

भल्लातातपनोत्कटपत्रकण्टकसन्दालावरूह(?)यज्ञघ्नपलाण्डुप्रभृतिभिः पाषण्डकुहकधूर्तकिरातक(कु ?)कुटचक्रगृध्रोरगवृश्चिकशलल्यादिभिराकीर्णं हरीतकगन्धं सितासितातिरक्ताभं श्लेष्मातकरसं विद्यायागविनाशनं युद्धदर्पप्रदं यत्तदासुरमिति ।

२.४.८ ——— ——— राक्षस-

ज्ञा. १२.२०

कपित्थदण्डकण्डतिग्माग्निदाहरक्तपुष्पोद्भवार्द्रपूगप्रदविषाद्यैः चोरचण्डालाशुभमृगपक्षिभिः चिश्चुलिरोगैराक्रान्तं मरीचिगुलगन्धाढ्यमतिरूक्षमतिरक्तं प्रजानां क्षयकारणं सुरामांसादिवृद्धिदं यत्तद्राक्षसमिति ।

२.४.९ ——— ——— पैशाच-

ज्ञा. १२.२०

श्लेष्मातकविभीतकशाल्मलीसुरुण्डवञ्जुलपापकर्णकवचनापचनीककर्कारिकावासनीलसो-

माघ्नीप्रभृतिभिः श्वखरोष्ट्रसूकरशृगालचण्डालपुलिन्दशाकुनिकैर्जुष्टं पूतिदुर्गन्धिमञ्जिष्ठागन्धितमूषररसान्वितं रूक्षं मृद्गात्रनिभमुद्गारकरं सरोगं क्षोभकरं तमिस्रं तामसदं सर्वक्षयकरं यत्तत् पैशाचमिति ।

२.५ —— —— सुरादिवासयोग्य-

ज्ञा. १२.२०

तस्मात्सुरर्षिमनुष्याणाम् आद्यषट्के[†] वासं समाचरेत् ।

२.६. —— —— चतुर्वर्णवासयोग्य-

ज्ञा. १२.२०

तेष्वाद्यौ[*] ब्राह्मणानां, ततो द्वौ क्षत्रियाणां, विट्शूद्रयोः पुनरेकैक इति जानीयात् । तत्र च तद्वर्णवृद्धिदां भूमिं ज्ञात्वैव वसेत् ।

२.७. —— भूमि - चतुर्वर्णवृद्धिदा - रसाद्यनुरोधेन

ज्ञा. १२.२०

मधुराम्लकषायलवणरसा प्रागुत्तरापरयाम्यानता मेघगजशार्दूलदुन्दुभिनिःस्वना शुक्लरक्तहरितासितवर्णा क्रमशो भवतीति विज्ञायते ।

[†] वैष्णवब्राह्मरौद्रेन्द्रगारुडभौतिका इत्याद्यषट्कम् ।

[*] वैष्णवादिषु षट्सु ।

२.८. ——— ——— **श्रेष्ठा-**

ज्ञा. १२.२०

सर्वाशागा आयता श्रेष्ठा ।

२.९ ——— ——— **मध्यमा-**

ज्ञा. १२.२०

प्रागुत्तरानता मध्यमा ।

२.१० ——— ——— **जघन्या-**

ज्ञा. १२.२०

अन्यानता* जघन्या ।

२.११ ——— ——— **अग्राह्या-**

ज्ञा. १२.२०

अन्यानता* जघन्या अग्राह्या ।

२.१२ ——— ——— **उत्तमा-**

ज्ञा. १२.२०

ज्यां खनित्वा तन्मृदं संगृह्य पूरिता अधिका चेदुत्तमा ।

---

* प्रागुत्तरातिरिक्तदिगानता ।

२.१३ —— —— मध्यमा-

ज्ञा. १२.२०

[*]समा चेन्मध्यमा ।

२.१४ —— —— कनीयसी-

ज्ञा. १२.२०

[*]न्यूनपांशुः कनीयसी ।

२.१५ —— भूपरीक्षा - काल-

ज्ञा. १३.२१

अथ चैवं देशमभिज्ञाय शुभमासपक्षमुहूर्तेषु भूपरिक्षामारभेत । सुभिक्षे सुराजनि धर्मिष्ठे अब्दे माघप्रोष्ठपदाषाढान् हित्वा अन्येषु शुक्लपक्षे असितेऽन्त्यत्रिभागे भागं हित्वा रेवतीरोहिणीपुष्यस्वातीश्रवणश्रविष्ठाशतभिषक्चित्रादित्याश्विनीसौम्यानामन्यतमे ऋ[क्षे] सुरासुरमन्त्रीन्द्वर्कशशिजवारेषु नन्दादिषु रिक्तां विवर्ज्य अन्यासु तिथिषु अष्टमीं षष्ठीं विष्टियुतां हित्वा करणेषु चरेषु सर्पेन्द्ररौद्रान् विवर्ज्य सुयोगे वैधृतिविष्कम्भवज्रपरिघव्याघातशूलातिगण्डव्यतीपाताद्भुततिथिवारर्क्षयोगदोषादित्यारासितराहुदोषयुक्तानपोह्य दिवैवं निर्मले वित्काव्यगुरुहोरायां चतुर्थेऽष्टमे ग्रहैर्हीने शशिन्यव्ययायोदयायुगगे त्रिषडेकादशगैः पापैः केन्द्रगैश्च शुभैरन्यैरूर्ध्वाननहोरायां पूर्वाह्णे - - - - - - -।

---

[*] ‘ज्यां खनित्वा तन्मृदं संगृह्य पूरिता’ इत्यनुवर्तते ।

२.१६ ——— ——— गमन-

ज्ञा. १३.२१

यजमानो भगवन्तमाराध्य ऋत्विग्भिः सार्धं पायसं भुक्त्वा पुण्याहान्ते भामिनीं सर्वभोगयुतां शुभामेकां सर्वाङ्गीणार्द्रचन्दनां शुक्लमाल्याम्बरधरां मुक्ताभरणभूषितां पद्मप्रदीपहस्तां पुरस्कृत्य सर्वे चन्दनदिग्धाङ्गाः शुक्लस्रग्वसनाः शुभ्राः प्राङ्मुखा उदङ्मुखा वा उद्देशिनीं महीं प्रेक्ष्य अत्वराः शकुनान्युपलक्ष्य विष्णोर्नामानि जप्त्वा पश्चात् 'प्रीयतां भगवा'नित्यारभ्य 'कुर्वन्तु च सहायता'मित्यन्तं शकुनसूक्तं च जप्त्वा गच्छेयुः ।

२.१७ ——— ——— शकुन-शुभ-

ज्ञा. १३.२१,२

तत्र वृषहयगजधेनुध्वजच्छत्रचामरचक्राङ्कुशपायसदैवाकृतिहरिद्रागोमयव्रीहितण्डुलतिलयवालंकृतगणिकाभामिन्यादिदर्शने 'गच्छाऽऽहर गृहाण वद जय शाधि प्रसीदे'त्यादिश्रवणे वीणावेणुमृदङ्गवेदमङ्गलानुवाकसूक्तश्रवणे च दधिक्षीरघृतजलसुरापूर्णं कुम्भं रज्जुमुखं पिठरं व(?)शकटवीवधमदोत्कटमातङ्गान्यतमन्यस्तं लोहितं सीसान्यलोहं रत्नं दीप्तमाशुशुक्षणिं वा दृष्ट्वा परमां वृद्धिम् आदिशेत् । स्कन्धवहं कुम्भं शङ्खमकुटभेर्यादि दृष्ट्वा स्तोकवृद्धिरिति । कृकलासपललाक्षक्ष्वेदिकृष्णरज्जुवालचकोरशुकशावश्वेतकूबररक्ततुण्डकोकिलबलिजीवंजीवभृङ्गराजरामा वामाद्दक्षिणगाः शुभदाः । चाषश्येनबलाकागृहगौलिमाकरिवनकुक्कुटकुण्डिविशालीदात्यूहाः दक्षिणाद्वामगाः शुभदाः । वृकोलूकगौलिकद्रोणानां स्वरो वामतः शुभदः
- -।
तत्काले वारणमदविसर्गप्रत्यासन्नप्रसवमदोन्मत्तादिसंभवो महदैश्वर्यसूचनकृत् ।

२.१८ —— —— —— अशुभ-

ज्ञा. १३.२२

कुणिकाणकृशह्रस्वपापरोगिच्छिन्ननासपाषण्डमुण्डचण्डालगृध्रश्येनवानरोरगगजवाजिरुधिरस्रावतरुपाताशन्याद्युत्पातेन्द्रचापपरिवेष अ(षा?)हर्नक्षत्रजालप्रतिसूर्यादयः कार्यविघ्नकराः भवन्ति- ।
ध्वजपताकाद्यग्निदहनपतनकलहगजशकृन्मूत्रविसर्गाद्युद्भवे अर्थहानिः ।

२.१९ —— —— पिशाचाद्यावासपरीक्षा-

ज्ञा. १३.२२

यत्रास्थि दृश्यते (तत्र वास्तुपुरुषस्य) तत्पार्श्वे पिशाच इति अश्वास्थि चेद्रक्ष इति श्वखरोष्ट्रान्यतमास्थि चेत् सर्प इति मयूरास्थि चेद्देवावास इति विजानीयात्।

२.२०.० —— देश - अंशत्रय - सुरांशादिभेदेन

ज्ञा. १३.२२

इष्टप्रदेशं नवधा परिकल्प्य मध्यतः सुरमनुष्यराक्षसाश्रयास्त्रयोंऽशाः ज्ञेयाः ।

२.२०.१ —— —— —— सुरांश - फल-

ज्ञा. १३.२२

तेषु देवांशेऽत्यन्तशोभनाः प्रारब्धाः कार्यसिद्धिकरा - - - - भवन्ति ।

२.२०.२ ——— ——— ——— मनुष्यांश- ———

ज्ञा. १३.२२

मनुष्यांशे बहुविघ्नमिश्रिता प्रयत्नसाध्या- - - - - भवन्ति ।

२.२०.३ ——— ——— ——— राक्षसांश- ———

ज्ञा. १३.२२

राक्षसांशे मरणरोगयज्ञविघ्नकरा भवन्ति ।

२.२१ ——— ——— निमित्तपरीक्षण-

ज्ञा. १३.२२.३

एवं ज्ञात्वा अन्तःकरणाह्लादपरिम्लान अक्षिभुजादीनां दक्षिणवामस्फुरणवहनादिना शुभाशुभमुपलक्ष्यारभेत । अभीष्टे देशे शुभराशौ स्थित्वा लक्षयेत् । प्रागुत्तरान्त क्रमेण क्रियादिषु रिप्पान्तं त्रिपर्यायं संस्थाप्य शुभर्क्षे शुभग्रहोदये स्थिरे भामिनीं संस्थाप्य ‘अङ्गं स्पृशस्वे’ति तामुक्त्वा स्पृष्टाङ्गेनापि लक्षयेत् ।

२.२२ ——— ——— ——— शुभ-

ज्ञा. १३.२२,३

शुभर्क्षे शुभग्रहोदये स्थिरे भामिनीं संस्थाप्य ‘अङ्गं स्पृशस्वे’ति तामुक्त्वा

स्पृष्टाङ्गेनापि लक्षयेत् । अक्ष्युरोजहृदयास्यस्पर्शने महदैश्वर्यं कपोलकर्णश्रवणगुह्यबाहुललाटपार्श्वनासाभ्रूस्पर्शने वीर्यविवर्धनं- - - - - - -। तयोक्तपदाक्षरे प्रथमद्वितीयतृतीयचतुर्थपञ्चमवर्गाद्यन्यतमाद्युक्ते महदैश्वर्यं - - - - - - -। एवमालक्ष्य शुभबहुलेष्वारभेत ।

२.२३ ——— ——— ——— अशुभ-

ज्ञा. १३.२२,३

शुभर्क्षे शुभग्रहोदये स्थिरे भामिनीं संस्थाप्य 'अङ्गं स्पृशस्वे'ति तामुक्त्वा स्पृष्टाङ्गेनापि लक्षयेत् ।- - - - - -पृष्ठोरुकक्षनखकेशस्पर्शने दुःखविघ्नकरम् ।- - - - - - षष्ठसप्तमाष्टमेषु कचटवर्गेषु उक्तेषु मरणकलहविघ्नानि इत्यन्यदनिलदहनाक्षिश्रवणयुगलानां(?) पञ्चवर्गाणां पञ्चक्रमेणाजादिषु युज्यन्ते। शेषान् पृष्ठे स्थाप्य राशिवशात् ग्रहवशाच्चापि लक्षयेत् ।

२.२४ ——— ग्रामादिविन्यास-कर्षणादिपुरःसर-

ज्ञा. १३.२३

शुभर्क्षे कर्तुरनुकूलर्क्षे कर्षणं कृत्वा उप्तबीजानि वापयित्वा प्ररूढसस्यानि गोगणेभ्यो निवेद्य ग्रामनगरपत्तनादीन् विन्यासविधिना अभिनिवेशयेदिति विज्ञायते ।

२.२५ ——— ——— आरम्भकाल-

ज्ञा. १४.२४

स्वनामग्रामर्क्षानुकूलर्क्षे ग्रामविन्यासमारभेत ।

२.२६ —— —— दिङ्निर्णय - सूत्रविन्यास-

ज्ञा. १४.२४,५

सहस्रदण्डमानेन तदर्धेन शतदण्डमानेन वा वृत्तं चतुरश्रं वा समुपकल्प्य दण्डेन प्रागुदङ्मानं प्रमीय तन्मध्ये नैर्ऋतस्थाने शङ्कुमाहृत्य तच्छायया श्रवणेन वा प्राचीम् उदीचीं वा कल्पयेत् ।

खदिरचन्दनकदम्बसालासनवकुलानामन्यतमं सारवन्तमसुषिरं समवृत्तनाहद्विगुणं षोडशाङ्गुलमानायतं शङ्कुमाहृत्य शुक्लपक्षे दिने शुद्धे कर्तुरनुकूले मुहूर्ते पञ्चगव्यैः प्राजापत्येन प्रक्षाल्य प्रोक्षणैः प्रोक्ष्य पुष्पगन्धधूपदीपाक्षतैरभ्यर्च्य वस्त्रेण परिवेष्ट्य पूर्वेद्युरधिवास्य आचार्यः स्नात्वा अलङ्कृत्य शिल्पिभिः दण्डमानेन मानितां सुवृत्तां सुसंमितां स्निग्धां वेदिं कृत्वा न्यग्रोधमण्डलं शङ्कुप्रमाणं द्विगुणमर्धं चोल्लिख्य तन्मध्ये बिन्दू उपकल्प्य तद्बिन्दोरन्तरे शङ्कुं प्रातरेव प्राङ्मुखः प्रयतो भूत्वा ब्रह्माणं मनसा ध्यात्वा सूर्यं दिग्देवताश्च प्रणम्य तदाद्यैः ब्रह्मघोषैः आघोष्य शङ्कुं संस्थाप्य छायाग्रपतनं दृष्ट्वा सूच्यग्रेणाधाय यवमात्रं रेखां सूचयित्वा एवं पूर्वाह्णापराह्णयोरपि क्रमं बुद्ध्वा सूत्रं प्रसारयेत् ।

२.२७.० —— ग्रामादि-

नि. ३

अतः परं प्रवक्ष्यामि ग्रामादीनां च लक्षणम् ।
ग्रामं चैवाग्रहारं च एकभोगं तथैव च ॥

मङ्गलं कुब्जकं चैव कूटकं च षट्जनाः(?) ।
नगरी राजधानी च राज्ञा सेनामुखं चरेत् ॥

एतद्वेदं तथा चैव चत्वारः समुदाहृताः ।
वणिजां च त्रयः प्रोक्ताः पत्तनं खर्वटं पुरम् ॥
शूद्राणां कणिकं चैव- - - - - - - - -।

वि. ३.९

[अत्र ग्राम - अग्रहार - एकभोग - मङ्गल - कुब्जक -कूटक- नगरी-राजधानी - सेनामुख - वेद - पत्तन - खर्वट -पुर कणिकानां स्थाने ग्राम - अग्रहार - नगर - पत्तन - खर्वट - कुटिक - सेनामुख-राजधानी-शिबिराः निर्दिश्यन्ते इति विशेषः ।]

ज्ञा. १४.२३
[अत्र विमानार्चनाकल्पवत् ।]

२.२७.१ ——— ——— ग्राम-

वि. ३.९
विप्राणां सभृत्यानां निवासो ग्रामः ।

ज्ञा. १४.२३

नि. ३
[अत्र सभृत्यानाम् इति नास्तीति विशेषः ।]

स. २.५४

२.२७.२ ——— ——— अग्रहार-

स. २.५४

विप्रश्रेष्ठनिवासस्तु सोऽग्रहार इतीर्यते ॥

ज्ञा. १४.२३
वि. ३.९

नि. ३
काननं भूधरं चैव कृतक्षेत्रसमन्वितम् ।
अग्रहारमिति प्रोक्तम् - - - - - - - - -॥

२.२७.३ ——— ——— एकभोग-

नि. ३

- - - - - - - - -एकद्विजवरस्य वै ।

दत्तं यदेकभोगं स्यात् - - - - - - - - -॥

२.२७.४ ——— ——— मङ्गल-

नि. ३

- - - - - - स्वस्य बान्धवसंयुतम् ॥

वसेद्यत्र विशेषेण कल्पैर्विद्वद्भिरेव च ।
अहो ▽भोग्यमलं प्रोक्तं - - -- - - --॥

▽अत्र मङ्गलमित्यपेक्ष्यते ।

२.२७.५ ——— ——— कुब्जक-

नि. ३

- - - - - - - -ग्रामादीनां तु सीमनि ॥

निवासं कुब्जकं प्रोक्तं विप्राणां तु विशेषतः ।

२.२७.६ ——— ——— कूटक -

नि. ३

द्विजशुश्रूषुशूद्राणां निवासं कूटकं विदुः ॥

ज्ञा. १४.२३

सपरिवारकैकग्रामणिकं कुटिकमिति ।

वि. ३.९

स. २.५८

शूद्राणामेव वासस्तु कुटिकं परिभाषितम् ॥

२.२७.७ ——— ——— नगरी-

नि. ३

सर्ववेदसमायुक्तं नृपसद्मसमन्वितम् ।

देशान्तरहृतद्रव्यं क्रयविक्रयकादिभिः ॥

नानाजने समाकीर्णे नगरीत्युच्यते बुधैः ।

वि. ३.९

अनेकजनसंबाधमनेकशिल्पिक्रयकविक्रयकाधिष्ठितं सर्वदेवतासंयुक्तं नगरम्

ज्ञा. १४.२३

स. २.५६

वणिजां तु निवासस्तु नगरं चेति कीर्त्यते ॥

२.२७.८ ——— ——— राजधानी-

ज्ञा. १४.२४
चतुरङ्गसमाकीर्णा नृपतितद्भृत्यजुष्टा राजधानीति ।

स. २.५५
नि.३
वि. ३.९

२.२७.९ ——— ——— सेनामुख-

ज्ञा. १४.२४

सर्वजातिसमाकीर्णं नृपवेश्मसमायुक्तं बहुगह्वररक्षाविधानं सेनामुखमिति ।

नि. ३
[अत्र सेनानाथसमन्वितमिति विशेषणमधिकमिति विशेषः ।]

वि. ३.९

२.२७.१० —— —— वेद-

नि. ३

अरण्ये वा नदीतीरे तटाके वाब्धिपार्श्वके ।
वासं यत्रैव योगीनाम्(?) इमं वेदमुदाहृतम् ॥

२.२७.११ —— —— पत्तन-

वि. ३.९
द्वीपान्तरगतद्रव्यक्रयकविक्रयकाधिष्ठितं पत्तनम् ।

स. २.५६,७

[अत्र समुद्रतीरपार्श्वस्थमिति विशेषणमधिकम् इति विशेषः ।]

ज्ञा. १४.२३

नि. ३
[अत्र समूर्तार्चनाधिकरणवत् ।]

२.२७.१२ —— —— खर्वट-

वि. ३.९
उभयसंमिश्रं* खर्वटम् ।

---

*नगरपत्तनोभयलक्षणसंमिश्रम् ।

२.२७.१३ ——— ——— पुर-

नि. ३

तद्वीपवणिजावासं केवलं पुरमिष्यते ।

२.२७.१४ ——— ——— कणिक-

नि. ३

शूद्राणां केवलं वासं कणिकं समुदाहृतम् ।

२.२७.१५ ——— ——— शिबिर-

वि. ३.९

नृपसेनाचमूनाथनिवेशनं शिबिरमिति ।

ज्ञा. १४.२४

२.२७.१६ ——— ——— दण्डक-

स. २.५८

एतद्[*]विधिकृतं यत्तत्तेषा[**]मेव तु दण्डकम् ॥

---

[*] खर्वटम् । [**] वणिजाम् ।

२.२८.० —— ग्रामादिविन्यास - दण्डकादि

नि. ३

एतेषामेव[☆] सर्वेषां वक्ष्ये विन्यासलक्षणम् ।
दण्डकं स्वस्तिकं चैव वर्धमानमतः परम् ॥

प्रस्तरं च प्रकीर्णं च श्रीकामं[*] च ततः परम् ।
पराकं पद्मकं चोक्तं श्रीप्रतिष्ठितकं परम् ॥

श्रीवत्सं वेदिकं चैव वक्रकार्मुकमेव[**] च ।
नन्द्यावर्तं तथा चैव कुम्भकं च यथाक्रमम् ॥

ज्ञा. १५.२५

[अत्र श्रीवत्स - नाभियुक्त - पार्श्वयुक्त - नन्द्यावर्त - भद्रक - स्वस्तिक - पद्मक - कर्णिकपद्म - पद्मावर्त - रथपद - प्रकीर्णक-उत्कीर्णकसंज्ञकाः ग्रामाग्रहारयोः विन्यासभेदाः; नगरादीनां तु कुम्भक-वेदिक - सिंहाख्य-दण्डका इति विशेषः।]

वि. ३.१०

[अत्र ग्रामाग्रहारयोरेव दण्डक - करीदण्डक - स्वस्तिक नन्द्यावर्त-पद्मवीथिक-चतुष्पद - प्रकीर्णक - उत्कीर्णकसंज्ञकाः विन्यासभेदाः इति विशेषः ।]

[☆] ग्रामादीनाम् ।

[*] अग्रे लक्षणावसरे [२.२८.६] श्रीकरम् इति पठ्यते ।

[**] लक्षणवाक्ये [२.२८.१२] वैकटमिति पठ्यते ।

२.२८.१ —— —— दण्डक-

वि. ३.१०

प्रागग्रमुत्तराग्रं वा एकवीथिकं दण्डकम् ।

ज्ञा. १५.२६

[अत्र यथेष्टायतैकरथ्याद्वारद्वययुतं दण्डकमिति विशेषः ।]*

२.२८.१.० —— —— —— चतुर्विध - दण्डकादिभेदेन

नि. ३

वक्ष्ये नामानि चैतेषां दण्डकं च चतुर्विधम् ।
दण्डकं** दण्डकालयं क्रमुकं बाहुदण्डकम् ॥

२.२८.२ —— —— स्वस्तिक-

वि. ३.१०

नीलानिलेशानलपुच्छकं दक्षिणादिचतुर्वीथिकं स्वस्तिकम् ।

---

* उद्देशवाक्ये दण्डकं नोपलभ्यते ।

** दण्डकादीनां दण्डकावान्तरभेदानां लक्षणादिकं नोपलभ्यते ।

ज्ञा. १५.२६

[अत्र तिर्यक् तिर्यक् समीकृता रथ्याश्चतुर्धा प्रोताः स्वस्तिकमिति विशेषः ।]

२.२८.२.० ——— ——— ——— **सप्तविध-शुद्धस्वस्तिकादिभेदेन**

नि. ३

शुद्धं च स्वस्तिकं* चक्रं चक्रमध्यं तथैव च ॥
विलसद्वीथिपदं चैव अनुवीथिसमन्वितम् ।
अचलं स्वस्तिकं चैव सप्तधा समुदाहृतम् ॥

२.२८.२.१ ——— ——— ——— **चक्र-**

नि. ३

पूर्ववद्वर्धमानानि** वरावराकारमेव हि ।
एवं पदविधा प्रोक्त......ग च पश्चिमे ॥

प्रत्येकं क्षुद्रवीथी द्वौ (द्वे ?) चक्रमित्यभिधीयते ।

२.२८.२.२ ——— ——— ——— **चक्रमध्य-**

नि. ३

---

*शुद्धस्वस्तिकस्य लक्षणं स्वीकृतायां मातृकायां नोपलभ्यते ।

** शुद्धस्वस्तिकवत् ।

तत्रैव परितश्चैव महावीथिबहिस्तथा ।

पक्षैकं पक्षयुग्मं वा - वै रथ्यासमावृतम् ।
तत्र तेश्चोकरथ्यास्तु(?) महेन्द्रे च गृहक्षते ।

पुष्पदन्ते च भल्लाटे -------पूर्वोक्तवमही(?) ।
कोणेषु च चतुर्दिक्षु द्वारमेव चतुष्कृतम् ॥

महारथ्याचतुर्युक्तं राजवीथ्यैकया युता(?) ।

२.२८.२.३ ——— ——— ——— **विलसत्-**

नि. ३

– – सरथ्यारियद्भिस्तस्मिन्नेव विशेषतः ॥
उत्तमं राजमार्गं च दक्षिणं च यथाक्रमम् ।
- - महावीथ्यैकं च(?) रथ्यावसानकम् ॥

प्रत्येकं चैव वीथीयुक् मध्ये दक्षिणमुत्तरम् ।
खण्डरग्वा(थ्या ?)द्वयोपेतं विलसत् स्वस्तिकं विदुः ॥

२.२८.२.४ ——— ——— ——— **वीथिपद-**

नि. ३

महारथ्याचतुर्युक्तं वास्तुमध्यस्य दक्षिणे ।
राजमार्गत्रयोपेतं तत्पूर्वे — तिर्यग्युतम् ॥

पश्चिमे च तथा रथ्या मध्यमस्य विशेषतः ।
उत्तरे नाभिवीथ्यैक तत्पूर्वरथ्यामनिर्गमम् ॥

दक्षिणे नाभिरथ्याया तस्य दक्षिणमार्गतः ।
मध्यमे तिर्यग्वीथीषु उत्तराश्यै तन्वितम् ॥

एतद्वीथिपदं प्रोक्तं वास्तुविद्याविशारदैः ।

२.२८.२.५ ——— ——— ——— **अनुवीथि-**

नि. ३

महावीथ्याश्चतुर्युक्तं हृदयाद्दक्षिणेन तु ॥

राजमार्गत्रयोपेतं पश्चिमे . . . .तिर्यग्यथा ।
पूर्वस्याद्दे(?) विके तिर्यग्वीथिकैकसमन्वितम् ॥

एतान्युक्तानि सर्वाणि महारथ्या तमिष्यते ।
हृदयादुत्तरे रथ्याद्वयं प्रागग्रमुच्यते ॥

यथा च वी(?) तियंग्रथ्याचतुर्युक्तं विशेषतः ।
तत्र पश्चिमरथ्यान्तं पूर्वोक्तमविकोश्च यम् ॥

तत्र दक्षिणरथ्यान्तं पश्चादुक्ताश्च वीथिका ।
खण्डरथ्यात्रयोपेतमुत्तरे मध्यरथ्ययोः ॥

अनु*बद्धमिदं वास्तुमित्युक्तं तत्र(न्त्र ?)कोविदैः ।

---

* अनुबद्धपदम् अनुवीथिपरतया प्रयुक्तं स्यात् ।

२.२८.२.६ ——— ——— ——— अचलस्वस्तिक-

नि. ३

बाह्यरथ्याचतुर्युक्तं नाभिरथ्यसमन्वितम् ॥

नाभेर्मङ्गलवीथ्यन्तं(?) पश्चादुक्ताश्च वीथिकाः ।
पश्चिमे नाभिवीथ्यास्तु तिर्यग्वै वीथिकाद्वयम् ॥

दक्षिणे चोत्तरे बाह्ये रथ्यान्तं परिकल्पयेत् ।
पश्चिमाप्रोक्तरथ्याया एतद्वै वीथिकद्वयम् ॥

उत्तरं प्रोतवीथ्यैस्तु दक्षिणान्तं तथैव च ।
पूर्वात्पश्चिमरथ्यान्तं तथा वीथिद्वयान्विंतम् ॥

एवंलक्षणसंयुक्तं सर्वसंपत्करं भवेत् ।
अचलं स्वस्तिकं चैव पद्मं.. ...परिचक्षते(?) ॥

२.२८.३ ——— ——— वर्धमान-

नि. ३

उत्तरान्तमपिक्षं(?) चै(?) चतुर्भिर्वीथिभिर्युतम् ।
दक्षिणोत्तरयोस्तत्र महारथ्यैकपक्षया ॥

युक्तनिर्गमनद्वारं कल्पयेद्विना सह(?) ।
वर्धमानमिदं प्रोक्तं वास्तुविद्याविशारदैः ॥

२.२८.४ ——— ——— प्रस्तर-

नि. ३

महारथ्याचतुर्युक्तं राजमार्गकया युतम् ।
एकादिगुणरथ्यान्तम् एकैकं वर्धयेद्बुधः ॥

तिर्यग्वीथिकया युक्तं प्रस्तरं समुदाहृतम् ।

२.२८.५ ——— ——— प्रकीर्णक-

नि. ३

महारथ्याचतुर्युक्तं देवमानुषयोरपि ॥

प्रत्येकं पार्श्वयोश्चैव राजमार्गद्वयान्वितम् ।
पूर्वपश्चिमयोश्चैव अन्तरावीथि कारयेत् ॥

एतत् प्रकीर्णकं प्रोक्तम् अथवा पण्डितैरपि ।
राजमार्गं चतुर्युक्तं वस्वाद्यर्कावसानकम् ॥

एकैकं वर्धयेद्वीथिं तिर्यक् क्रमशव(?) स्तथा ।
एतल्लक्षणसंयुक्तं कथ्यते तु प्रकीर्णकम् ॥

ज्ञा. १५.२६

[अत्र पदनाभिकं तद्युक्तानुगाल्पान्तवीथिकं प्रकीर्णकम् इति विशेषः ।]

वि. ३.१०

[अत्र षट्सप्ता(ष्टनवाधिकदशा)न्यतमक्षुद्रवीथिकं प्रकीर्णकम् इति विशेषः।]

२.२८.६ ——— ——— **श्रीकर-***

नि. ३

विषयं राजमार्गं स्यात् तिरश्चीनं त्रयोदश ।
आसप्ते दशरथ्यान्तमेकैकमधिकं क्रमात् ॥

वर्धयेच्छ्रीकरं वास्तु श्रीपदं तत्र वासिनाम् ।

२.२८.७ ——— ——— **पराक-**

नि. ३

राजमार्गरसैर्युक्तं तिरश्चीनक्रमं तथा ॥

अष्टादशाद्यद्द्वाविंशदेकैकमधिकं भवेत् ।
एतल्लक्षणसंयुक्तं पराकं चेति कथ्यते ॥

२.२८.८ ——— ——— **पद्मक-**

नि. ३

---

* उद्देशवाक्ये (२.२८.०) श्रीकामम् इति पठ्यते ।

बाह्यवीथ्या चतुर्युक्तं नाभिवीथ्या समन्वितम् ।
पश्चिमाद्बाह्यरथ्यायाः प्रागन्तं नाभिवीथिकम् ॥

उत्तरे कल्पयेत्तस्मात् मध्यमादुत्तमान्तकः ।
एकरथ्यासमायुक्तं दक्षिणे नाभिवीथिकम् ॥

पश्चिमे नाभिवीथ्यायाः प्रागन्तं कल्पमध्यतः ।
दक्षिणे बाह्यरथ्यान्तम् एकरथ्यासमन्वितम् ॥

तयोरप्यन्तरे रथ्या वर्धयेच्च समावृतम् ।
नाभे मङ्गलवीथ्यन्तं पूर्ववत् प्रोक्तवीथिकम् ॥

द्वारं पूर्वोक्तवत् कुर्यात् एवं वै मणिपद्मकम् ।
केचिद्व. . . . .व्यधिकं वीथीं राजमार्गं च कारयेत् ॥

भूयो विंशतिरथ्यादिरेकैकं वीथिकं क्रमात् ।
सप्तविंशतिरथ्यान्तं तिरश्चीनं विवर्धयेत् ॥

एतद्वै वास्तुशास्त्रज्ञैः पण्डितैः पद्मकं त्विति ।

ज्ञा. १५.२६

[अत्र नाभिमङ्गलवीथिभ्यां वेष्टितं चतुर्द्वारयुतमेतत् पद्मकम् इति विशेषः ।]

२.२८.९ —— —— **श्रीप्रतिष्ठितक-**

नि. ३

राजमार्गाष्टभिर्युक्त.......रिंकै वा अष्टविंशति ॥

द्वात्रिंशवीथिपर्यन्तमेकैकं.....वीथिकं क्रमात् ।
श्रीप्रतिष्ठितकं वास्तु......कथ्यते भद्रकोविदैः ॥

२.२८.१० ——— ——— श्रीवत्स-

नि. ३

राजमार्गत्रयोपेतं तिरश्चीनोऽथ वीथियुक् ।
यथेष्टं श्रीवत्समित्युक्तं वास्तुशास्त्रकृतश्रमैः ॥

तदेव मध्यमं हित्वा ब्रह्मभागे तु पार्श्वयोः ।
राजमार्गत्रयोपेतं बाह्यरथ्याचतुर्युतम् ॥

एतल्लक्षणसंयुक्तं पार्श्वयुक्तमुदान्वि(ह ?)तम् ।
तदेव बाह्यरथ्या च पक्षयुग्मं भवेद्यदि ॥

नाम्ना च भद्रकं चैव श्रीवत्सं पण्डितैरपि ।
पक्षयुग्मं महारथ्यामध्यमे पार्श्वयोरपि ॥

राजमार्गत्रयोपेतं तिरश्चीनौ. .... ।
एतै(?)द्वास्तु संकलितं श्रीवत्समिति कथ्यते ॥

ज्ञा. १५.२६

[अत्र प्राङ्मुखास्तिस्रः पञ्च सप्त वा वीथीः प्रकल्प्य युग्मानन्तरवीथिकाः कल्पयेदेतच्छ्रीवत्सम् इति विशेषः ।]

२.२८.११ ——— ——— वैदिक-

नि. ३

पूर्वान्तमुत्तरान्तं च रथ्यया चैकया वृतम् ।
यावकं(?) दक्षिणे चैव वायव्यामुत्तरें तथा ॥

जनानां निर्गमद्वारयुक्तं तद्वेदिकं विदुः ।

ज्ञा. १५.२६
[अत्र वायव्याग्नेयनिर्गमं वेदिकम् इति विशेषः ।]

२.२८.१२ ——— ——— वैकंट-*

नि. ३

राजमार्गमविच्छिन्नं चतुर्युक्तं वदैव हि ॥

स्वस्तिदेविकमेतत्तु सुमुखं तत्र वासिनाम् ।
म- - - -(हारथ्या ?) चतुर्युक्त(क्तं ?) राजरथ्यैकया युतम् ॥

एवं वै निर्गमद्वारमेतद्वैकटमुच्यते ।

२.२८.१३ ——— ——— नन्द्यावर्त-

नि. ३

---

* उद्देशवाक्ये वक्रकार्मुकमिति पठ्यते (२.२८.०)

महारथ्याचतुर्युक्तं नाभिरथ्यासमन्वितम् ।

नाभे(?) मङ्गलवीथ्यान्तं कोणेषु प्रोतवीथिषु ।
प्रोताद्द्वौ बाह्यरथ्यान्तं तयोरप्यन्तरेऽपि च ॥

चतुर्दिक्ष्वेकवीथींयुक् नन्द्यावर्तमुदाहृतम् ।
तदेव गुणवीथि स्यात् तयोरप्यन्तरे तथा ॥

एतत् भद्रकमित्युक्तं श्रीप(प्र?)दं तत्र वासिनाम् ।
तदेव पञ्चभिर्युक्तं ग्रहोढं नाम कथ्यते ॥

ज्ञा. १५.२६

[अत्र ईशानानलनीलानिलगाः प्राग्याम्यावरोदङ्मुखद्वारनाभिजाः ताभ्योऽन्तरा युग्मं चैतन्नन्द्यावर्तम् इति विशेषः ।]

वि. ३.१०
[अत्र सदेवं सतृतीयद्विवीथिकं नन्द्यावर्तम् इति विशेषः ।]

२.२८.१४ ——— ——— कुम्भक-

नि. ३

वृत्तमङ्गलवीथीयुक् सर्वाण्यन्यानि युक्तितः ।
कल्पितं कुम्भकं प्रोक्तमेतेष्वपि विशेषतः ॥

ज्ञा. १५.२६
[अत्र वृत्तैकवीथिकं कुम्भकम् इति विशेषः ।]

२.२८.१५ —— —— **नाभियुक्त-**

ज्ञा. १५.२६

एत*देव वीथिप्रोतसनाभिकं नाभियुक्तम् ।

२.२८.१६ —— —— **पार्श्वयुक्त-**

ज्ञा. १५.२६

उभयोः पार्श्वयोः राजवीथिद्वययुक्तं सनाभिकमनाभिकं वैतत् पार्श्वयुक्तम्।

२.२८.१७ —— —— **भद्रक-**

ज्ञा. १५.२६

द्वारवीथी यदि प्रोत्य क्षुद्रमध्यमा महावीथीं स्पृशन्त्येतत् भद्रकमिति ।

२.२८.१८ —— —— **कर्णिकपद्म-**

ज्ञा. १५.२६

स्वस्तिकवत् क्लृप्तं कोणमध्याश्रितनाभ्या द्वारावीथियुतमेतत् कर्णिकपद्ममिति ।

---

*श्रीवत्समेव (२.२८.१०)

२.२८.१९ ——— ——— पद्मावर्त-

ज्ञा. १५.२६
भद्रकवत्प्रोतरथ्यान्तं पद्मावर्तमिति ।

२.२८.२० ——— ——— रथपद-

ज्ञा. १५.२६

समषड्राजवीथिका प्रागुत्तरामुखा चतुर्द्वारयुता चेत्येतद्रथपदम् इति ।

२.२८.२१ ——— ——— उत्कीर्णक-

ज्ञा. १५.२६

तत्पदं प्रतियुक्तव्यत्यस्तक्षुद्रवीथिकमक्षुद्रवीथिकमुत्कीर्णकमिति ।

वि. ३.१०

[अत्र एकद्वित्रिचतुःपञ्चाधिकविंशद्वीथिकम् उत्कीर्णकम् इति विशेषः ।]

२.२८.२२ ——— ——— करीदण्डक-

वि. ३.१०
प्राङ्मुखं द्विवीथिकं करीदण्डकम् ।

२.२८.२३ —— —— पद्मवीथिक-

वि. ३.१०

सदीर्घक्षुद्रवीथिकं पद्मवीथिकम् ।

२.२८.२४ —— —— चतुष्पद-

वि. ३.१०

प्रागग्रानलवीथिकं चतुष्पदं च ।

२.२८.२५ —— —— सिंहाख्य-

ज्ञा. १५.२६

चतुरश्रं समं कृत्वा नाभ्यष्टदिग्द्वारमुखमन्यत् पद्मकसंकाशं सिंहाख्यम् इति

२.२९ —— ग्रामादि - विप्रावासयोग्य-

नि. ३

शुद्धस्वस्तिकमार्गं च श्रीवत्सं पद्मकं तथा ।
नन्द्यावर्तं च विप्राणां श्रेष्ठं विन्यासकेषु च ॥

२.३० —— —— **क्षत्रियावासयोग्य-**

नि. ३

प्रकीर्णकं पराकं च श्रीप्रतिष्ठितमेव च ।
श्रीकरं कुम्भकं चैव नृपाणां श्रेष्ठमुच्यते ॥

२.३१ —— —— **वैश्यावासयोग्य-**

नि. ३

दण्डकं वैदिकं चैव कटकामुखमेव च ।
प्रस्तरं चेति वैश्यानाम्- - - - - - -॥

२.३२ —— —— **शूद्रावासयोग्य-**

नि. ३

- - - - - - - - - -शूद्राणां वर्धमानकम् ।

२.३३ —— **ग्राम - विप्रावासस्थान-**

क्रि. २.६४-६

ग्राममानं विनिश्चित्य कृत्वायादिपरीक्षणम् ॥
प्रागुत्तराननैः सूत्रैः दशभिः सप्तभिर्युतैः ।

पदं कृत्वा विधानेन चतुःषष्टिं चतुर्गुणम् ॥
त्यक्त्वा ब्राह्मं च पैशाचं विप्रावासं प्रकल्पयेत् ।

ज्ञा. १६.३०

[अत्र दैविकमानुषयोः स्थानयोरेव निर्देशः इति विशेषः ।]

२.३४ —— —— **आचार्यावासस्थान-**

ज्ञा. २१.३९

तस्य† दक्षिणपार्श्वे आचार्यसदनं परिकल्पयेत् । गुरुर्विष्णुपरायणः सद्मन्यावसेत् ।

स. २.४२,३

[अत्र उत्तरतः पार्श्वे वा इत्यधिकम् इति विशेषः ।]

२.३५ —— —— **अर्चकावासस्थान-**

वि. ३.१२

तदर्चकानां* तत्पार्श्वे स्थानं - - - -प्रकल्पयेत् ।

स. २.४२,३

ज्ञा. १७.३२

२.३६ —— —— **परिचारकविप्राद्यावासस्थान-**

नि.३

---

† विष्णोः आलयस्य ।

* विष्णवर्चकानाम् ।

तत्पूर्वे चोत्तरे वाथ दक्षिणे वा यथोचितम् ।
परिचारकविप्राणां दैविके गृहमिष्यते ॥

दैवमानुषयोश्चैव अन्येषां वास्तु मु (उ ?)च्यते ।
स्वस्ति-रं गतानां च दिनानां च विशेषतः ॥

कल्पयेत् पदपैशाचे वास्तुपैशाचकेऽपि- ।
मर्मादिरहितेष्वेव सभा विष्ण्वालयं बुधः ॥

द्विजशुश्रूषुशूद्राणां तत्र कर्मोपजीविनाम् ।
वास्तुपैशाचके वासं कल्पयेत्तन्त्रवित्तमः ॥

पैशाचके न विप्राणां वासं (सः ?) केचि(केश्चि)दुदाहृतम्(तः?) ।
एवमेव क्रमेणैव कल्पयेदेदपूर्वकम् ॥

अन्याश्रमेष्वविस्तारं वेदभूधरसार्वकम् ।
आयतं क्रमशः प्रोक्तं दण्डेनैव प्रमीयते ॥

तत्रैव हस्तमानेन शिल्पशास्त्रक्रमेण वै ।
पदमध्ये गृहश्रेणिं कल्पयेच्छिल्पिना बुधैः ॥

भूपरीक्षाक्रमेणैव भूमिं सम्यक् परीक्षयेत् ।

२.३७ —— —— कुलालाद्यावासस्थान-

ज्ञा. १७.३१

पैशाचभागे प्राच्यां कुलालनापिताम्बष्ठादीनां याम्ये तन्तुवायचक्रिणां वारुणे क्रयविक्रयकारिणां वणिजां सौम्ये द्विजभृत्यानां वादित्रजीविनां च आग्नेय्यां क्रोशमात्रे तक्षादीनां नैर्ऋते गव्यूतिमात्रे चण्डालवर्गाणां वायव्ये मृगव्याधशाकुनिकादीनाम् ।

वि. ३.१२

[अत्र पैशाचबाह्ये प्राच्यां कुलालोर्ध्वनापिताम्बष्ठानां, वायव्ये मृगव्याधशाकुनिकाधोनापितानाम् इति विशेषः ।]

२.३८ ——— ——— सभास्थान-

वि. ३.१२

नाभ्यैशान्यां सभास्थानं ....प्रकल्पयेत् ।

ज्ञा. १७.३१

२.३९ ——— ——— गोष्ठागारस्थान-

वि. ३.१२

आग्नेय्यां गोष्ठागारं ....प्रकल्पयेत् ।

ज्ञा. १७.३१

२.४० ——— ——— आपणस्थान-

वि. ३.१२

नैर्ऋत्यामापणं. . . . .प्रकल्पयेत् ।

ज्ञा. १७.३१

२.४१ ——— ——— कूपादिस्थान-

ज्ञा. १७.३१

परिखायाः परितः धनुश्शतं तदर्धमर्धं कूपारामतटाकवाप्यादयस्तत्र भवन्ति ।

२.४२ ——— ——— प्राकारादिस्थान-

ज्ञा. १७.३१

पैशाचाद्बाह्यतः प्राकारपरिखा (खे ?) ।

वि. ३.१२

२.४३ ——— ——— श्मशानस्थान-

ज्ञा. १७.३१

ऐशान्ये नदीतीरे वा श्मशानं ग्रामायामसमम् ।

वि. ३.१२

[अत्र 'नदीतीरे वा' इत्यस्मात् परं 'दूरे' इति अधिकम् इति विशेषः।]

२.४४ ——— ——— विप्रावासकल्पन-

स. २.२४-७

विप्राणां वेदविद्यानां नित्यस्वाध्यायिनामपि ॥

पत्न्यपत्ययुतानां च साग्नीनां नित्यहोमिनाम् ।
शौचाचारयुतानां च विष्णोर्नित्यार्चनावताम् ॥

वास्तुविन्यासविधिना ग्रामं सम्यक् प्रकल्प्य च ।
आदौ विष्णोश्च देवानां देशं च परिकल्पयेत् ॥

बालालयं प्रकल्प्यैव गृहाणि परिकल्पयेत् ।

२.४५ ——— ——— त्रैवर्णिकावासकल्पन-

नि. ३

द्विजानां विश्वविन्यासं कल्पयेच्चेन्न दोषकृत् ।
नृपाणां तत्परं सर्वं वैश्यानां तत्परं तथा ॥
एवमेव क्रमेणैव विन्यसेत्तन्त्रवित्तमः ।
संकरं प्रतिलोकं(मं ?) स्यात्तस्मात्तं परिवर्जयेत् ॥

२.४६ ——— ——— तटाककल्पन-

ज्ञा. १७.३१,२

दूरे वारुण्यां तटाकं त्रिदण्डसहस्रं तदर्धप्रमाणं वा सेतुबन्धं दृढतरमत्युन्नतमनवच्छेद्यं कारयेत् । तत्र निर्झरोपकुल्यादिजलयन्त्राणि सम्यक् संकल्पयेत् । तत्पार्श्वतः सर्वसमसलिलक्षेत्रं केदारं समभागमुपकल्प्य एवं बहूदकमल्पायासकृतरक्षकमशोष्यमनवाह्यमप्रबाध्यं जलाशयं यत्नतः कारयेत्, जलमूलत्वात् सर्वजन्तूनां प्रवर्तनस्य । तस्मात् सर्वप्रयत्नेनाधारोपरिष्टात् बहुजलमेवं कुर्यात् ।

वि. ३.१२

२.४७ ——— ग्रामादि - पदविन्याससंज्ञा-

नि. २

अथातः पदविन्यासलक्षणं संप्रवक्ष्यते ।
तद्भेदं च द्विधा प्रोक्तं युग्मायुग्मक्रमेण वै ॥

वेदरज्जुसमायोगमध्ये युग्मेष्टकं विदुः ।
युग्मे युक्तपदं यत्तद्हृदयं समुदाहृतम् ॥

अग्निरज्जुसमायोगं मनुषङ्कमुदीरितम् ।
हृदयेऽभ्यन्तरे कर्णसूत्रयो. . . . .पञ्चकम् ॥

पक्षरज्जुसमोपेतं चतुष्कं चानुमार्गकम् ।
वास्तुमध्ये गते रज्जुवंशमित्यभिधीयते ॥

तत्तत्पार्श्वे गतं सूत्रं तनुवंशं चेति कथ्यते ।
तद्वास्तुबाह्यसूत्रं तत् प्रसार्यं नाम पठ्यते ॥

वंशः स्यादग्रसंयोगं प्रसार्यैः संधिरुच्यते ।
कोणे पार्श्वगतं सूत्रं तनुवंशं चेति कथ्यते ॥

तद्वास्तुबाह्यसूत्रं यत् प्रसार्यं नाम पठ्यते ।
वंशः स्यादग्रतो योगं प्रसार्यैः संधिरुच्यते ॥

कोणे प्रसार्यसंयोगे कर्णरज्जुनिपातितम् ।
तं शूलमिति संप्रोक्तं मध्यमं सध्य(संध्य?)योरपि ॥

कोणं लाङ्गलमित्युक्तं वास्तुविद्याविशारदैः ।

चतुर्दिवस्तु पर्यान्ते(?) प्रागन्ते चोत्तरान्तिकम् ॥
वेदसूत्रसमायोगं संकुलं समुदाहृतम् ।

२.४८ ——— ——— पद - ब्राह्म-

नि. २

अग्नावे(वौ?)पासनादीनां योग्यध्यातादिदैवतम् ॥

प्रागन्तमुत्तरान्तं च पञ्चरज्जुसमन्वितम् ।
कर्णरज्जुसमोपेतं चतुःसन्धिसमन्वितम् ॥

चतुर्भिर्लाङ्गलैर्युक्तं अष्टके कु ? तु चादरम् ।
वासवाग्नियमं चैव मतिं चाम्भोधिपं तथा ॥

वायुः सोमश्च शर्वश्च दिक्पालाश्च तथास्थितम् ।
केवलं सूत्रसन्धौ तु ब्राह्मं तत्र चतुष्पदम् ॥

सर्वमङ्गलकर्माणि योग्यमेतत् पदं शुभम् ।

२.४९ ——— ——— ——— पीठ-

नि. २

प्राच्यग्रपद्मसूत्रं तु तावद्भिस्तिर्यग्युतम्(?) ॥

हृदयं पदमेकं तु कर्णसूत्रसमन्वितम् ।
चतुर्भिः पञ्चकैर्युक्तं चतुर्भिर्लाङ्गलैर्युतम् ॥

अष्टाभिः सन्धिभिर्युक्तं पदं पीठमुदाहृतम् ।
पूर्वोक्तदेवताः सर्वे पदस्थाः तत्र भुञ्जते ॥

पदमेतत् गृहादीनां वर्ज्या ग्रामाग्रहारयोः ।

२.५० ——— ——— ——— **महापीठ-**

नि. २

प्राङ्मुखैः पञ्चभिः सूत्रैः तावद्भिः तिर्यग्भिः युतम् ॥

अष्टवैकं तु(?) षड्देवं चतुष्कं कर्णमेव च ।
लाङ्गलं शूलमेतानि प्रत्येकं वेदसंयुतम् ॥

सन्धिभिर्द्वादशै(?)र्युक्तं महापीठपदं शुभम् ।
मध्ये चतुष्पदं धाता भुङ्क्ते तत्र विशेषतः ॥

महेन्द्रश्च तथादित्यो ग्रमा(हा ?)क्षतयमावपि ।
पुष्पदन्तश्च तोयेशो भल्लाटः सोम एव च ॥

प्रादक्षिण्यक्रमेणैव सूत्राभ्यां पदभोगिनः ।
ऐश्वरः सत्यकश्चैव अग्निर्गन्धर्व एव च ॥

नीलां(?) च दैत्यनाशं च जवनं च विधिं च च ।
एतैः(ते ?) क्रमेण देवाश्च कर्णार्धपदभोगिनः ॥

अल्पग्रामादियोग्यं तु एतत् षोडशदैवतम् ।

२.५१ ——— ——— ——— **उपपीठ-**

नि. २

प्राच्यान्तकैव षट्सूत्रं तावद्भिस्तिर्यग्भिर्युतम् ॥

तन्मध्ये हृदयं त्वेकं पञ्चषट्क च मेव च(?) ।
शूलं च लाङ्गलं कर्णं प्रत्येकं चाश्रयं भवेत् ॥

चतुष्कैर्वसुभिर्युक्तं षोडशैः सन्धिभिर्युतम् ।
एतैर्देवोपपीठाख्यं ग्रामादीनां शुभप्रदम् ॥

पदमेकं तु तन्मध्ये भक्तैः पत्तनि संभवेत्(?) ।
अर्यमा चैव सावित्री(?) भरतेन्द्रानुजस्तथा ॥

मित्राश्च रुद्रजश्चैव क्षन्ता वै पावकस्तथा ।
प्रागादि पदमैकैकम् ईशान्तं भुञ्जते सुराः ॥

पूर्वोक्तदेवताः सर्वे महेन्द्रादिक्रमयोगतः ।
बाह्य.....ये तत्र मेवे(के ?)कं भुञ्जते पदम् ॥

२.५२ ——— ——— ——— उत्तम-

नि. २

प्राच्यान्तं मुनिभिः सूत्रैः उदीच्यान्तं तथैव च ।
कर्णश्रो(सू ?)त्रसमायुक्तं षष्टकैकं(?) न मध्यमे ॥

षड्कैर्वसुभिर्युक्तं चतुष्कैः षोडशैर्युतम् ।
विंशद्भिः सन्धिभिर्युक्तं चतुर्भिर्लाङ्गलैर्युतम् ॥

तथा शूलैश्च संयुक्तमेतेषां चैवमुत्तमम् ।
ग्रामादीनां च सर्वेषां धाता मध्ये चतुष्पदम् ॥

अर्यमा भरतश्चैव हुत्वरः पृथिवीधरः ।
प्रागादिषु चतुर्दिक्षु प्रत्येकं च पदाधिपाः ॥

सर्वे तेऽग्रभवाश्चैव कोणे षड् ज्यादिषु क्रमात् ।
प्रत्येकं पदमेकैकं बहिरावरणे तथा ॥

अग्निभृङ्गो विलीनश्च शोषि......दित ।
ऐश्वरश्च भृशश्चाष्ट दक्षिणाग्रादि वै क्रमात् ॥

अर्धमध्यपदं भुङ्क्ते प्राच्यामुत्तरतो बुधः ।
जयेन्द्रश्च महेन्द्रश्च भास्करः सत्यकस्तथा ॥

वितथश्च गृहाक्षश्च यमो गन्धर्व एव च ।
सुग्रीवः पुष्पदन्तश्च वरुणश्चावीरतं तथा ॥

मुख्यो भल्लाटसोमौ च अर्गलश्चैव षोडश ।
प्रादक्षिण्यक्रमेणैव एकैकपदभोगिनः ॥

२.५३ —— —— —— **स्थण्डिल-**

नि. २

प्राच्यान्तं-वसूत्रैरुदीच्यान्तं तथैव च ।
चतुर्भिः पञ्चकैश्चैव तथा कर्णैश्च लाङ्गलैः ॥

शूलैश्चैव समायुक्तं षट्कैश्च वसुभिर्युतम् ।
चतुर्विंशचतुष्कैश्च तावद्भिः..सन्धिभिर्युतम् ॥

स्थण्डिलाख्यमिदं प्रोक्तं पदं सर्वत्र पूजितम् ।
धाता नवपदं मध्ये अर्यमा भरतस्तथा ॥

औ(जौ ?) त्वरोग्रधरश्चैव प्रागादित्रिपदाधिपाः ।
पावकादिषु कोणेषु सवितश्चैन्द्रजस्तथा ॥

रुद्रश्च चापजीश्चैव(?) अन्तरावरणे सुराः ।
ईश्वरश्च जयन्तश्च महेन्द्रो भास्करस्तथा ॥

सत्यश्चैव बलिशश्चैव(?) अग्निश्चैव वितथश्च वै ।
गृहक्षतो यमश्चैव गन्धर्वो मन्त्रिणश्च वै ॥

नीलश्च सुन्दरश्चैव पुष्पदन्तो जलेश्वरः ।
आसुरश्चैव शोषश्च जवनः सुवहस्तथा ॥

गलदण्डश्च सोमश्च अर्गलो दितिरेव च ।
बहिरावरणे देवाः ऐशानादि प्रदक्षिणम् ॥

प्रत्येकं पदमेकैकं भुञ्जतेऽनुक्रमेण वै ।

२.५४ ——— ——— ——— मण्डूक-

नि. २

प्राच्यान्तं नवसूत्राणि उदीच्यान्तं तथैव च ।

कर्णसूत्रसमायुक्तं मण्डूकाख्यमिदं पदम् ।
अष्टैकैकसमायुक्तं षट्कैर्द्वादशभिर्युतम् ॥

षट्त्रिंशत्पदमेवं स्यात् अष्टाविंशतिसन्धिभिः ।
चतुर्भिर्लाङ्गलैर्युक्तमथवा शूलसमन्वितम् ॥

मध्ये नवपदं धाता सूत्रसंधौ विशेषतः ।
अर्यमा भरतश्चैव मित्रजः पृथिवीधरः ॥

पूर्वादिमाकमा (?) योगं न प्रेक्षं षट्पदाधिपाः(?) ।
सविता चैव सावित्री चैन्द्रश्चेन्द्रजयस्तथा ॥

रुद्रो रुद्रजयश्चैव आपश्चैवापजस्तथा ।
आग्नेयादिषु कोणेषु प्रत्येकं द्विपदेश्वराः ॥

ऐश्वरः कालदश्चैव जयन्तेन्द्रं व्रयौ(?) तथा ।
आदित्यःसत्यकश्चैव भृशश्चैवान्तरिक्षकः ॥

अग्निः पुरुषोद्वहश्चैव वितथश्च गृहक्षतः ।
अच्युतश्च प्रजाधारः भृङ्गराजश्च कर्षकः ॥

नीलो दौवारिकश्चैव सुग्रीवश्च बृहद्बलः ।
गङ्गध्यक्षौ(?) सुरश्चैव शेषीरेग्नीश्वरस्तथा(?) ॥

उदानोशेषवं चैव(?) मुख्यं भल्लाटमेव च ।
सोमं चैवार्गलं चैव आदित्यं सूरिदैवतम् ॥

द्वात्रिंशद्देवताः सर्वे सूत्रस्य भुञ्जते पदम् ।

२.५५ ——— ——— ——— **परम-**

नि. २

पूर्वान्तं दशसूत्राणि उत्तरान्तं तथैव च ॥
कर्णसूत्र(च ?)बहिर्युक्तं चतुर्भिः पञ्चकैर्युतम् ।
षट्कैर्द्वादशभिर्युक्तं द्वात्रिंशत्सन्धिभिर्युतम् ॥

तत्राष्टचत्वारिंशद्भिः चतुष्कैर्वेदलाङ्गलैः ।
तथैव शूलसंयुक्तं ग्रामादीनां शुभप्रदम् ॥

परमं पदशायीति प्रोक्तं वास्तुकृतश्रमैः ।
पूर्वोक्तदेवताः सर्वे पदस्था भुञ्जतेऽत्र वै ॥

चरकी देवता चैव पूतना पापराक्षसी ।

आग्नावादि(आग्नेयाद्य?)ष्टकोणेषु बाह्ये तिष्ठति वास्तुनः ॥

आसनं चैव स्थानीयं देशीयो भव चण्डितम् ।
भद्रं महासनं चैव पद्मगर्भं तथैव च ॥

मन्त्रियुक्तं वृत्तभोगं ततः कर्णाष्टकं तथा ।
गणितं पातकं पश्चात् सूर्यं वैशस्तकं तथा ॥

सुसंहितं सुप्रतीकं तथा.......चैकशोचरौ(?) ।
विश्वेशं विपुलो भोगं विप्रतीकान्तमेव च ॥

पिशाचरक्ष्यं विप्र......सारं तथैव च ।
अङ्गकान्ते भृङ्गान्तौ च चतुर्विंशत्पदं भवेत् ॥

२.५६ ——— ——— ——— पदेश्वर-

नि. २

प्रकोशौ.......दीनामेकैकं सूत्रमेव च ।
एकादशमथारभ्य प्राङ्मुखं चाप्युदङ्मुखम् ॥

वर्धयेदाचतुस्त्रिंशदेकैकं सूत्रमेव- ।
द्वौ द्वौ भूत्वा क्रमेणैवमिन्द्राक्रान्तावसानकम् ॥

द्विशतं पञ्चविंशद्भिः नवाशीतिशतद्वयम् ।
त्रिशतं यष्टिभिर्युक्तं द्विचत्वारिंशितुर्मतम्(?) ॥

उत्तराणीन्यभिः(?) सार्धं पदं पञ्चदशं तथा ।
षट्शतं पञ्चविंशद्भिः युक्तं पदमतः परम् ॥

चतुस्त्रिंशदष्टत्रिंशद्द्विचत्वारिंशतिस्तथा ।
षट्चत्वारिंशच्च पदं पञ्चाशत्पदमेव च ॥

चतुस्त्रिंशत् पदं चैव भुञ्जते त्वर्यमादयः ।
सवित्राष्टसूत्रं च प्रत्येकं द्विपदेश्वराः ॥

अग्निर्नीलोऽथ वायुश्च ईशानकमशं तथा(?) ।
प्रत्येकं कोणमाश्रित्य पार्श्वयोरुभयोरपि ॥

गुणत्रयं तथाभूतं भूतं च गुणभूतके ।
एवं क्रमेण चत्वारः पदं भुङ्क्ते(?) विशेषतः ॥

आदित्यश्चन्द्रमाश्चैव वरुणः सोम एव च ।
प्रत्येकं पदमेकैकं त्रितयं पञ्चकं त्रयम् ॥

त्रयं पञ्चत्रयं चैव गुणं पञ्चत्रयं त्रयम् ।
मध्ये स्थितो भयश्चैव पार्श्वयोर्भुञ्जते सुराः ।
प्रत्यन्तं पदमाश्रित्य पर्जन्याद्यास्तु देवताः ॥

तत्त्वमेकं तथा तत्त्वम् एकं नेत्रद्वयं तथा ।
द्वयो गुणत्रयं चैव गुणदेवमयत्रयम् ॥

प्रत्येकं भुञ्जते देवाः क्रमशः कल्पयेद्बुधः ।
मर्दानुमर्दसंध्यादीन् यथायोगं विचिन्तयेत् ॥

२.५७ —— —— ब्राह्मादिपदकल्पन-

नि. ३

यावन्मानं भवेद्वास्तु पञ्चधा संविभज्य च ।
एकभागं बहिर्न्यासं वास्तुवैशवमुच्यते ॥

ब्राह्मदैविकमानुष्यपैशाचं तत्र वास्तुनि ।
कल्पितं यत् पदं बाह्ये पदं पैशाचमुच्यते ॥

पण्डितोक्तक्रमेणैव देवानर्च्य बलिं ददेत् ।

ज्ञा. १७.३०.

[अत्र ग्रामे एव प्रागुदक्सप्तदशभिः सूत्रैः पदान्युपकल्प्य षट्पञ्चाशद्द्विशतभागेषु द्रौहिणं षोडशकं वेदाधिकाशीतिपदं दैविकं मानुषं षण्णवतिकं पैशाचं षष्टिरित्येवं पदकल्पनं विधीयते इति विशेषः ।]

२.५८ ——— ग्रामकल्पन - मन्दिरनिर्माणोत्तरकालिक-

नि. १

मन्दिरं कल्पयेत्पूर्वं पश्चाद्ग्रामो भवेद्यदि ॥

विना वास्त्वङ्गदेवांश्च तेषां ऋद्धिद(?)संयुतम् ।
विन्यासं स्वस्तिकं पद्म(?) वा(?)स्तुशास्त्रक्रमेण वै ॥

देवमुद्दिश्य बद्धं वै ग्राममेवं प्रकल्पयेत् ।
दक्षिणे चोत्तरे चापि पूर्वं वाथ विधानतः ॥

प्रवेशेषु चतुर्दिक्षु शास्तारं विकटं तथा ।
बाह्येन मार्गपार्श्वे तु तत्र तत्र प्रकल्पयेत् ॥

२.५९ ——— गृहश्रेणीकल्पन - वीथीकल्पन-

ज्ञा. १५.२६

नाभिमहद्राजान्तराख्या वीथयश्चतस्रो भवन्ति । तत्र ब्राह्मदैवसमावृते

नाभिमहावीथीद्वारतिर्यग्युते राजान्तरवीथीक्रमेण भवन्ति ।

२.६० ——— वीथीकल्पन - महावीथ्यादिमान-

नि. ३

त्रिदण्डं पञ्चदण्डं वा सप्तदण्डमथापि वा ।
एवं दित(?) महावीथिः तदर्धं नाभिवीथिकम् ॥

तत्समं निर्गमद्वारं वीथ्यै सम्यगुदाहृतम् ।
केचिद्यथेष्टमिच्छन्ति- - - - - - - - - -॥

२.६१ ——— ——— नाभिरथ्यादि-

नि. ३

- - - - - - - - - - - -रथ्या चैव तु पञ्चधा ।
नाभिरथ्यासमा(महा ?)रथ्या राजरथ्यान्तकल्पिता ॥

ब्रह्मभागावृतं यत्तत् भागीरथ्येति(?) कथ्यते ।
मानुषावृतरथ्या या नाभिरथ्येति कथ्यते ।
सर्वमङ्गलरथ्ये(?) तु बाह्यरथ्येति चोच्यते ॥

बलिदानादिकं सर्वं तस्मिन्नेव समाचरेत् ।
अथवा नाभिरथ्यायां बलिदानं विधीयते ॥

पूर्वाग्रं वा भवेद्रथ्या राजवीथीति कथ्यते ।
तिर्यग्युद्ध - म(?) सर्वा अनन्तरा समुदाहृता ।
खण्डरथ्येति या प्रोक्ता सा वीथीत्यव(?)मुच्यते ॥

तत्र मर्दादिदोषान्तं त्याज्या सा वाल्पवीथिका ।

पादमर्धं तथा दण्डं तस्य मानमुदाहृतम् ॥

२.६२ ——— गृहनिर्माण - कर्षण-

ज्ञा. १८.३३

माघप्रोष्ठपदाषाढमार्गशीर्षान् ज्ञशुक्रास्तमयं च हित्वा रोहिण्यादित्यतिष्यानलवायव्योत्तराहस्तपैतृकश्रवणनैर्ऋतमैत्रवैश्वदेवाहिर्बुध्याश्वयुग्वासववारुणानि क्रमेणर्क्षचतुष्काणि प्रागाद्युत्तरान्तं स्थानदिग्गतभागेषु पूर्वोक्ततिथिवारेषु गुरुकाव्यसौम्योदये गृहीत्वा ऊर्ध्वानतहोरायां द्वात्रिंशद्दण्डमानेन हस्तमानेन वा यथालाभं प्रागुत्तरैशान्यायतां चतुष्पार्श्वे ओजसंख्यां चतुरश्रां समां पूवोक्तगुणसंपन्नां भूमिमाहृत्य तृणगुल्मलतादीनपोह्योक्तहलादिना कर्षयित्वा- - - - - -।

य. २.१०

[अत्र कर्षणकालादिकमनिर्दिश्य ग्रामे सभास्थाने कर्षयेत् इत्येवोच्यते इति विशेषः ।]

२.६३ ——— ——— ध्वजाद्यायनिर्णयपुरःसर-

ज्ञा. १८.३३,४

त्र्यंशं षोडशांशं वा उद्यानार्थं गृहीत्वा कर्त्रायामाष्टत्रिहस्तं तद्धस्तेनौजमाहृत्य विस्ताराहतायामं त्रिगुणीकृत्य वसुभिर्हृत्वा लब्धेषु ध्वजादिषु शुभयोगे वा आरभेत। ध्वजे अर्थवृद्धिः अजस्रपूजा धूमे हानिर्दुःखं व्याधिभयं सिंहे राजामात्यपुरोहितादीनां पूजा श्वाने कुलानपत्यत्वं वृषे धनधान्यापत्यवृद्धिः खरे दारानाचारत्वं गजेऽप्यैश्वर्यं ध्वांक्षे प्रेष्यप्रवृत्त्यादयः । तस्मात् ध्वजसिंहवृषनागान्यतममाहृत्य सप्तारत्निमात्रं

जलान्तं शिलान्तं घनान्तं वा खनित्वा मृदं व्यपोह्य सिकताभिः शौचदृढाभिः मृद्भिश्चापूर्य इभपादैर्मुसलैश्च समं दृढतरमुपकल्प्य संवत्सरं तदर्धं त्रिमासं वा तूष्णीं निधाय कालक्रमेण शालामारभेत ।

२.६४ —— —— पदकल्पन-

ज्ञा. १८.३४

पुरुषं वास्तुनः प्रागुत्तमाङ्गमुत्तानाननं ज्ञात्वा मर्माणि परिहृत्य कल्पयेत् । प्रागुदग्दशभिः सूत्रैर्भूमिं विभज्य एकाशीतिपदकल्पितशरीरे क्रमादीशानपर्जन्यजयन्तेन्द्रादित्यसत्यान्तरिक्षभृशाः प्रत्यङ्मुखाः अग्निपूषवितथगृहक्षतयमगन्धर्वभृङ्गराजर्षय इत्येते दक्षिणस्यामुदङ्मुखाः, निर्ऋतिदौवारिकसुग्रीवपुष्पदन्तवरुणासुरशोषरोगाश्चेति प्रतीच्यां प्राङ्मुखाः, वायुनागमुख्यभल्लाटसोमार्गलादितिसूरिदेवा दक्षिणास्याः उदीचीनस्थाश्च, एकपदभोजिनः द्वात्रिंशद्देवता भवन्ति । अर्यमा दण्डधरः पाशभृद्धनदः प्रागादिक्रमेण षाट्पदिकाः । सवितृसावित्रौ इन्द्रेन्द्राजौ रुद्ररुद्राजौ अपआपवत्सावित्येते आग्नेयादिषु कोणेषु द्विपदभोजिनः । तद्बाह्ये चरकी देवताः पूतना पापराक्षसी इत्येताश्चतस्रः कोणेषु द्विपदभोजिन्यः पिशाचाख्याः भवन्ति। एतेषां मध्ये ब्राह्मं पदमेकं परितः प्रागादीशानपर्यन्तं भृग्वङ्गिरोऽत्रिपुलहपुलस्त्यक्रतुमरीचिवसिष्ठानामित्येवं वास्त्वङ्गानि परिज्ञाय तिष्ठन्ति ।

२.६५ —— —— वास्तुविधिपूर्वक-

ज्ञा. १८.३३

अथातो गृहवास्तुविधानं व्याख्यास्यामः । गृहं हि प्राणिनां मूलं देहो मूलं शरीरिणाम् । विना देहं न कार्याणि । अतः सर्वकार्यकरं संपच्छुभोदयं विधियुतम् । विहीनविधिके वास्तुन्यसुरादयो वसन्ति । ऐहिकामुष्मिककर्माण्यस्य न सिद्धय(ध्य?)न्ति

२.६६ —— गृहश्रेणीनिर्माण-स्थान-

ज्ञा. १४.२५

चतुर्नवषोडशपञ्चविंशत्षट्त्रिंशदेकोनपञ्चाशच्चतुष्षष्टचैकाशीतिशतसंख्यान्यतमसंख्यया पदमाहृत्य पदमध्ये गृहाणां सूत्रपीडां परिहृत्य वीथ्यन्तरे गृहश्रेणिकामारभेत।

क्रि. २.७१

मानुषेऽभ्यन्तरेऽर्धांशे गृहश्रेणीं प्रकल्प्य च ।
(पैशाचे बहिरर्धे तु गृहवाटीं प्रकल्प्य च ।)
पैशाचे बहिरर्धे तु गृहनाडीं प्रकल्पयेत् ॥

वि. ३.११

वास्तुपुरुषमर्मसूत्रपातान् परिहृत्य देवतालयप्राकारसंश्लिष्टां गृहश्रेणीं कुर्वीत ।

२.६७ —— गृहनिर्माण - ब्राह्मणगृह - शालादिस्थान-

ज्ञा. १८.३४,५

अजे वृषे सूर्ये प्राक्प्रतीचीमुखीं सिंहे कुलीरे वा उदग्दक्षिणमुखीं परिहृत्य मीने मिथुने च सूर्ये सर्वमुखीमादित्याभिमुखमेवारभेत । प्राक्शालां यदि कुर्यात् भल्लाटे प्रथमेष्टकां पुष्पदन्ते द्वारं पर्जन्यदेशे जलमार्गं महेन्द्रसूर्यार्यमदेशे पर्यङ्कम् अन्तरिक्षे महानसं इन्द्रेन्द्राजस्थाने भोजनं गान्धर्वासुरदेशे वर्चःस्थानं वारुणसौम्ये कूपम् । याम्यायां यदि चेत् महेन्द्रे प्रथमेष्टकां भल्लाटे द्वारं पर्जन्ये वारिमार्गं गन्धर्वसुग्रीवे शयनं नागे वर्चःस्थानं भोजनमहानसकूपजलमार्गाणां पूर्ववत् । वारुण्यां यदि भवेत् गृहक्षते प्रथमेष्टकां महेन्द्रे द्वारमीशे पचनागारं

सुग्रीववरुणे शयनमन्यत् पूर्ववत् । उदीच्यां यदि भवेत् पुष्पदन्ते प्रथमेष्टकां गृहक्षते द्वारमन्यत् समम् । सर्वत्र प्रतिवंशं शयनं गृहस्य दक्षिणनयनालोकं विदिक्षु देवतागारं तत्प्रमुखे अग्न्यागारमागाराभिमुखं भृत्यानामतिथीनां दक्षिणतो नैर्ऋत्यामुत्करस्थानं पृष्ठतो विद्यास्थानं तत्रैव । एतद्ब्राह्मणानाम् ।

२.६८ —— —— क्षत्रियगृह- ——

ज्ञा. १८.३५

नृपाणां पुरस्य मध्ये पश्चिमे वा परिखाप्राकारयन्त्राट्टालकशोभितं चतुर्द्वारयुतं बहूपह्वरदुर्गारण्याढ्यमुदक्पश्चिमोद्भूतमन्यूनप्रक्लृप्ताभिषेकमण्डपं याम्यैकप्राग्विस्तृताङ्कणं हर्म्यप्रासादसंबाधं प्राङ्मुखमेवातिरम्यं विधिना कल्पयेत् । प्राच्यामायुधागारमाग्नेय्यां गोष्ठागारं याम्यायां भोजनस्थानं नैर्ऋत्यां धनसंग्रहं प्रतीच्यामन्तःपुरं सौम्यायामाथर्वणस्थानं वायव्यां रक्षिणामस्त्रशस्त्राणामैशान्यां याम्यायां वारणस्थानं वारुण्यां क्रीडास्थानं वायव्यां तुरगस्थानं वापीकूपतटाकानामैशान्यामङ्कणेऽभिमुखमार्यास्थानं पार्श्वे हेतिमुरत्यागारं(-?)तद्दक्षिणेऽधिकारनियुक्तानामाग्नेय्यां महानसम् । एवं त्रिप्राकारयुतं सुदृढं परिकल्प्य तदभिमुखमङ्गनावाटं प्राच्यां तदर्थासनं सर्वतः सैनिकानाम् ।

२.६९ —— —— वैश्यगृह- ——

ज्ञा. १९.३६

वैश्यानां क्रयविक्रयागारं प्रत्यङ्मुखे दक्षिणे भोजनस्थानं बाह्ये दक्षिणे गोधनस्थानं तत्पश्चिमे महिषाणाम् । अन्यद्विप्रसमम् ।

२.७० ——— ——— शूद्रगृह- ———

ज्ञा. १९.३६

शूद्राणां प्रमुखे कृषिद्रव्यपरिग्रहमैशान्यामतिथिस्थानम् । अन्यद्वैश्यसमम् ।

२.७१ ——— ——— सूतिगृहस्थान-

ज्ञा. १९.३६

सर्वेषां* नैर्ऋते अरिष्टभल्लातकनिम्बकल्पितं सूतिगृहम् ।

२.७२ ——— ——— गर्भागारस्थान-

ज्ञा. १९.३६

ऐशान्येन्द्रादित्ययमाग्नेयनैर्ऋतानामन्यतमस्थापितं गर्भागारं भोगैश्वर्यप्रदं गृहक्षतयमगन्धर्वान्यतमे धनधान्यविवृद्धिदमसुरपुष्पदन्तभल्लाटवारुणे भोगैश्वर्ययुतम् । अधन्यमतिसंक्षिप्तमतिविस्तीर्णमर्थदम् । द्विहस्तादिद्विगुणोच्छ्रयमत्युच्छ्रितमतिनीचगोपिघटितपार्श्वं चातिशोकावहम् । वंशानुचरणं वंशानुगतद्वारमुपर्यनुगतद्वारं द्वारास्राविजलमार्गमसमानं निन्दितानुक्तद्रुमकल्पितं च नाचरेत् ।

---

*ब्राह्मणक्षत्रियवैश्यशूद्राणाम् ।

२.७३ —— —— देवागारकल्पन-

ज्ञा. १९.३६

सूत्रानुगतं प्रतिवंशभोजं स्थूणमुपकल्प्य ब्राह्मं नवपदं परिहृत्य सूत्रानुगतभित्तिकं चतुःशालं त्रिशालं द्विशालं वा एतल्लक्षणसंपन्नं गर्भयुतं प्रकल्प्योक्तदेशे देवागारमुपर्यनुगतमुन्नतं रम्यं मनोरमं शुद्धं कृत्वा- - - - - -।

२.७४ —— —— —— आवश्यकता-

ज्ञा. १९.३७

*अन्यथा आत्मघाती भवति । विष्णुपूजाविहीनं यद्वेश्म तत्पक्कणैः समम् । तद्विप्रमुख्यैर्न प्रवेश्यम् । तदधिपेन नासितव्यं न संभाष्यम् । तस्माद्देवं प्रतिष्ठाप्याराधयेदिति विज्ञायते ।

२.७५ —— गृहार्चन - बिम्ब - उपादानद्रव्य-

ज्ञा. १९.३७

तस्मात् सर्वप्रयत्नेन देवीभ्यां सार्धं विष्णुं भगवन्तं सुवर्णरजतताम्राणामन्यतमेनः षडङ्गुलादहीनमुपकल्प्य यथाविभवमाराध्य तत्प्रमुखेऽग्निं विधानेन हुत्वैवाश्नीयात्।

---

*गृहे विधिवत् भगवदाराधनाकरणे

२.७६ ——— ——— विष्णवादिप्रतिष्ठापन-

ज्ञा. १९.३६

तस्मिन्[*] पीठानि परिकल्प्य मध्ये देवीभ्यामृषिभ्यां देवेशं सर्वजगद्बीजं विष्णुं सर्वदेवमयं सर्वार्थसाधकं भगवन्तं प्रतिष्ठाप्य तस्योत्तरपार्श्वे ब्रह्माणं सावित्र्या सार्धं तदुत्तरे गुहवक्रतुण्डौ देवस्य दक्षिणे पार्श्वे दुर्गां सरस्वतीमुमामिन्द्रं शशिनं सूर्यं च संस्थाप्य त्रिकालं द्विकालमेककालं वा अर्चयेत् । एते च पूजिता यस्य सद्मन्यत्रैव सर्वकल्याणसम्पत् ।

२.७७ ——— ——— ब्राह्मणाराध्यदेवता-

ज्ञा. १९.३६

एतेष्वपि[**] द्विजो नित्यं विष्णुं भगवन्तं ब्रह्माणं रविं स्कन्दं सरस्वतीं चार्चयेत् ।

२.७८ ——— ——— क्षत्रियाराध्यदेवता-

ज्ञा. १९.३६

क्षत्रियस्त्वार्यां विघ्नं रविं विष्णुं रुद्रम् ।

---

[*] गृहे देवागारे ॥

[**] विष्णवादिषु ।

२.७९ —— —— वैश्याराध्यदेवता-

ज्ञा. १९.३६

वैश्यः कुबेरं दुर्गां श्रियं सरस्वतीं च ।

२.८० —— —— शूद्राराध्यदेवता-

ज्ञा. १९.३६

शूद्रश्च द्विजं नित्यं विष्णुं भगवन्तं चन्द्रमिन्द्रं विनायकं यत्नतः पूजयेत् ।

२.८१ —— वास्तुविन्यासविपर्यासनिषेध-

वि. ३.१२

अनुगतकर्मण्यगर्भदैवतं वास्तु परितो वर्धयति समं, नैव विन्यासभेदः क्लृप्तवास्तुविपर्यासो राजराष्ट्रग्रामयजमानानामाशु विनाशाय भवति ।

२.८२ —— ग्रामादिगर्भन्यासप्रशंसा-

खि. ५.८३-५

यत्रैव स्थापयेद्गर्भं तत्र संपत्करं भवेत् ।
ग्रामशान्तिकरं चैव वेदानामपि बृंहणम् ॥

क्षेत्राभिवृद्धिरधिका धनधान्याभिवर्धनम् ।
(संततीनां कुलस्यापि यानवाहनसंपदाम् ।

पत्नीभृत्यमनुष्याणां पशूनामृद्धिमादिशेत् ॥)
तस्मात् सर्वप्रयत्नेन स्थापयेद्गर्भभाजनम् ॥
स्थानगर्भं विना यत्र क्षेत्रं तत्तु विनश्यति ।

ज्ञा. १६.२७,३०

सगर्भा पृथिवी सूते विगर्भा सर्वनाशिनी ।
- - - - - - - - - - - - - - - - ॥

एवं प्रतिष्ठिता भूमिः धनधान्यसमृद्धिदा ।
सर्वसंपत्करा पुण्या सफला च भविष्यति ॥

विगर्भा च सशल्या च विनाशाय भविष्यति ।

नि. ७

२.८३ —— गर्भन्यास - स्थापकलक्षण-

ज्ञा. १६. २७,३०

निनीय रात्रिशेषं पुनः प्रभाते धर्मात्मा- - - - - - - - स्नानविधानेन स्नातं सर्वलक्षणसंपन्नं मनोवाक्कायकर्मभिर्निर्मलं सुपुष्टाङ्गं सुरूपसंपन्नं विद्याधर्मविशारदं विष्णुभक्तिपुरःसरं वेदतत्त्वार्थदर्शिनं दैवपैतृकयोर्निश्चलं पत्न्यपत्यसंयुतमदीनमानसमेकं स्थापकमानम्य अलङ्कृत्य पृथिवी गर्भजननी स्थापको जनकः तस्मात् तत्प्रसादात् समृद्धिरिति ज्ञात्वा सम्यक् समारभेत । विशुद्धेन द्विजेनानुतापयुक्तेनैश्वर्यवृद्धेन स्थापितं गर्भमैहिकामुष्मिकशुभदम् । अन्येन स्थापितं जारगर्भमिवोभयोः विनाशाय भवति । एवं ज्ञात्वा गर्भं प्रतिष्ठाप्य प्रवेशयेदिति विज्ञायते ।

२.८४ —— —— गर्भभाजनकल्पन-

ज्ञा. १६. २७

पञ्चदशाधिकद्विशतपलं तदर्धं वा ताम्रमाहृत्याष्टाङ्गुलायतमष्टयमो(वो?)च्छ्रयषड्यवघनाधारं चतुर्यवघनभित्ति नवभागाभ्यन्तरं भाजनं कृत्वा द्व्यङ्गुलोच्छ्रयं तद्विस्तारसमं पिधानं न्यूनद्वियवं घनं त्वधोभित्त्याननम् उभयसंश्लिष्टं चतुरश्रं खण्डस्फुटितवर्जितं गर्भभाजनं तदर्धं वा कृत्वा ।

२.८५ —— —— मुहूर्त-

ज्ञा. १६. २७,८

उक्ततिथिवारऋक्षांशकलग्नेषु स्थिरराश्यंशके स्थिते चन्द्रे अनुकूलराशावुच्चगेषु शुभेक्षितेषु ग्रहेषु आयुर्ग्रहविवर्जिते स्थिरराशौ शर्वर्यां गर्भं संस्थापयेत् ।- - - - - -दिवैव निर्मले द्रव्याणि भाजने क्षिप्त्वा रात्रावेव निधापयेत् । दिवा विनश्यति ।

२.८६ —— —— अङ्कुरार्पणपूर्वक-

ज्ञा. १६. २७

स्थापनदिवसात् पूर्वं अङ्कुरानर्पयित्वा- - - - -.- - - ।

२.८७ —— —— शान्तिहोम-

ज्ञा. १६. २७

पूर्वेद्युरेव पूर्वाह्णे पञ्चगव्यैः फेलां प्रक्षाल्य जले अधिवास्य मण्डपे प्रपायां वालंकृत्य धान्योपरि अण्डजाद्यास्तृते संस्थाप्याघोष्य वास्तुहोमं हुत्वा पुण्याहं प्रवाच्याशीर्वाग्भिः गद्यतालाद्यैः स्तुत्वा अंन्यैश्चाघोष्य पुनः धान्यराशौ प्रतिष्ठाप्य भगवन्तं ब्रह्मेश्वरौ चाभ्यर्च्य दिक्षु दिक्पालकगजनागानभ्यर्च्य हवींषि निवेद्य शान्तिं जुहुयात् ।

२.८८ —— —— गर्भभाजन - द्रव्यप्रक्षेप-

ज्ञा. १६. २८

गर्भभाजनमादाय नवाम्बरोपरि निधाय धूपदीपादिभिरलङ्कृत्य आत्मसूक्तं जप्त्वा - प्रणम्य देवेशमनुज्ञाप्य श्रीसूक्तेन फे*लामभिमृश्य फेलामध्यपदे माहेन्द्रमण्डलं पृथिव्यक्षरसमायुक्तं संस्थाप्योपरि परिवारणे लकारान्तर्गतमादिबीजं संस्थाप्य ओङ्कारेणावेष्ट्य अष्टशतं प्रणवमावर्त्य तत् त्रीण्येवेति मन्त्रेण सामुद्रमृत्तिकां क्षिप्त्वा गजदन्तवल्मीकवृषविषाणकुलीरावास आ(सां?)रामकेदारवननदीपर्वतजातां क्रमेणेन्द्रादीशानान्तं क्षिप्त्वा मध्ये मृणालकुमुदोत्पलकह्लारकशेरून् चतुर्दिक्षु प्लक्षोदुम्बराश्वत्थवटत्वचः कोणेषु च इदं ब्रह्मेत्यर्पयित्वा सामुद्रनादेयकौप्यतटाकह्रादसारसपाल्वलौपकुल्यतौषारोदकं क्रमेण ये ते शतमित्यास्राव्य रत्नधातुबीजानि मन्त्रेण क्षिपेत् । दण्डकमण्डलुस्रुग्यज्ञभाण्डोपवीतादीनि विप्रवृद्धिनिमित्तानि आयुधध्वजादीनि क्षत्रवृद्धये तुलातोदादीनि वैश्यवृद्धये शूद्राणां हलादीन् सौवर्णमयान् मध्यपदे गन्धद्वारामिति क्षिप्त्वा- - - - - - -।

---

*गर्भभाजनम् ।

खि. ५.४६,७

ग्रामगर्भं यदि स्याच्चेत्तप्तचामीकरं चरेत् ।
श्रीरूपं कूर्मरूपं च मेघरूपं तथैव च ॥

गजं च गरुडं चैव वृषभं हंसमेव च ।
शङ्खचक्रासिशार्ङ्गांश्च शरं खेटकमेव च ॥

२.८९ —— —— होमपूर्वक-

ज्ञा. १६. २८

पूर्ववदाराध्यौपासनाग्नावाघारं हुत्वा यद्देवादीन् ब्राह्मं वैष्णवं रौद्रं लोकपालाधिदैवत्यमींकाराद्यन्तं हुत्वा विष्णवे वेधसे रुद्रायादित्येभ्यः सर्वभूतेभ्यः अश्विभ्यां वसुभ्यो दिग्गजेभ्यः समुद्रेभ्यो द्वीपेभ्यो लोकेभ्यः सर्वभूतेभ्यः स्वाहेति व्याहृत्यन्तं हुत्वा गर्भरूपं निधापयेत् ।

२.९० —— ग्राम - गर्भन्यासस्थान-

स. ६.३८

ग्रामगर्भं न्यसेच्चेत्तु मध्ये विष्ण्वालये तथा ।
पश्चिमालयदेशे वा ग्रामगर्भं निधापयेत् ।
श्रीदेव्यास्त्वालये वाथ सभास्थानेऽथ वा न्यसेत् ॥

२.९१ ——— ग्रामादि- ———

खि. ५.१-३, ६-१०

अतः परं प्रवक्ष्यामि गर्भप्रक्षेपणं परम् ।
राष्ट्रं ग्रामं च नगरं पत्तनं चैव खर्वटम् ॥

कुटिका दण्डकं चैव सेनामुखमतः परम् ।
सभास्थानं सेतुबन्धः शाला चाराम एव च ॥

सस्यक्षेत्रं तटाकश्च नद्यास्तीरं तथैव च ।
एतेषु स्थानमुद्दिष्टमिति होवाच पूर्वजः ॥

- - - - - - - - - - - - - - -

राष्ट्रमुद्दिश्य यत्नेन अग्रहारेषु संन्यसेत् ॥

ग्राममुद्दिश्य तद्ग्रामे ब्रह्मस्थाने समर्पयेत् ।
नगरे पश्चिमे प्रोक्तं पत्तने चैव मध्यतः ॥

खर्वटे पश्चिमे प्रोक्तं पत्तने चैव मध्यतः ।
दण्डके मध्यमे प्रोक्तं मध्ये सेनामुखे न्यसेत् ॥

सभास्थाने तथा मध्ये सेतुबन्धे तु मध्यतः ।
शालायां मध्यमे प्रोक्तमारामे चापि मध्यतः ॥

सस्यक्षेत्रे मनोरम्ये तटाके चापि मध्यतः ।
नद्यास्तीरे प्रकुर्वीत यथायोग्यं यथाविधि ॥

नि. ७

परिवारालयान्मध्ये गोपुरद्वारदक्षिणे ।
निर्गमं दक्षिणे वापि प्रवेशं दक्षिणेऽथवा ॥

गोपुराणां च सर्वेषामथाभ्यन्तरमुच्यते ।
स्थलान्ते संन्यसेद्गर्भं मण्डपे स्नपनालये ॥

मध्ये च पचनस्थाने महेन्द्रे च गृहक्षते ।
पुष्पदन्ते च भल्लाटे देवदेवस्य मन्दिरे ॥

श्रीस्थाने च गृहस्थाने सभास्थाने विशेषतः ।
तटाके ग्रामपार्श्वस्थे सस्यक्षेत्रे तथैव च ॥

चैत्यवृक्षस्य मूले वा गर्भस्थानं प्रचक्षते ।

२.९२ —— नगरादि- ——

ज्ञा. १६.२९

नगरादीनां देवगारे चैत्यवृक्षे द्वारवामे वा बालानामभिवृद्ध्यर्थं वाहनायुधस्थाने वर्णवारिवृद्ध्यर्थं विद्युत्पर्जन्यरूपादीन् सुवर्णेन कृत्वा पञ्चगव्यैः मृण्म(न्म?)ये वा भाण्डे निधाय तटाके सोमौषधिधान्यसमायुक्तं पञ्चगव्यं पञ्चरत्नं वा कैदारिके स्थापयेत् । रत्नबीजधातुसमायुक्तं गृहेषु स्थापयेत् ।

२.९३ —— ग्रामादि - गर्भन्यासप्रकार-

ज्ञा. १६.२८,९

ह्लादाम्लानमालानिर्वाणदीपपूर्णकुम्भरत्नगव्यमयानि वस्तूनि गर्भास्येषु कुम्भप्रदीपान् ग्रामाग्रहारयोः शेषान् नगर्यादीनां गव्यरत्नमयौ क्षेत्रारामतटाकोदवसितेषु बलाकादीन् तत्तद्रूपान् तप्तहाटकमयं यवमात्रं तदर्धं चतुरङ्गुलं वा कृत्वा ब्रह्म जज्ञानं, इदं विष्णुरिति जप्त्वा मध्यपदे निधापयेत् । तदुपरि रत्नानि क्षिप्त्वा पिधाय विष्णुस्त्वां रक्षतु इत्यभिमृश्य अहतवाससा आवेष्ट्य पुण्याहं स्वस्तिमृद्धिं च

वाचयित्वा अलङ्कृत्य निधाय प्रदोषे भूतयक्षपिशाचनागब्रह्मराक्षसयोगिनीढा (डा ?)किनीप्रभृतीनां चतुष्पथचैत्यवृक्षश्मशानारामेषु गृहमातृशास्त्रादीनां स्थाने चरुलाजापूपसक्तुसमन्वितं माषमुद्गहरिद्रामिश्रितं पुष्पाद्भिः तत्तत्स्थाने बलिं क्षिप्त्वा रात्रावेव ध्रुवे लग्ने ब्रह्मस्थाने द्वारे महेन्द्रे गृहक्षते भल्लाटे पुष्पदन्ते वा विष्णुशिवस्कन्दानामालये वा ग्रामवृद्ध्यै स्थानमाहृत्य ललाटबाहुनाभिसमं तदर्धविस्तारं खनित्वा स्थलगर्भं पीठगर्भं व्यपोह्य पिशुननास्तिकजडामित्रशठहैतुकादीन् विहाय यथा ते नैव जानीयुः तथा कर्तव्यमिति ज्ञात्वा पञ्चगव्यैः प्रोक्ष्य मुहूर्ते समनुप्राप्ते ब्राह्मं वैष्णवं हुत्वा देवदेवं जगन्नाथं विष्णुं ध्यात्वा शुक्लमाल्याम्बरधरः श्वेतानुलेपनालङ्कृतः शुद्धाशयः तत्पात्रं मेदिनी देवीति हस्ताभ्याममभिमन्त्र्य नमो वराहायेत्युक्त्वा आत्मानं वाराहरूपं वसुंधरोद्धारं ध्यात्वा इदं विष्णुरिति तत्र गर्भं निधाय देवीदं गर्भमाधत्स्वेति देवीं वसुंधरां स्मृत्वा मेदिनी देवीत्यादिभिर्मंत्रैः पञ्चभिः सूक्तेन चाभिमन्त्र्य आ त्वा हर्षमिति स्थापयेत् ।

खि. ५.८०,१

[अत्र 'सुधया पूरयित्वा तु शिल्पिना सुदृढं चरेत्' इत्यधिकमिति
विशेषः ।]

२.९४ —— गर्भन्यास - दक्षिणादान-

ज्ञा. १६.२९

सुवर्णमेदिनीरत्नपशुधान्यादीन् दक्षिणां दत्त्वा अन्नाद्यदानं च स्वशक्तितः कृत्वा

- - - - - - -

२.९५ —— —— प्रदीपिकास्थापन-

ज्ञा १६.२९

श्वेतपद्मबिसतन्तुकृतवर्तिकां द्व्यङ्गुलपरिणाहां षोडशाङ्गुलोज्ज्वलितप्रदीपिकां षोडशप्रस्थसंपूर्णघृतपात्रप्रतिष्ठितां सम्यग्विधाय गर्भस्य दक्षिणपार्श्वे श्रीसूक्तेन निधायाभ्यर्च्य सुदृढं सुस्थितं मृद्भिः सम्यक् प्रकल्प्य आरभेत ।

२.९६ ——— ग्राम - वृक्षप्ररोहण - प्रशस्तवृक्ष-

ज्ञा १७.३२

न्यग्रोधोदुम्बराश्वत्थप्लक्षान् प्रागादिषु चैत्यवृक्षान् प्ररोहयेत् । तत्स्पृष्टानिलप्रवेशात् समृद्धिर्भवति । अन्यथा न समृद्धिः । वारुणश्लेष्मातकनिम्बशाल्मलीनाग्नेयादिषु कोणेषु प्ररोहयेत् ।

२.९७ ——— ——— ——— निषिद्धवृक्ष-

ज्ञा. १७ .३२

शाल्मलीकिंशुककार्पासक्षीरिकण्टकिवृक्षान् ग्रामाभ्यन्तरे न प्ररोहयेत् शून्यत्वात् तेषाम् ।

२.९८ ——— ग्रामादि - आलयकल्पन-

अ .२

ग्रामे च नगरे चैव राजधान्यां च पत्तने ॥
खर्वटे कुटिके ग्रामे दण्डके चाग्रहारके ।

खि . २. ४७,८
वा. १

नि.१

ग्रामादौ च नगर्यां च पत्तने च पुरेऽपि च ।
खर्वटे च विशेषेण - - - - - - - - - - -।

ज्ञा॰ २१.४०

२.९९ ——— नदीतीरादि- ———

खि.२.४८-५०,७३,४

- - - - - - - - - - - -नदीतीरे मनोरमे ।
तटाकस्याथ तीरे वा वेलायां सागरस्य वा ॥

शैलाग्रे शैलपार्श्वे वा वनपार्श्वे वनान्तरे ।
स्थानं यत्रैव विस्तीर्णं तत्रापि च मनोरमे ॥

युक्तं स्थानं समालोक्य गृह्णीयाच्छार्ङ्गधन्वने ।
- - - - - - - - - - - - - - - - - ॥

नदीतीरेऽद्रिदेशे वा भूमिर्यत्र मनोहरा ।
द्वारं यत्रैव रम्यं स्यादालयं तत्र कारयेत् ॥

एवं भूमिं प्रकल्प्यैव विमानारम्भमाचरेत् ।

स. २.५२,३
ज्ञा. २१.४०
अ. २
नि .१
[अत्र पुण्यस्थाने अन्यस्मिन् पुण्यदेशे वा इति चाधिकम् ।]

वा .१.

अरण्ये पर्वताग्रे च शैलमूले तथैव च ।
नद्यास्तीरेऽब्धिपार्श्वे वा वन उद्यानकेऽपि वा ॥

एतेष्वालयदेशेषु यथार्हं तत्र कारयेत् ।

वि.२.८

वननद्यद्रिसमुद्रपार्श्वे अन्यत्र तटाकारामसमीपे विविक्तदेशे वा ।

२.१०० —— ग्रामबाह्यविप्रावास - देवस्थापन-

वि .२.८

ग्रामाद्बाह्येऽपि यत्र विप्रैर्वस्तव्यं तत्रैव मध्ये दिशासु विदिशासु च देवं देवीभ्यां सहितं वा संस्थापयेत् ।

२.१०१ —— ग्रामादि -विष्णुप्रतिष्ठापन - प्रशस्तस्थान-

वि. २.७; ३.१०,१

ग्रामादिष्वेवं विधाय चतुष्षष्टिपदमेकाशीतिपदं षट्पञ्चाशदुत्तरद्विशतपदं वा कृत्वा तन्मध्यं ब्रह्मभागं चतुर्धा कृत्वा तद्वायव्यांशे पश्चिमे पूर्वे वा मध्यसूत्रादुत्तरे दक्षिणे वा तत्सूत्रं देवस्य दक्षिणपादपार्श्वं प्रासादप्राकाराणां भित्तिं वा समाश्रितं एवं संकल्प्य देवेशं विष्णुं नवषट्पञ्चमूर्तिविधानेन प्रतिष्ठाप्य अर्चयेत् । - - - - - - - - ग्रामादिषु षट्पञ्चाशद्द्विशतपदेषु पैशाचं परिहृत्यैव देवेशं संस्थापयेत्, अन्येषु पश्चिमे पैशाचबाह्ये विष्णोरालयं कुर्यात् ।

२.१०२ ——— ——— ——— निषिद्धस्थान-

वि.३.१०

प्रतिलोमान्तरालव्रात्यावासेषु नैवं विष्णुं प्रतिष्ठापयेत् ।

२.१०३ ——— ग्राम - आलयस्थान-

खि .२.५३.४ , ६४-७

ग्राममध्ये हरेः स्थानमुत्तमं समुदाहृतम् ॥

पश्चिमे मध्यमं विद्यादधमं चैन्द्र उच्यते ।
सहस्रादधिके ग्रामे विप्राणां तत्र मध्यमे ॥

- - - - - - - - - - - - - - - -॥

- - - - - - - - -विमानं परिकल्पयेत् ।
अथवा कल्पयेद्विद्वान् गृहभागं विसृज्य च ॥

पैशाचं संव्यपोह्यैव पश्चिमे सुमनोरमे ।
ग्रामं सम्यक् प्रकल्प्यैव यथावित्तानुसारतः ॥

ब्रह्मस्थाने तु कुर्याच्च चतुर्भागं विभज्य च ।
वायव्ये तु चतुर्भागे किञ्चिद्वायव्यमाश्रिते ॥

पञ्चमूर्तिक्रमेणैव विमानं परिकल्पयेत् ।

स.२.३२-४

[अत्र विमानं प्राङ्मुखं कुर्यादिति विशेषः ।]

ज्ञा.१७.३०

क्रि. २.६६-९
[अत्र समूर्तार्चनाधिकरणवत् ।]

नि. १

ग्रामः पूर्वं भवेद्यत्र वास्त्वङ्गैः सह कल्पयेत् ।
ग्राममध्ये पदे स्थानं सहस्रादधिके तु वै ॥

पञ्चमूर्तिक्रमेणैव कल्पयेद्देवमव्ययम् ।

२.१०४ —— नगरादि- ——

स. २.४९-५२

पश्चिमे मध्यमे कुर्यात् यत्नाद्देवालयं हरेः ।
शक्तो भक्त्या यदीच्छेच्चेत् अन्यत्रालयमाचरेत् ॥

एवं भक्त्यैव राजा च राजधानौ(न्यां?) च कारयेत् ।
नगरे पश्चिमे कुर्यात् पत्तने खर्वटेऽपि वा ॥

दण्डके कुटिके वापि विमानं पश्चिमे तथा ।
अन्यदेशेषु कुर्याच्चेत् पञ्चमूर्तीर्विना चरेत् ॥

कारयेदन्यदिग्भागे पञ्चमूर्तिविवर्जितम् ।

ज्ञा. २१.४१

नगरादिषु पश्चिमे प्राङ्मुखं विमानं संकल्प्य अप्सरोभिः प्रकल्पयेत् ।

विविक्तग्रामपुण्यदेशेषु ताभिः सार्धं न कारयेत् ।
अ. २

नगरे पश्चिमे प्रोक्तः(क्तं?) विष्णोरालयमुत्तमम् ।
ऐन्द्रे तु मध्यमं विद्यात् सौम्ये कन्यसमुच्यते ॥

- - - - - - - - - - - - - - - - - - -।

पत्तने च तथा कुर्यात्- - - - - - - - - - -

वास्तुमध्ये महाविष्णुं शयानं संप्रकल्पयेत् ।
योगवीरौ विना कुर्यात् भोगमेव प्रकल्पयेत् ॥

वारुणे चालयं विष्णोः स्थानकं वा सुखासनम् ।

खि .२.७१-३

[अत्र शूद्रावासेषु पश्चिमे इति, नगरे दक्षिणे चोत्तरेऽपि वा इति चाधिकम् ।]

नि. १

- - - - - - - - -नगर्यां पश्चिमे वरम् ।
ऐन्द्रे मध्यममित्युक्तं सौम्ये चाधममुच्यते ॥

विष्णोरालयमेवं स्यात् योगं च विरहं विना ।
वास्त्वन्तरे तु सर्वत्र भोगमार्गेण कल्पयेत् ॥

वि. ३.१०

तत्र दण्डके पश्चिमे प्राङ्मुखम् उत्तरे दक्षिणामुखं वा, स्वस्तिकादिषु [पश्चिमे] पैशाचाभ्यन्तरे बाह्ये वा, ब्रह्मसूत्रादुत्तरे, श्रीवत्सादिषु ब्रह्मपदवायव्ये पञ्चमूर्तिविधानेन

देवेशं विष्णुं संस्थापयेत्, दिशासु विदिशासु च यथा दक्षिणदृष्ट्या ग्रामं पश्येत्, तथा ग्रामाभ्यन्तरे ग्रामाधिक्यमुखं च संस्थापयेत्, तद्धरिदृष्टिः शुभदा, हरपृष्ठश्च शुभदः ।

२.१०५ —— ग्राम - हरादिदेवतान्तरालयस्थान-

ज्ञा. १७.३०-२

ऐशान्यां बाह्ये तद्ग्रामपराङ्मुखं देवं हरं स्थापयेत्, हरपृष्ठं शुभदमिति । इन्द्रेशानयोरन्तरे सूर्यं इन्द्राग्न्योर्मध्ये विघ्नं, यमाग्न्योर्मध्ये दुर्गां, नैर्ऋते शास्तारं, वरुणवाय्वोरन्तरे स्कन्दं, ग्रामाद्बहिरुदगीशानान्तरे ज्येष्ठामैशान्यां भद्रकालीं संस्थाप्यार्चयेत् । एषामर्चनया च ग्रामशान्तिर्भवति । - ।

स्कन्दं चन्द्रं च विघ्नं च भगवन्तं विना देवमानुषयोर्भागे नः संस्थापयेत्। देवतासामान्यच्छाया शुभदा ।

अ. २

ऐन्द्रपावकयोर्मध्ये भास्करालयमुच्यते ।
विश्वे(घ्ने ?)शस्य तु चाग्नेय्यां आग्नेय्यामस्य चान्तरे ॥

यमनैर्ऋतयोर्मध्ये दुर्गायाश्च प्रकल्पनम् ।
ग्रामाद्बाह्ये च नैर्ऋत्यां शास्तारं संप्रकल्पयेत् ॥

वायुसोमेशयोर्मध्ये भद्रकाल्यालयं बहिः ।
एवं देवालयान् कुर्यात् ग्रामाणां च प्रकल्पने ॥

क्रि. २.७०,१

चतुःषष्टिविभागे तु बहिरावरणे तथा ।
भद्रकालीं हरं चापि शास्तारं बहिरंशके ॥

बहिर्मुखान् क्रमात्कुर्यात् सर्वेऽन्ये तद्बहिः स्थिताः ।

नि. १

वास्त्वङ्गालयदेशे तु कल्पयेद्विधिकोविदः ।
इन्द्रपावकयोर्मध्ये प्रासादं भास्करस्य तु ।
आग्नेय्यां वक्रतुण्डस्य भारती च यमान्तरे ॥

याम्यनैर्ऋतयोर्मध्ये निद्रायाः स्थानमुच्यते ।
र- - - - - ग्रामबाह्ये तु शास्तारं कल्पयेद्बुधः ॥

वायुवारुणयोर्मध्ये हस्तानन्त(?)मुंदाहृतम् ।
विरिञ्चिसोमयोर्मध्ये त्र्यंशेन्निधनाय(?) च ॥

एकांशमुत्तरे हित्वा कल्पयेत्पच(व ?)नालयम् ।
ग्राममुत्तरतो बाह्ये ज्येष्ठायाश्चैव कल्पयेत् ॥

ऐशान्यामीश्वरावासं भद्रकाल्यालय बहिः ।
ईशानसोमयोर्मध्ये कुर्यात् तद्विधिकोविदः ॥

प्र. ३.२७

य. २.१९-२१

हरस्य धाम वैशान्ये बाह्ये तत्प्राङ्मुखं चरेत् ।
स्थानेऽग्नेर्गेहमर्कस्य पश्चिमाभिमुखं तथा ॥

सौम्ये तत्प्राङ्मुखां दुर्गां पैशाचे षण्मुखं यमे ।
विघ्नेशस्य तु वायव्यां मातृकोष्ठं बहिश्चरेत् ॥

- - - - - - - - - - - - - - - -

तथैव पञ्चवीरांश्च वास्तुबाह्ये समर्चयेत् ॥

२.१०६ —— ग्रामादि- ——

वि. २.८

ऐशान्यां शङ्करभवनं प्राङ्मुखं, वारुणे देवेशं प्राङ्मुखमासीनं स्थितं वा, आदित्यांशे भास्करालयं प्रत्यङ्मुखं, याम्ये विन्ध्यवासिनीं प्राङ्मुखीं, भूतेशे विघ्नेशं, सुग्रीवे षण्मुखं, अदितौ मातृकोष्टं पराङ्मुखं, जयन्ते दौवारिके वा कृष्णस्यालयं, पुष्पदन्ते शोषणे वा राघवस्यालयं, महेन्द्रे महामत्स्यं, सत्यके कूर्मस्यालयं, नैर्ऋते वाराहं, जवने वा अन्तरिक्षे वा नारसिंहं, (रौहिणे) नागे वामनं त्रिविक्रमं च, गन्धर्वे बलभद्रं, मुख्ये परशुपाणिं, सूरिदेवे कल्किनं, सोमे शयानं, गृहक्षते दैविकं वासुदेवं, वितथे मानुषं वासुदेवं, उष्णशालादिमूर्तिं भृङ्गराजे, ग्रामाद्बाह्ये वा पञ्चवीराणां स्थानम् ।

२.१०७ —— नगर्यादि- ——

नि. १

राजवेश्म तथा देवी लक्ष्मीर्निद्रा सरस्वती ।
इन्द्राग्न्योरन्तरे चैव आदित्यस्थानमुच्यते ॥

यमपावकयोर्मध्ये वाग्देव्या(वी?)वा सरस्वती ।
यमनैर्ऋतयोर्मध्ये आर्हतस्थानमुच्यते ॥

कर्णसूत्रस्य वामे तु शास्तारं वास्तुबाह्यके ।
अन(नि?)लं(ल?)तोयेशयोर्मध्ये निद्रायाः स्थानमुच्यते ॥

अथवा कारयेदिद्वान् वायुस्थाने प्रकल्पयेत् ।
वारुणनींल(णानिल?)योर्मध्ये स्कन्दालयमुदाहृतम् ।

वायुसोमान्तरे चैव बाह्ये ज्येष्ठां प्रकल्पयेत् ।
सोमळैशालयोर्मध्ये बाह्ये काळ्यालयो भवेत् ॥

सोमरुद्रान्तरे चैव कल्पयेदमितं बुधः ।
ऐशान्यामीश्वरावासं कल्पयेत्तद्विलक्षणम् ॥

औशनेन्द्रान्तरे चैव विघ्नेशस्थानमुच्यते ।
कल्पयेद्वै नगर्यादौ - - - - - - - - - -॥
- - - - - - - - - - - - - -पत्तनादेर्विशेषतः ॥

स्थानं पूर्वोक्तवद्विष्णोः पूर्वस्माद्भास्करालयम् ।
याम्ये गणपतेश्चैव यव(म?)यक्षेशयोरपि ॥

मध्ये दुर्गालयं प्रोक्तं नैर्ऋत्यां वा विधीयते ।
शास्तारं वास्तुबाह्ये च वरुणानिलयोरपि ॥

कल्पयेत् षण्मुखस्थानं सौम्ये ज्येष्ठां प्रकल्पयेत् ।
ऐशान्यसोमयोर्मध्ये भद्रकाल्यालयं बहिः ॥
ऐशान्यमीश्वरावासं कल्पयेन्मन्त्रवित्तमः ।
शूद्राणां वास्तुनः पश्चात् ब्राह्मणैर्वेदपारगैः ॥

अ. २

ऐन्द्रे तु भास्करस्थानं याम्ये गणपति(ते?)र्भवेत् ।
यमनैर्ऋतयोर्मध्ये दुर्गायाश्च प्रकल्पनम् ॥

सौम्ये ज्येष्ठागृहं कुर्यात् ऐशान्यामीश्वरालयम् ।
ऐन्द्रपावकयोर्मध्ये बौद्धस्यालयमुच्यते ॥

आर्हते(अर्हतो?) नैर्ऋते स्थानं शास्तारं वास्तुबाह्यतः ।
ऐशानसोमयोर्मध्ये भद्रकाल्यालयं बहिः ॥

- - - - - - - - - - - - - राजधान्यां विशेषतः ।
राजागारस्थितां देवीं दुर्गां लक्ष्मीं सरस्वतीम् ॥

सर्वसंपत्करा लक्ष्मीर्दुर्गा सा गृहदेवता ।
सरस्वती च मेधायै गृहदेवा तथा भवेत् ॥

वरुणोदानयोर्मध्ये श्रीदेव्यालयमुच्यते ।
विध्यन्तरं गते स्थाप्य नृपालयसमीपतः ॥

इन्द्रपावकयोर्मध्ये आदित्यालय उच्यते ।
यमपावकयोर्मध्ये अग्नेरालय उच्यते ॥

यमनैर्ऋतयोर्मध्ये बौद्धस्यालय उच्यते ।
वास्तुबाह्ये च नैर्ऋत्यां शास्तारं संप्रकल्पयेत् ॥

नैर्ऋते अर्हतो स्थानं कण्ठसूत्रस्य वामतः ।
नीलवारुणयोर्मध्ये दुर्गायाः स्थानमुच्यते ॥

वरुणोदानयोर्मध्ये भद्रकाल्यालयो बहिः ।
ईशानसोमयोर्मध्ये स्थापयेन्मकरध्वजम् ॥

ऐशान्यमीश्वरस्थानं बाह्ये वास्तु प्रतिष्ठितम् ।
ईशानेन्द्रान्तरे स्थाप्य विघ्नेशस्य तमालयम् ॥

सौम्ये दृष्टिः (सौम्यदृष्टिः?) शुभं कुर्यात् रौद्रदृष्टिर्विनाशकृत् ।
हरेर्लक्ष्मीसरस्वत्या दुर्गादृष्टिः शुभं भवेत् ॥

सौम्ये देवालयं कुर्यात् दक्षिणादृष्टिमारभेत् ।
विष्णुश्रियां सरस्वत्यां दुर्गां वै भास्करं तथा ॥

वास्त्वन्तरगतान् सर्वान् ज्येष्ठां चैव विशेषतः ।

२.१०८ —— आलयकल्पन-स्थानविपर्यासनिषेध-

नि. १.

नभश्च भद्रकाली च शास्ता वास्त्वन्तरे विना ॥
ग्रामादौ स्थापिते सर्वे तदग्रा(?)स्थापयेद्धरिम् ।
पूजयेद्विधिना सम्यक् न च वास्तु कदाचन ॥

स्थापिते वै चलं चेत्तु स्वस्थाने स्थापयेद्बुधः ।
एवमुक्तक्रमेणैव कल्पयेद्देवमन्दिरम् ॥

वास्तुकल्पविपर्यासः अज्ञानात् संभवेद्यदि ।
तत्कर्तुरपि नाशः स्यात् तद्ग्रामस्य विनाशनम् ॥

तस्मात् सर्वप्रयत्नेन विपर्यासं न चाचरेत् ।
पूर्वोक्तेन क्रमेणैव स्वस्थाने कल्पयेद्बुधः ॥

२.१०९ —— ग्राम-आलय-बिम्बावस्थानविशेष-

वि. २.८

ग्राममध्ये बाह्ये दिक्षु विदिक्षु वा सर्वत्र स्थितमासीनं शयानं यानकं वा ध्रुवकौतुकं ध्रुवार्चा वा ग्रामप्रेक्षमेव कारयेत् ।

नि. १

सहस्राणां विहीने तु स्थानकं शयानासनम् ॥
रामकृष्णौ च वा तत्र कर्तुरिच्छानुसारतः ।

य. २.१८

उत्तरे मध्यवीथ्यां तद्वारुणे हरिमन्दिरम् ।
स्थानकं वासनं चाथ दक्षिणे वा यथोचितम् ॥

२.११० —— —— आलयकल्पन - मुहूर्त-

खि. ३.६७,८
विभज्य राशीन् मेषादीन् ग्रामे तत्र क्रमेण वै ॥
स्थिरराशौ प्रकुर्वीत विष्णोरालयमुत्तमम् ।

२.१११ —— —— —— नक्षत्रादिन्यासपूर्वक-

नि. ३

ब्राह्मं तत्र चतुर्थांशं विभज्य च विशेषतः ॥

ईशादिर्वानिलादिर्वा प्रादक्षिण्यक्रमेण वै ।
सभागोष्ठापणाश्चैव कल्पयेद्विष्णुमन्दिरम् ॥

प्रागन्तं वसुभिः सूत्रैः पञ्चभिस्तिर्यग्युतम् ।
अष्टाविंशत् पदं कल्प्य नक्षत्राणि च संन्यसेत् ॥

पश्चिमाद्युत्तरे तत्र प्रागन्तं त्वाश्र(ष्ट्र?)मेव च ।
- - - - - -दि पौष्णा(षा?)न्तं नक्षत्राणि न्यसेत् क्रमात् ॥

अश्व- - - -दि (अश्विन्यादि) धनिष्ठान्तं सहितद्धृक्षमायुतम्(?) ।

उत्तराद्युत्तराद्यन्तं च प्रागादिक्रमयोगतः ॥

चतुर्विंशत्पदेष्वेतय(?)न्यसेत्तद्विचक्षणः ।
श्रवणे देवदेवस्य मन्दिरं श्रेष्ठमुच्यते ॥

अभिजित्तारके वापि दिक्षु दिक्ष्वन्तरेषु च ।
विष्णोर्वास्तुषु सर्वत्र अन्यदृक्षपदेषु च ॥

कर्ता विधातुमिच्छेच्चेत् कल्पयेत न दोषकृत् ।

२.११२ ——— आलयनिर्माण-भूमि-वैष्णवी-

स. २.१२-४

तुलसीभिः समायुक्ता कुशैर्वापि समायुता ॥

क्षीरवृक्षवती चापि सपद्मसरसीयुता ।
प्रदक्षिणोदका वापि श्वेता वा पीतवर्णिनी ॥

प्रागुदक्प्रवणा वापि विष्णोर्भूमिः प्रकीर्तिता ।

खि. २.५१
नि. ४
वा.१

२.११३ ——— ——— ——— ब्राह्मी-

स. २.१८

पश्चिमे प्रवणा रक्ता ब्रह्मणः परिकीर्तिता ।

खि. २.५२

नि. ४
[अत्र पीता इति विशेषणमधिकम् इति विशेषः ।]

वा. १

२.११४ ——— ——— ——— रौद्री-

२.१८
दक्षिणे प्रवणा कृष्णा रुद्रस्य समुदाहृता ॥

खि. २.५२,३
नि. ४
वा. १

२.११५ ——— ——— ——— ब्राह्मण्यादि-

[illegible]. १.२३-६

अथ भूमिं परीक्ष्यैव पूर्वं कर्षणमारभेत् ॥

मोक्षदा ब्राह्मणी प्रोक्ता क्षत्रिया विजयप्रदा ।
पीता तु वैश्या कृष्णा तु शूद्रा भूमिरुदाहृता ॥

श्वेता तु ब्राह्मणी भूमिः रक्ता तु क्षत्रिया तथा ।
वैश्या तु धनदा भूमिः शूद्रा पुत्रसमृद्धिदा ॥

नि. ४

२.११६ ——— ——— ——— वर्ज्या-

प्र. १.२६

प्रतिलोमादिभिर्जुष्टां वल्मीकाढ्यां च वर्जयेत् ।

३. आलयनिर्माणप्रकरणम्

[१. आलयनिर्माणे अधिकृतो यजमानः, आचार्यवरणम्, शिल्प्याह्वानम्, अङ्कुरार्पणम्, भूपरीक्षाप्रकारः । २. कर्षणम्, बीजावापः । ३. मार्गभेदः बालालयकल्पनम्, बालालयप्रतिष्ठा । ४. वास्तुपूजनप्रकारः, निमित्तपरीक्षणम् । ५. आद्येष्टकान्यासः, दिङ्निर्णयः । ६. गर्भन्यासप्रकारः, गर्भन्यासफलम् । ७. शान्तिकादिविमानानि, तन्मानम्, देवयोग्यविमानानि, मानुषयोग्यविमानानि, ब्रह्मादिनिर्मितविमानानि, विमानोपादानद्रव्याणि, शिलादिन्यासः, अधिष्ठानादिषड्वर्गः, मुखमण्डपादिकल्पनम्, गर्भगृहकल्पनम्, विमानमानम्, विमानद्वारादिकल्पनम्, उत्तमोत्तमादिविमानानि, प्राग्द्वारादिविमानफलम् । ८. प्राकारकल्पनम्, प्रथमाद्यावरणकल्पनम् । ९.परिवारालयकल्पनम्, द्वारदेवादिकल्पनम्, महाभूतपीठकल्पनम् । १०. मण्डपकल्पनम्, श्रीवत्सादिमण्डपविशेषाः, आस्थानमण्डपादिकल्पनम्, तत्र पूजनीयाः देवताः, स्नानोदकादिस्थापनस्थानानि, तत्र पूजनीयाः देवताः । ११. प्रथमाद्यावरणेषु गोपुरकल्पनम् । १२. मूर्धेष्टकान्यासप्रकारः ।]

१. भूपरीक्षा

३.१.१. आलयनिर्माण - यजमान - अधिकृत-

स. १.४१-४

एतैश्च* विधिभिर्विष्णोरालयार्चनकर्मणि ॥

ब्राह्मणः क्षत्रियो वैश्यो यजमानत्वमर्हति ।
यदि शूद्रोऽनुलोमश्च कर्तुमिच्छेत्तु भक्तिमान् ॥

राजानं यजमानं हि कल्पयित्वारभेत् पुनः ।
तथा कर्ता तु शूद्रादिः समग्रं फलमाप्नुयात् ॥

सूतादिप्रतिलोमस्तु कर्तुं नार्हति किंचन ।

ज्ञा. २१.४०

नि. ४

[अत्र विष्णुभक्तिः, निश्चलमनस्त्वं, धनधान्यसमृद्धिः, औदार्यादयश्च यजमानगुणा निर्दिश्यन्त इति विशेषः ।]

३.१.२ —— भूपरीक्षा - आचार्यवरण-

स. २.१-९

अतः परं प्रवक्ष्यामि भूमेः सम्यक् परीक्षणम् ।
भूपरीक्षणकाले तु यजमानोऽथ भक्तिमान् ॥

आचार्यं वरयेत् पूर्वं सर्वकार्योपदेशकम् ।
वैखानसेन सूत्रेण निषेकादिक्रियान्वितम् ॥

---

* भृग्वाद्युक्तैः

विप्रं वेदविदां श्रेष्ठं नित्यस्वाध्यायसंयुतम् ।
शौचाचारसमायुक्तं भक्त्यध्यात्मगुणैर्युतम् ॥

तेन सूत्रविधानेन नित्यहोमसमन्वितम् ।
पत्न्यपत्ययुतं शान्तं नारायणपरायणम् ॥

आलयार्चाविधेर्मन्त्रान् प्रयोगं तदनुक्रमम् ।
प्रायश्चित्तं च वेत्तारं समाहूयाभिपूज्य च ॥

एतैर्गुणैः सुसंपन्नमाचार्यं वरयेद्वरम् ।
हीनातिरिक्तदीर्घाङ्गं कुब्जमन्धं च वामनम् ॥

क्षयापस्मारकुष्ठैश्च पापरोगैः समन्वितम् ।
क्रूरं मत्सरिणं षण्डं पाषण्डं बधिरं तथा ॥

उन्मादेन युतं स्तेनं नास्तिकं शौचवर्जितम् ।
विष्णुभक्तिविहीनं च चलचित्तं च वर्जयेत् ॥

आचार्यं वरयित्वैवं तेनोक्तं सर्वमाचरेत् ।
कर्मेदं मे कुरुष्वेति याचेताचार्यमादरात् ॥

ज्ञा. २१.३९

[अत्र शौचाचारादिसंपन्नान् विप्रानाहूय नमस्कृत्य तेष्वेकम् आचार्यं वरयेत् इति विशेषः ।]

क्रि. १. २२-५

[अत्र ऊहापोहविधानेन ध्वस्तसंशयमानसं स्नानशीलं धार्मिकमिति आचार्यविशेषणान्यधिकानि इति विशेषः ।]

खि. २.३८-४७

[अत्र काश्यपज्ञानकाण्डवत् ।]

नि. ४
य. २. १-३

वा. १

[अत्र पारंपर्यक्रमायातम् इति आचार्यविशेषणमाधिकं वर्तते इति विशेषः ।]

वि. १.५; २.५,६

[अत्र अर्चकपरिचारकस्थापकादीनृत्विजश्च आचार्येण सह वरयेत् इति विशेषः ।]

३.१.३ —— —— शिल्प्याह्वान-

वि. २.६

हर्म्यागारादिशिल्पिशास्त्रज्ञं लक्षणसंपन्नं शुद्धमरोगिणं कुशलं शिल्पिनम् आहूय- - - - - - ।

स. २.१०,१
खि. २.११५,६
नि. ४
य. २.३

३.१.४.० —— —— शिल्पिन् - त्रिविध - कुलालादि-

क्रि. २.१८,९

शिल्पिनः त्रिविधाः प्रोक्ताः तत्तत्कर्मोपजीविनः ॥
कुलालः तक्षकश्चैव तथा पारशवस्त्विति ।

३.१.४.१ ——— ——— ——— **कुलाल-**

क्रि. २.१९,२०

त्रैवस्तुकानि बेराणि शैलोर्ध्वे चित्रकर्म च ॥
सुधाकर्म विमानोर्ध्वे भित्तौ चित्रक्रियादिकम् ।
एवं कुलालकः कुर्यात् - - - - - - - -॥

३.१.४.२ ——— ——— ——— **तक्षक-**

क्रि. २.२१-३

- - - - - - -तक्षकः सर्वमेव तत् ।
लोहाश्मदारुबेराणि चाष्टबन्धादिकां क्रियाम् ॥
ग्रामादिवास्तुविन्यासं वर्णिनां गृहकर्म च ।
प्रासादमण्डपद्वारप्राकाराणां च कल्पनम् ॥
आचरेत् तक्षकः सर्वं कुर्युः शिल्पिन एव तत् ।
अन्यथा यदि स ग्रामो राजा राष्ट्रं च नश्यति ॥

३.१.४.३ ——— ——— ——— **पारशव-**

क्रि. २.२०,१

- - - - - - - - -पटाद्याभासकर्म यत् ॥
तत्तु पारशवः कुर्यात्- - - - - - - - - ।

३.१.५ —— —— शिल्पिकर्मसांकर्यफल-

वा. ४

यस्य धर्मस्य यः कर्ता तत्तत्कर्म समारभेत् ।
अन्येषां चेन्महादोषः तत्कर्ता नश्यति ध्रुवम् ॥
आचार्यस्यार्चकस्यैव तत्स्थानं तस्य नाशयेत् ।

३.१.६ —— —— काल-

वि. २.६

आचार्यो यजमानेन भूमिं सम्यंक् परीक्षयेत् । यथेष्टमासे शुक्लपक्षे, कृष्णपक्षे त्रिधाद्यके वा, कर्तुरनुकूलर्क्षे भूपरीक्षां कारयेत् ।

य. २.४

[अत्र चैत्रमासो निषिद्धः इति विशेषः ।]

३.१.७ —— —— अङ्कुरार्पण - प्रशस्तकाल-

क्रि. १.२६,५९,६२,३

तस्मात्तु* दिवसात् पूर्वं नवमे वाऽथ सप्तमे ।

---

* भूपरीक्षणात्

पञ्चमेऽहनि वा कुर्यात् तृतीये वाऽङ्कुरार्पणम् ॥
- - - - - - - - - - - - - - - - - - - -
- - - - - - - - - - - - - - - - - - - -
- - - - - - - - - - - - - - - - - - - -॥

पञ्चमेऽहन्ययुक्ते तु सद्यः कर्ता त्वरान्वितः ।
तृतीयेऽहनि वा तद्वदङ्कुरानर्पयेत् बुधः ॥

- - - - - - - - - - - - - - - - - - - -
- - - - - - - - - - - - - - - - - - - -॥

अङ्कुराणां तु सर्वेषां चन्द्रः प्रोक्तोऽधिदैवतम् ।
नैव प्रीणाति भगवान् अङ्कुरार्पणमह्नि चेत् ॥

तस्मात् सर्वप्रयत्नेन रात्रावेवाङ्कुरार्पणम् ।

य. २.५,६.

वैष्णवीं भूमिमासाद्य शुद्धिं कृत्वा यथाशुभम् ।
पूर्वेद्युरेव शर्वर्यामङ्कुरार्पणमारभेत् ॥

ब्राह्मणो यजमानश्चेत् तद्गृहे वाऽङ्कुरार्पणम् ।
अन्यश्चेत्तत्र वा कुर्यात् तत्र चेत् सद्य एव तु ॥

वि.२.६

३.१.८ ——— ——— ——— पददेवतार्चन-

क्रि. १.३५-४६

यजमानगृहे चापि चैशान्येष्वितरेषु वा ।
अन्यस्मिन् वा शुचौ देशे गृहे वा ग्रामकर्तृके ॥

चतुर्दिशं चतुर्हस्तं गोमयेनोपलिप्य च ।
प्रागन्तं चोत्तरान्तं च षट्सूत्राणि समर्पयेत् ॥

उपपीठे पदं चैकं ब्रह्मपीठाय कल्पयेत् ।
चर्यार्थं परितोऽष्टौ च पङ्क्त्यर्थं षोडशोत्तरे ॥

तत्पदान्तर्गतं पङ्क्त्यां ब्रह्मपीठं प्रकल्पयेत् ।
शेषादीनां तु पीठानि पङ्क्त्यामेव प्रकल्पयेत् ॥

मरीचिः पङ्क्तिबाह्येऽपि तेषां पीठानि चोक्तवान् ।
षडङ्गुलसमुत्सेधं षोडशाङ्गुलमायतम् ॥

त्रिवेदिसहितं कुर्यात षण्णां पीठं पृथक् पृथक् ।
यजमानगृहार्चायां स्थण्डिले वा तथैव च ॥

देवदेवं समभ्यर्च्य सप्तविंशतिविग्रहैः ।
पादौ प्रक्षाल्य चाचम्य मध्ये ब्रह्माणमर्चयेत् ॥

प्राग्द्वारादुत्तरे शेषं वक्रतुण्डं तु दक्षिणे ।
दक्षिणद्वारपूर्वे तु गरुडं च समर्चयेत् ॥

सुदर्शनं पश्चिमे च विधिनैव समर्चयेत् ।
पङ्क्तीशं पश्चिमद्वाराद्दक्षिणे च विधानतः ॥

उत्तरे भूतभर्तारम् अर्चयित्वा यथाविधि ।
पूर्वस्मिन्नुत्तरद्वारात् सोमं शान्तं समर्चयेत् ॥

ऐन्द्रादि च तथैशान्तं जयाद्यप्सरसोऽर्चयेत् ।
हविषा च समायुक्तं सर्वेषामुत्तमं पृथक् ॥

ब्रह्मादीनां तु षण्णां वै मध्यमं तत्प्रकीर्तितम् ।
ब्रह्मणश्च तु शेषाणां बलिरेवाधमं भवेत् ॥

(ब्रह्मा सोमश्च विघ्नेशः पङ्क्तीशः शान्तसोमकौ ।
षडेते मध्यमे प्रोक्ता देवा मध्यमपूजने ॥

बाह्येऽष्टाङ्गुलविस्तारे पीठे स्थण्डिल एवं वा ।
पूर्वोक्तमूर्तिभिर्मध्ये ब्रह्माणं प्राङ्मुखं यजेत् ॥

शेषादींश्च जयादींश्च पूर्वोक्ताभिश्च मूर्तिभिः ।
संपूज्य विधिना पश्चात् निवेदनमथाचरेत् ॥

हविर्निवेदयेत्तेभ्यः तदलाभे बलिं ददेत् ।
अपनीय तु निर्माल्यं प्रोक्षणैः प्रोक्षयेत् ततः ॥)

३.१.९ —— —— —— पात्राहरण-

क्रि. १-३२,३

तदर्थं पालिकाः कुम्भान् शरावानपि चाहरेत् ।
षोडश द्वादशाष्टौ वा चतुरश्च पृथक् पृथक् ॥
वर्णानां ब्राह्मणादीनां सर्वेषां चतुरोऽथ वा ।

३.१.१० —— —— पात्रस्थापनक्रम-

क्रि. १.४९ (प्रक्षिप्त-)

(ईशानादिषु कोणेषु पालिकाः स्थापयेत् बुधः ।
द्वारदक्षिणपार्श्वेषु छिद्रकुम्भांश्च विन्यसेत् ॥

द्वाराणां वामपार्श्वेषु शरावानथ विन्यसेत् ।
प्रधानाभिमुखद्वारं तद्वशात् परिकल्पयेत् ॥

चरस्थिरद्विदेहेषु पालिकादीन् यथाक्रमम् ।
मेषादिराशिवशतः स्थापयेदिति केचन ॥)

३.१.११ ——— ——— अङ्कुरार्पणप्रकार-

क्रि. १.४७-५५

मृद्भिर्वा सिकताभिर्वा पालिकादीन् प्रपूरयेत् ।
तेषां मध्ये कुशैर्वापि वेष्टयेत् तन्तुनाथ वा ॥

प्राङ्मुखः प्रयतो भूत्वा विन्यसेत्तु क्रमेण वै ।
ब्रह्मणः परितः पङ्क्त्यां गायत्रीं वैष्णवीं जपन् ॥

चिन्तयेन्मेदिनीं देवीं तां सर्वेषु समर्चयेत् ।
- - - - - - - - - - - - - - - - - - - -॥

(पालिकादिषु पात्रेषु मेदिनीमभिपूजयेत् ।
पुण्याहं स्वस्तिमृद्धिं च वाचयित्वा यथाक्रमम् ॥

प्रोक्षणैः प्रोक्षयेदेष पुण्याहो दैविकः स्मृतः ।)
सौवर्णे राजते पात्रे ताम्रे कांस्यमये तथा ।
उद्धृत्य तोयमग्नानि क्षीरप्रक्षालितानि वै ॥

बीजानि पूरयित्वा तु सोमं तत्र समर्चयेत् ।
तत्काले तूर्यघोषैश्च घोषयित्वा समाहितः ॥

परिधायाहतं वस्त्रं सोत्तरीयाङ्गुलीयकः ।
आचार्यो यजमानो वा वापयेदङ्कुरान् शुभान् ॥

सोमं राजानमित्युक्त्वा विष्णुसूक्तं च संजपन् ।
स्त्रीशूद्रौ कारयेतां चेत् ताभ्यां वापं न कारयेत् ॥

वारुणं मन्त्रमुच्चार्य जलसेकं च कारयेत् ।
नववस्त्रेण संछाद्य पुण्याहं वाचयेत्ततः ॥

जलेन सेचयेत् नित्यं दीपं च परिरक्षयेत् ।
यथाङ्कुरः सुसंपन्नः तथा यत्नेन रक्षयेत् ॥

३.१.१२ —— —— सद्योऽङ्कुरार्पण - निमित्त-

क्रि. १.२७,८

अथवा त्वरया युक्तः कुर्यात् तत्सद्य एव वा ।
अमावास्याव्यवहिते कुर्यात् सद्योऽङ्कुरार्पणम् ॥

संक्रमव्यवधानेऽपि सद्य एवेति केचन ।

३.१.१३ —— —— —— पात्राहरण-

क्रि. १.३३,४

नव* वा पञ्च वैकं वा सद्यःकालाङ्कुरार्पणे ॥
दिनसंख्याक्रमात् केचित् वदन्ति मुनिसत्तमाः ।

---

*पात्राणि इत्यध्याह्रियते ।

३.१.१४ ——— ——— सद्योऽङ्कुरार्पणप्रकार-

क्रि. १.६०,१

अशक्तः तण्डुलैः शुद्धैः सद्यश्चैव शुभाङ्कुरैः ।
पालिकादीन् प्रपूर्यैव पञ्चभिर्वाथ वर्णकैः ॥

अलंकृत्य च पद्माद्यैः पुष्पैर्वाऽऽपूर्य विन्यसेत् ।
अङ्कुरोक्तक्रियाः सर्वाः तैस्तैरेव समाचरेत् ॥

- - - - - - - - - - - - - - - - -।

(अर्पयेत् तण्डुलान् शुद्धान् सद्यःकालाङ्कुरार्पणे ।
गृह्णीयात् पालिकास्तत्र पञ्च सप्त नवापि वा ॥

ब्रह्मणोऽभिमुखे पङ्क्तौ परितो दिक्षु देवताः ।
तत्तद्दिगीशानभ्यर्च्य तत्तन्मन्त्रेण चार्पयेत् ॥

एष एव विशेषः स्यात् अन्यत्सर्वं खिलोक्तवत् ।)

३.१.१५ ——— ——— अङ्कुरैः निमित्तपरीक्षणम्

क्रि. १.५५-८

श्यामलाश्च तथा रक्ताः ये च तिर्यग्गता अपि ॥

अङ्कुराश्चाप्ररुढाश्च वर्जनीयाः प्रयत्नतः ।
श्यामेषु द्रव्यनाशः स्यात् रक्तेषु कलहो भवेत् ॥

तिर्यग्गतेषु रोगः स्यात् अप्ररूढेषु वै मृतिः ।
शुभं पीतेषु शुक्लेषु ऋजूर्ध्वगतिरोहिषु ॥

कर्तुः कारयितुश्चापि भवत्येव न संशयः ।
एवमेव क्रमेणैव मङ्गलायाङ्कुरार्पणम् ॥

३.१.१६ —— भूमि - ग्राह्या-

प्र. १.२७

उप्तं त्रिरात्रेऽङ्कुरति ग्राह्या भूमिस्तु नान्यथा ।

३.१.१७ —— —— अग्राह्या-

वि. २.७

नपुंसकवृक्षाढ्यां तुषकपालास्थिपाषाणशर्कराकीर्णां वल्मीकपतङ्गकूपभस्माङ्गारतुषकेशान्विताम् अन्त्यजातिभूयिष्ठां भूमिं त्यजेत् ।

३.१.१८ —— भूपरीक्षा - गमन-

क्रि. २.१-५
अङ्कुरार्पणकात् ऊर्ध्वं भूमिं सम्यक् परीक्षयेत् ।
यजमानगृहे देवं सप्तविंशतिविग्रहैः ॥

पूजयित्वा जपन्नग्रे प्रीयतां भगवानिति ।
प्रणम्य देवदेवेशं प्रसीदेत्यनुमान्य च ॥

वर्णजां कन्यकामेकाम् अलंकृत्य यथोचितम् ।
पायसं प्राशयित्वा तां श्वेतवस्त्रानुलेपनाम् ॥

पद्मदीपकरामग्रे गमयेत् सर्वमङ्गलैः ।
शाकुनं सूक्तमुच्चार्य स्वस्तिसूक्तं समुच्चरन् ॥

आचार्यो यजमानश्च तोयधारापुरःसरम् ।
गत्वा भूमिं समुद्दिष्टाम्- - - - - - -॥

खि. २.११६-२४

३.१.१९ ——— ——— ——— शुभनिमित्त-

स. २.१५-७

तत्र दक्षिणतः पार्श्वे गौली स्यात् सुस्वरा यदि ।
तत्र वृद्धिरविघ्नश्च देवस्यापि रतिर्भवेत् ॥

जयानन्दाहरेत्यादिशुभशब्दाः शुभावहाः ।
अन्यैः शुभैः निमित्तैश्च तद्वृद्धिमुपलक्षयेत् ॥

वा. १

३.१.२० ——— भूपरीक्षाप्रकार-

वि. २.६,७

चतुरश्रामायताश्रां वा प्रागानतामुत्तरानतां समां वा भूमिं शब्दस्पर्शरूपरसगन्धैः संपरीक्षयेत् । वीणावेणुदुन्दुभिगजतुरङ्गवेदाब्धिध्वनियुतां सुखस्पर्शां श्वेतपीतरक्तकृष्णवर्णाभां मधुराम्लतिक्तकटुकषायलवणरसां सुगन्धसंयुक्तां प्रदक्षिणोदवतीं क्षीरवृक्षतुलसीकुशदर्भविश्वामित्रविष्णुक्रान्तस्थलारविन्ददूर्वायुतां भूमिं सुमुहूर्ते गृहीत्वा आचार्यः प्राङ्मुख उदङ्मुखो वा नीत्वा यस्मिन् देशे जीवन्त इति जलं प्रक्षिप्य मेदिन्यादिना हस्ताभ्यां भूमिमभिमृशेत् । इदं विष्णु(ऋ १-२-७)रित्याहरेत् ।

क्रि. २.५,६

[अत्र तरुजन्तुगन्धवर्णाकृतिरसैः शकुनैश्च पृथ्वीं परीक्षेत इति विशेषः ।]

य. २.७

प्र. १.२८-३०
पद्मं कुम्भस्थतोयेन पूरिते तत्कृतावटे ॥

मुख्यं प्रदक्षिणावर्तमुदकं शान्तबुद्बुदम् ।
सव्यावर्तं तथा नेष्टम् उदकं बहुबुद्बुदम् ॥

उत्तानपद्मकं ग्राह्यं नत्वधोमुखपद्मकम् ।
एवं परीक्ष्य गृह्णीयात् पुण्याहमपि वाचयेत् ॥

३.१.२१ —— भूपरीक्षा - फलपरीक्षा-

वि. २.७

पूर्वोक्तदेशे हस्तायतविस्तारावगाढं खनित्वा तदवटे तां मृदं प्रक्षिपेत् । अधिके महतीं वृद्धिं, हीने हानिं, समे समं विद्यात् । अथान्यैर्निमित्तैः संलक्ष्य कार्यमारभेत् ।

स. २.१४,५
प्र. १.२६,७
य. २.८,९
वा. १

३.१.२२ —— भूमिशोधन- ——

क्रि. २.६-९

- - - - - - - - - - भूसूक्तं भूमिदैवतम् ॥

जपन् भूमिं गृहीत्वा तु शोभनां दोषवर्जिताम् ।
अपक्रामन्तु भूतानि देवताश्चासुरादयः ॥

विमानार्थं गृहीतेयं भूमिर्विष्णोरिति ब्रुवन् ।
उद्वास्य देवताः सर्वाः भूमिं तत्र समर्चयेत् ॥

विमानं शिल्पिना सार्धम् अग्रमण्डपसंयुतम् ।
निश्चित्यावरणैर्युक्तं तृणगुल्मादि शोधयेत् ॥

खि. २.१२४

२. कर्षणम्

३.२.१ आलयनिर्माण - कर्षणादिप्रतिष्ठान्तकार्य - काल

प्र. १.९-२४

सर्वारम्भे प्रशस्तं स्यात् आदित्ये चोत्तरे स्थिते ॥

अप्रशस्तमिति ख्यातं अयने दक्षिणे तथा ।
पुष्यमासादिषण्मासाः देवानां तु दिवा स्मृताः ॥

यस्मिन् मासे कृतं सर्वं विवृद्ध्यर्थमिति स्मृतम् ।
रात्रिराषाढमासादिः अयुक्तः सर्वकर्मसु ॥

प्रथमा च द्वितीया च तृतीया पञ्चमी तथा ।
षष्ठी च सप्तमी चापि दशम्येकादशी तथा ॥

त्रयोदशी च तिथयः पौर्णमासी शुभाः स्मृताः ।
प्राजापत्याश्वयुक्सौम्यतिष्यपौष्णत्रिरुत्तराः ॥

मैत्रादित्यमघास्वातीहस्ताश्च श्रवणं शुभाः ।
राशयः चरवर्ज्याः स्युः उभे तच्छोभनं स्थिरम् ॥

गुरुभार्गवसौम्येन्दुवाराः श्रेष्ठतमाः स्मृताः ।
एषामंशश्च द्रेक्काणहोरादर्शनमिष्यते ॥

एषामेवोदयं शस्तं तत्र सोमोदयं विना ।
क्रूरे च दुष्टनक्षत्रे व्याधिपीडां करोति हि ॥

सूर्यः सौरिश्च सौम्यश्च त्रिषडायस्थिताः शुभाः ।
तथैव लग्नगाः कुर्युः व्याधिशोकभयानि तु ॥

अष्टमस्थाः ग्रहाः सर्वे कर्तुः कुर्वन्ति दुःस्थितिम् ।
एकादशगताः सर्वे क्षेमारोग्यकराः स्मृताः ॥

भयकृद्भार्गवः प्रोक्तः द्विसप्तदशमास्थितः ।
द्विसप्तपञ्चनवमस्थितो जीवः सुशोभनः ॥

राष्ट्रस्य यजमानस्य महत्सौख्यं करोति हि ।
सूर्यवारे शुभो विष्णुहस्तपौष्णत्रिरुत्तराः ॥

मन्दवारे शुभौ प्रोक्तौ ब्राह्मस्वात्यौ च तत्तथा ।
वर्जयेद्बुधवारेण हस्तमाश्वयुजं तथा ॥

गुरुवारेण वर्ज्यौ तु तथा सौम्योत्तरावुभौ ।
श्रवणं चैव पुष्यं च शुक्रवारेण वर्जयेत् ॥

उत्तराषाढानक्षत्रं सोमवारे तु शोभनम् ।
द्वितीया बुधयुक्ता च षष्ठी जीवसमायुता ॥

सोम एकादशीयुक्तः करोति प्राणसंशयम् ।
पौष्णस्तु सप्तमीयुक्तः दहत्यग्निरिव प्रजाः ॥

काणस्थूणान्धनक्षत्रगुरुविष्टीर्विवर्जयेत् ।
भूमिकम्पे दिशां दाहे दुर्दिने चण्डमारुते ॥

अशनिध्वनियोगे च निन्दितं दिवसं स्मृतम् ।
अयने विषुवे चैव सन्त्याज्यं ग्रहणे तथा ॥

षडशीतिमुखे वापि कृतं वास्तु विनश्यति ।
एवं परीक्ष्य कर्तव्यं इच्छेच्चेच्छ्रेय आत्मनः ॥

कर्षणादिप्रतिष्ठान्तं कर्म कुर्याद्विचक्षणः ।

३.२.२ ——— कर्षण- ———

स. ३. १,२

अतः परं प्रवक्ष्यामि कर्षणे लक्षणं परम् ।
मासे चाश्वयुजे वापि कार्तिक्ये मासि वा पुनः ॥

यजमानानुकूलर्क्षे शुक्लपक्षे दिने शुभे ।
यत्र देवालयं कुर्यात्तां भूमिं कर्षयेच्छुभम् ॥

क्रि. २.२४,५

[अत्र आषाढादिषण्मासा निर्दिष्टा इति विशेषः ।]

खि. ३. १,२

[अत्र वृश्चिकमासमात्रं निर्दिष्टमिति विशेषः ।]

नि. ४

[अत्र खिलाधिकारवत् ।]

य. ३.१

[अत्र 'मासेष्विष्टदिने शुद्धे कर्तुश्चाप्यनुकूलके'- इत्यधिकमिति विशेषः ।]

वि. ३.१३

[अत्र मार्गशीर्षादिद्वादशमासेषु उद्दिष्टमासे शुक्लपक्षे यजमानानुकूलर्क्षे इति निर्दिश्यते इति विशेषः ।]

३.२.३ ——— ——— अङ्कुरार्पण - काल-

खि. ३.२,३

*तद्दिनान्नवमे पूर्वं सप्तमे पञ्चमेऽह्नि वा ॥
अङ्कुरार्पनयित्वा तु पुण्याहं वाचयेत् क्रमात् ।

स. ३.६
नि. ४
वा. २

३.२.४ ——— ——— युग - दारु - यजमानवर्णानुरोधेन

खि. ३.४,५

ब्राह्मणो यजमानश्चेत् युगं वैणवमाहरेत् ।
चम्पकं क्षत्रियस्योक्तं वैश्यः पुन्नागमाहरेत् ॥

शूद्र उदुम्बरमाहृत्य अवक्रं सम्यगाहरेत् ।

स. ३.७

[अत्र ब्राह्मणो यजमान इत्याद्यनुक्त्वा वेणुना चम्पकेन वा इति निर्दिष्टमिति विशेषः ।]

ज्ञा. २२.४१

[अत्र शूद्रस्य बर्बरो विहित इति विशेषः ।]

---

*कर्षणार्थं सङ्कल्पितात् दिनात् ।

अ. ३

[अत्र क्षत्रियस्य बिल्वकः शूद्रस्य बर्बरश्चेति विशेषः ।]

प्र. १.३२

[अत्र ब्राह्मणो यजमान इत्याद्यनुक्त्वा क्षीरवृक्षशमीवृक्षौ निर्दिष्टाविति विशेषः ।]

नि. ४

[अत्र क्षत्रियस्य बिल्वः शूद्रस्य निम्बश्चेति विशेषः ।]

वि. ३.१३

[अत्र ब्राह्मणो यजमान इत्याद्यनुक्त्वा वेणुमात्रं निर्दिष्टमिति विशेषः ।]

३.२.५ —— —— लाङ्गल- —— ——

खि. ३.५,६

ब्राह्मणानां हितार्थाय लाङ्गलं खादिरं हरेत् ॥
असनं क्षत्रियस्योक्तं वैश्यानां चम्पकं तथा ।
शूद्राणां चैव शैरीषं सारयुक्तमनिन्दितम् ॥

स. ३.७

[अत्र ब्राह्मणानामित्याद्यनुक्त्वा खदिरेणासनेन वा इति निर्दिष्टमिति विशेषः ।]

ज्ञा. २२.४१

अ. ३

[अत्र वैश्यस्यार्जुनो निदिष्ट इति विशेषः ।]

नि. ४

[अत्र गिरिजं वनजमिति विशेषणद्वयं निर्दिष्टं, चम्पकस्थाने अर्जुनो निर्दिष्टश्चेति विशेषः ।]

प्र. १.३२

[अत्र समूर्तार्चनाधिकरणवत् ।]

वि. ३.१३

[अत्र ब्राह्मणानामित्याद्यनुक्त्वा शिरीषमात्रं निर्दिष्टमिति विशेषः ।]

३.२.६ ——— ——— हलादिनिर्माण - दार्वाहरण-

अ. ३

गिरिजं वा वनस्थं वा तीरस्थं वा समाहरेत् ।
अग्रं पादं विदित्वा तु मुखं पृष्ठं तथैव च ।
यन्मुखो देवतावासः तन्मुखं मुखमाहरेत् ॥

वृक्षस्य परितश्चैव तृणगुल्मं व्यपोह्य च ।
वृक्षस्य दक्षिणे भागे स्थित्वा चैवोत्तरामुखः ।
वृक्षाधिपं समभ्यर्च्य पुष्पगन्धादिभिः क्रमात् ॥

वृक्षाधिपं तु तुहिणं विष्णुभक्तं गदाधरम् ।

इत्येवमर्चयेद्विद्वान् चतुर्मूर्तिविधानतः ॥

वृक्षस्य परितः कृत्वा इन्द्रादीन् सम्यगर्चयेत् ।
बलिं प्रक्षिप्य तत्काले बलिं सम्यग्व्यपोह्य च ॥

तत्काले परशुं गृह्य छेदनं गुरुराचरेत् ।
प्रागादिषु चतुर्दिक्षु रुद्रमन्येति चोच्चरन् ॥

पश्चात्तक्षकमाहूय छेदयित्वा शनैः शनैः ।
प्रागग्रं चोत्तराग्रं वा वृक्षस्य पतनं भवेत् ॥

त्वगादीन् संव्यपोह्यैव सारयुक्तं सुसंग्रहेत् ।
शिरसा धारयन् गत्वा देवागारं प्रवेशयेत् ॥

ऐशान्ये चोत्तरे वापि मण्डलान्युपलिप्य च ।
तद्दारुं विन्यसेत्तत्र शिल्पिना कारयेत्क्रमात् ॥

ज्ञा. २२.४१

क्रि. २.२६-४०

[अत्र वृक्षमूले कर्तव्यानि देवतार्चनबलिदानहोमादीनि विस्तरेण निर्दिश्यन्ते इति विशेषः ।]

खि. ३.७-१५.
नि. ४

३.२.७ —— —— हलादिमान-

खि. ३. १५-८

हलायामं पञ्चतालं क्षिणिर्द्वादशतालयुक् ॥

युगं द्वादशतालं च नाहं वै विंशदङ्गुलम् ।
चतुस्तालमृषिं गृह्य प्रादेशमपवीरकम् ॥

षट्प्रादेशं प्रतोदं स्याद्धनं युक्त्या प्रगृह्य च ।
द्विप्रादेशं च हुलिकं मुकुलाकृतिमाचरेत् ॥

अष्टाश्रं तस्य मूलं च शेषं युक्त्यैव कारयेत् ।

स. ३.६-८

ज्ञा. २२. ४१,२

[अत्र क्षिणिरित्यस्य क्षिणिय इति संज्ञान्तरमिति, युगं नवतालायतमिति, अपवीरकप्रतोदहुलिकानां प्रमाणं, हुलिकाकृतिश्च न निर्दिश्यते इति च विशेषः ।]

अ. ३
नि. ४

य. ३. ३,४

[अत्र अपवीरकहुलिकयोः निर्देशो नास्ति इति विशेषः ।]

वि. ३.१३

[अत्र युगं द्विषट्प्रादेशं, क्षिणियं पञ्चतालं, हलं चतुस्तालं, ऋषिं पञ्चप्रादेशं, प्रतोदमङ्गुलपरिणाहं च कारयेदिति निर्दिश्यते इति विशेषः]

३.२.८ ——— ——— पाश - यजमानवर्णानुरोधेन

खि. ३. २१,२

ब्राह्मणो यजमानश्चेत् पाशं मौञ्जीमयं हरेत् ।

क्षत्रियो धातकीवाल्कं वैश्यः कैतकमाहरेत् ॥

शूद्रो मौञ्जीमयं गृह्य त्रिवृतं सम्यगाहरेत् ।

अ. ३

[अत्र क्षत्रियस्य केतकीरज्जुः, वैश्यस्य धातकीरज्जुः शूद्रस्य कदम्बरज्जुरिति च विशेषः ।]

नि. ४

[अत्र क्षत्रियस्य केतकीरज्जुः, शूद्रस्य चन्दचम्बरः (चन्दनरज्जुः ?) इति च विशेषः ।]

३.२.९ ——— ——— यष्टि-

खि. ३.२२

वैणवीं यष्टिमाहृत्य आयसीं वा समाहरेत् ।

अ. ३

नि. ४

[अत्र यष्टिं पूर्वेद्युरधिवासयेत् इति विशेषः ।]

३.२.१० ——— ——— वृषभ-यजमानवर्णानुरोधेन

ज्ञा. २२.१२

श्वेतरक्तहरितासितान् वर्णक्रमेण सौम्यवर्णवीर्यबलोपेतौ यवसोदकपुष्टाङ्गौ साण्डौ खुरसंस्पर्शिलाङ्गूलौ समखुरशृङ्गावहीनाङ्गौ बलीवर्दावाहृत्य मृष्टयवसजलतृणादीन्

निवेद्य क्ष्य (पोषयित्वा ?)- - - - - - -बलीवर्दौ रूप्यशृङ्गखुरावयवस्थाप्य - - - - - - - - ।

स. ३.१६

[अत्र श्वेतौ रक्तौ वा अरोगिणौ स्वर्णशृङ्गौ रौप्यखुरौ इति बलीवर्दविशेषणान्यधिकानीति विशेषः ।]

अ. ३

[अत्र वैश्यस्य पीतः, शूद्रस्य कृष्णश्वेति विशेषः ।]

खि. ३. १८-२०

[अत्र वैश्यस्य पीतौ, शूद्रस्य मिश्रवर्णौ कृष्णौ वेति, स्वर्णशृङ्गौ रौप्यखुरं इति विशेषणद्वयमधिकं चेति विशेषः ।]

नि. ४
[अत्र अर्चनाधिकारवत् ।]

प्र. १

[अत्र कपिलौ अरोगौ इति विशेषणद्वयमधिकमिति विशेषः ।]

य. ३.५
[अत्र श्वेतवर्णमात्रं निर्दिष्टमिति विशेषः ।]

वा.२

[अत्र श्वेतरक्तवर्णौ निर्दिष्टाविति विशेषः ।]

वि. ३.१४

[अत्र श्वेतौ रक्तौ कृष्णौ वा इति, न मिश्रवर्णौ अरोगिणौ निरुष्टौ इति विशेषणान्यधिकानीति च विशेषः ।]

३.२.११ —— —— भूमिप्रवेश-

स. ३. ८-१३

यजमानो गुरुश्चापि स्नात्वा स्नानविधानतः ॥

यजमानगृहे देवमावाह्याभ्यर्चयेत् क्रमात् ।
विष्वक्सेनं च वीशं च चक्रं चापि समर्चयेत् ॥

हविः सम्यङ्निवेद्यैव भक्त्या देवं प्रणम्य च ।
पायसान्नं समश्नीयादृत्विग्भिः सह बान्धवैः ॥

रूपयौवनसंपन्नां वस्त्रैराभरणैरपि ।
श्वेतगन्धैश्च माल्यैश्च दर्शनीयामलङ्कृताम् ॥

स्त्रियमाहूय तद्धस्ते दक्षिणे कमलं नवम् ।
वामे दीपं च दत्त्वैनामग्रतो गमयेत् स्त्रियम् ॥

तूर्यघोषयुतं गत्वा तां भूमिं संप्रविश्य च ।

ज्ञा. २२.४२

[अत्र प्रमुखे वीशं, दक्षिणे चक्रं, वामे हरं च संस्थाप्य सप्तविंशतिविग्रहैरर्चनं अनपायिवीशामितानाम् अर्चनं, पुण्याहवाचनं, कर्षकालंकरणं, वीशामितानपायिनां रथाद्यन्यतमैरग्रे नयनं, तेषां पृष्ठतः ऋत्विजां गमनं च निर्दिष्टमिति विशेषः ।]

नि. ४

[अत्र यजमानकर्तृकमाचार्यपूजनमधिकमिति विशेषः ।]

य. ३.६

वि. ३.१४

[अत्र वैष्णवैः सह भूमिं प्रविशेदिति विशेषः ।]

३.२.१२ ——— ——— देवदेवार्चन-

क्रि. २,४१-३

प्राच्यामुदीच्यां वा स्थित्वा प्रागादिषु सुविन्यसेत् ।
बलिं दत्त्वा समाहृत्य गन्धोदैरभिषिच्य च ॥

देवदेवं समभ्यर्चेत् सप्तविंशतिविग्रहैः ।
चतुर्विंशतिमायामं चतुरश्रं सुलक्षणम् ॥

षडङ्गुलसमुत्सेधं रत्निमात्रं त्रिमेखलम् ।
अन्यत्रापि समुद्दिष्टं पीठमेवं तथार्चने ॥

नि. ४

३.२.१३ ——— ——— बलिदान - पूर्वरात्रि-

ज्ञा. २२.४२

प्रतिसरं बद्ध्वा कर्षकमलंकृत्य रात्रावेव निशीथे यक्षराक्षसपिशाचेभ्यो माषापूपसक्तुलाजसमन्वितं बलिम् उक्तप्रदेशे परितः क्षिप्त्वा ओषधीभिः

शालियवमाषगोधूमपिष्टकेदारोदकमधुपयोभिः अपूपलाजचरुभिः क्रमेण नागेभ्यो बलिं दत्त्वा- - - - - ।

क्रि. २.४४-७

३.२.१४ —— —— युगादिसंस्कार-

ज्ञा. २२.४२

प्रभाते स्नात्वा स्नानविधानेन युगलाङ्गलादीन् पञ्चगव्यैः क्षीरेण गन्धोदकेन वा विष्णुगायत्र्या प्रक्षाल्य संस्थाप्य युगे शेषं सीतायां मेदिनीं देवीं फाले ज्येष्ठां ऋषौ वायुं क्षिणिये इन्द्रं रज्जुबन्धे अपां पतिं प्रतोदे यमं पूर्वाद्यपरान्तं प्राङ्मुखो भूत्वा अर्घ्यान्तमभ्यर्च्य तेभ्यो हुत्वा- - - - - ।

३.२.१५ —— —— बलिदान - युगादिसंस्कारोत्तर-

ज्ञा. २२. ४२

शालिव्रीहियवमुद्गमाषप्रियङ्गुगोधूमचणकतिलतिल्वमसूरातसीकुलुत्थसर्षपश्यामाकषाष्टिकनिष्पावा इति ये सप्तदशधान्या भवन्ति एतान् संशोध्य संशुद्धान् प्रोक्ष्य सोममभ्यर्च्य बलिं दद्यात् ।

३.२.१६ —— —— वृषभपूजनादि-

ज्ञा. २२.४२

बलीवर्दौ रूप्यशृङ्गखुराववस्थाप्य अभिमृश्य अभ्यर्च्य क्षीरेण खुरान् प्रक्षाल्य पायसतण्डुलान् दत्त्वा प्रोक्षणैः प्रोक्ष्य प्राच्यां देवं समभ्यर्च्य प्रमुखे वीशं

दक्षिणे चक्रं वामे हरं संस्थाप्य सर्वविद्यानिधिप्रदैरभ्यर्च्य "सर्वजित्सर्वशत्रुघ्न" इत्यमितमावाह्याभ्यर्च्य पुण्याहं स्वस्तिमृद्धिं च वाचयित्वा कर्षकमलंकृत्य- - - - ।

३.२.१७ ——— ——— सीमानिर्णय-

खि. ३.२४-६

पश्चिमे भूमिभागे तु प्राङ्मुखः प्रयतात्मवान् ।
कलशे तोयमादाय वारुणं मन्त्रमुच्चरन् ॥

स्रावयेत् कलशात्तोयं पाणिभ्यामुद्धृता तदा ।
नैर्ऋत्यादिक्रमेणैव प्रादक्षिण्यवशेन तु ॥

सीमां विनिर्णयेत्तत्र धारास्विति च मन्त्रतः ।

स. ३. ३-५, १७,८

[अत्र पञ्चहस्तादिभेदेषु यथेष्टं मानं विनिश्चित्य गोपुरावरणैर्युक्तस्यालयस्य विस्तारं संकल्प्य चतुर्दिशं सीमां निर्णयेदिति निर्दिश्यते इति विशेषः ।]

ज्ञा. २२.४३
नि. ४
य. ३.२

वि. ३.१३

[अत्र त्रिकराद्येकोनषष्टिकरान्तं यथेष्टं शक्त्या विमानं समण्डपं सप्राकारं चतुर्दिशं सीमां विनिर्णयति इति निर्दिश्यते इति विशेषः ।]

शालियवमाषगोधूमपिष्टकेदारोदकमधुपयोभिः अपूपलाजचरुभिः क्रमेण नागेभ्यो बलिं दत्त्वा- - - - - ।

क्रि. २.४४-७

३.२.१४ —— —— युगादिसंस्कार-

ज्ञा. २२.४२

प्रभाते स्नात्वा स्नानविधानेन युगलाङ्गलादीन् पञ्चगव्यैः क्षीरेण गन्धोदकेन वा विष्णुगायत्र्या प्रक्षाल्य संस्थाप्य युगे शेषं सीतायां मेदिनीं देवीं फाले ज्येष्ठां ऋषौ वायुं क्षिणिये इन्द्रं रज्जुबन्धे अपां पतिं प्रतोदे यमं पूर्वाद्यपरान्तं प्राङ्मुखो भूत्वा अर्घ्यान्तमभ्यर्च्य तेभ्यो हुत्वा- - - - - ।

३.२.१५ —— —— बलिदान - युगादिसंस्कारोत्तर-

ज्ञा. २२. ४२

शालिव्रीहियवमुद्गमाषप्रियङ्गुगोधूमचणकतिलतिल्वमसूरातसीकुलुत्थसर्षपश्यामाकषाष्टिकनिष्पावा इति ये सप्तदशधान्या भवन्ति एतान् संशोध्य संशुद्धान् प्रोक्ष्य सोममभ्यर्च्य बलिं दद्यात् ।

३.२.१६ —— —— वृषभपूजनादि-

ज्ञा. २२.४२

बलीवर्दौ रूप्यशृङ्गखुराववस्थाप्य अभिमृश्य अभ्यर्च्य क्षीरेण खुरान् प्रक्षाल्य पायसतण्डुलान् दत्त्वा प्रोक्षणैः प्रोक्ष्य प्राच्यां देवं समभ्यर्च्य प्रमुखे वीशं

दक्षिणे चक्रं वामे हरं संस्थाप्य सप्तविंशतिविग्रहैरभ्यर्च्य ''सर्वजित्सर्वशत्रुघ्न'' इत्यमितमावाह्याभ्यर्च्य पुण्याहं स्वस्तिमृद्धिं च वाचयित्वा कर्षकमलंकृत्य- - - - ।

३.२.१७ —— —— सीमानिर्णय-

खि. ३.२४-६

पश्चिमे भूमिभागे तु प्राङ्मुखः प्रयतात्मवान् ।
कलशे तोयमादाय वारुणं मन्त्रमुच्चरन् ॥

स्रावयेत् कलशात्तोयं पाणिभ्यामुद्धृता तदा ।
नैर्ऋत्यादिक्रमेणैव प्रादक्षिण्यवशेन तु ॥

सीमां विनिर्णयेत्तत्र धारास्विति च मन्त्रतः ।

स. ३. ३-५, १७,८

[अत्र पञ्चहस्तादिभेदेषु यथेष्टं मानं विनिश्चित्य गोपुरावरणैर्युक्तस्यालयस्य विस्तारं संकल्प्य चतुर्दिशं सीमां निर्णयेदिति निर्दिश्यते इति विशेषः ।]

ज्ञा. २२.४३
नि. ४
य. ३.२

वि. ३.१३

[अत्र त्रिकराद्येकोनषष्टिकरान्तं यथेष्टं शक्त्या विमानं समण्डपं सप्राकारं चतुर्दिशं सीमां विनिर्णयति इति निर्दिश्यते इति विशेषः ।]

३.२.१८ —— —— भूमिशोधन-

ज्ञा. २१.४०

तत्र द्रुमगुल्मलतादीनपोह्य बहुशः कर्षणं कृत्वा शोधयेत्। गोभिराक्रमणात् दाहनात् खननात् पूरणात् वर्षधाराभिः भूमेः शौचमित्येवं यथालाभं क्रमेण कारयेत्।

स. ३.५
य. ३.२

३.२.१९ —— —— प्रथम-

खि. ३.२३,२६-३२

पादौ प्रक्षाल्य चाचम्य देवेशं मनसा स्मरन्।
युगलाङ्गलमाहृत्य वृषभौ तु समानयेत्॥

- - - - - - - - - - - - - - -

पश्चिमे भूमिभागे तु वृषभौ च समर्चयेत्॥

युगपाशं समादाय प्राङ्मुखः प्रयतात्मवान्।
''रुद्रमन्यं'' समुच्चार्य वृषभौ बन्धयेद्युगे॥

''युगं युग'' इति जपन् युगे लाङ्गलमर्पयेत्।
''तत्पुरुषाय'' इति ऋषिं वामहस्तेन चाहरेत्॥

दक्षिणे यष्टिमादाय प्रणवं मनसा स्मरन्।
आत्मरक्षां ततः कृत्वा ''विष्णुर्मां रक्षतु'' उच्चरन्॥

''हलकृष्टा दिवम्'' इति जपन्मत्रं समाहितः।
पश्चिमादिसमारभ्य कर्षयेन्मेदिनीं शनैः॥

प्रदक्षिणवशेनैव कर्षयित्वा च सर्वशः ।
द्वितीयं कर्षणं कृत्वा दक्षिणोत्तरयोः क्रमात् ॥

तृतीयं कर्षणं कुर्यात् प्राक्पश्चिममशेषतः ।
चतुर्थं कर्षयेद्विद्वान् दक्षिणोत्तरयोः क्रमात् ।
एवं कृष्टेऽत्र गाः नित्यं वासयेत् फाल्गुनादधः ॥

स. ३.१९-२२
ज्ञा. २२.४३
अ. ३
क्रि. २. ४९-५३
नि. ४
प्र. १. ३६-४३
य. ३.१०-३
वा. २

वि. ३.१४
[अत्र त्र्यम्बकमिति युगम् इति विशेषः ।]

३.२.२० ——— ——— निमित्तदर्शन-

ज्ञा. २२.४३

वामावर्ते छिन्नपदे गोमूत्रे गौरे चाशुभं, रक्तकृष्णकपोतगलवर्णे कर्तुर्मृत्युर्भवति । तुषभस्मकपालास्थिकेशरोमनखकण्टकादिदर्शने महद्दुःखं, श्वेतमृत्तिकादर्शने स्वर्णरजतताम्रमुक्तापद्मरागवज्रवैडूर्यप्रवालस्फटिकादिदर्शने महांश्च वृद्धिः कर्तुः शुभम्, इति शुभाशुभं ज्ञात्वा अरिष्टानां शान्तिं कारयेत् ।

३.२.२१ —— —— द्वितीय - काल-

खि. ३.३३,४

अत ऊर्ध्वं प्रवक्ष्यामि द्वितीयं कर्षणं क्रमात् ॥

फाल्गुने मासि संप्राप्ते पूर्वपक्षे विशेषतः ।
ग्रामस्य यजमानस्य चानुकूले दिने चरेत् ॥

अ. ३
नि. ४

३.२.२२ —— —— —— आचार्यपूजन-

खि. ३. ३४,५

पूर्वोक्तगुणसंपन्नानुक्तदोषविवर्जितान् ।
वैखानसान् समाहूय यजमानः समर्चयेत् ॥

''श्वः कर्तास्मि'' इति गुरुणा पूर्वेद्युः स्वगृहे तथा ।

३.२.२३ —— —— —— देवदेवाद्यर्चन-

खि. ३. ३६-४४

अङ्कणे च प्रपां कृत्वा पिष्टैः कुर्यादलंकृतिम् ।
धान्यराशिं प्रपूर्यैव त्रिवेदिसहितं क्रमात् ॥

पुष्पाक्षतसमायुक्तं दर्भानुपरि संस्तरेत् ।
दारुजं लोहजं वापि बिम्बं कृत्वा सलक्षणम् ॥

अथवा याचितं बिम्बं तस्मिन् देवं समर्चयेत् ।
तस्याः प्रपाया मध्ये तु देवदेवं समर्चयेत् ॥

वीशं चाभिमुखेऽभ्यर्च्य दक्षिणे चक्रमर्चयेत् ।
अमितं चोत्तरे स्थाप्य अर्चयित्वा विधानतः ॥

''आयातु भगवान्'' उक्त्वा देवस्यावाहनं चरेत् ।
सप्तविंशतिभेदेन अर्चयित्वा निवेदयेत् ॥

''सर्वजित्सर्व'' उच्चार्य चक्रमावाह्य यत्नतः ।
''वैनतेयो महावीर्यः'' काश्यपोऽग्निसमप्रभः ॥

एवमुच्चार्य वीशं तु अर्चयित्वा निवेदयेत् ।
आयातु भगवान् दिव्यो दान्तः शान्तो जनप्रियः ॥

एवमुक्त्वा तथा शान्तमर्चयित्वा निवेदयेत् ।
पुण्याहं वाचयित्वा तु देवमुद्दिश्य चादरात् ॥

कृत्वा शय्याधिवासं च रात्रिशेषं व्यपोह्य च ॥

३.२.२४ —— —— द्वितीय-

खि. ३. ४४-५७

पुनः प्रभाते स्नात्वा तु देवदेवं समर्चयेत् ॥

चक्रादीनर्चयित्वा तु यजमानयुतो गुरुः ।
भुक्त्वा तु पायसान्नं वै बान्धवैः सह धर्मवित् ॥

रूपयौवनसंपन्नां योषितं चारुदर्शनाम् ।
एकां विशुद्धामानीय वस्त्रादिभिरलंकृताम् ॥

पद्मं दक्षिणहस्तेऽस्याः वामे दीपं च दापयेत् ।
ध्वजतूर्यादिकान् सर्वान् पुरस्कृत्य विधानतः ॥

अष्टमङ्गलसंयुक्तं धूपदीपसमन्वितम् ।
भक्तैः परिवृतो गच्छेच्चक्रमग्रे तु संनयेत् ॥

वीशं पश्चात्समादाय अमितं च ततः परम् ।
यानैर्वा रथरङ्गैर्वा ब्रह्मचारिभिरेव वा ॥

वाहयित्वाथ तत्काले स्वस्तिसूक्तसमन्वितम् ।
भूमिं सम्यक् प्रविश्यैव यजमानयुतो गुरुः ॥

स्थाने तु नैर्ऋते स्थित्वा देवदेवमनुस्मरन् ।
भामिनीमग्रतः कृत्वा सर्वालंकारसंयुताम् ॥

आचार्यः कुम्भमादाय पुष्पाक्षतविभूषितम् ।
“प्रीयतां मेदिनी”त्युक्त्वा स्रावयेत्तु प्रदक्षिणम् ॥

चक्रादिभिस्ततो गच्छेत्कुर्वन्नेव प्रदक्षिणम् ।
स्थानस्य पश्चिमे कुम्भं धान्यपीठे निवेश्य च ॥

अर्चयित्वा विधानेन हविः सम्यङ्निवेदयेत् ।
अण्डजादीनि चास्तीर्य कृत्वा कौतुकबन्धनम् ॥

पुण्याहं वाचयित्वा तु वृषभौ तु सुबन्धयेत् ।
दद्यात् तृणानि बहुलं रात्रिशेषं व्यपोहयेत् ॥

ततः प्रभाते स्नात्वा तु यजमानयुतो गुरुः ।
कर्षकं पूजयित्वा तु वस्त्राभरणकुण्डलैः ॥

“नमो वरुण” इति मन्त्रेण अमितं संप्रणम्य च ।
पूर्वोक्तेन विधानेन कर्षणं सम्यगाचरेत् ॥

नि. ४

३.२.२५ ——— ——— **बीजावाप-**

खि. ३. ५८-६४

तां भूमिं प्रोक्षणैः प्रोक्ष्य पश्चाद्बीजानि चाहरेत् ।
शालिव्रीहियवान् मुद्गान् तिलान् माषान् प्रियङ्गुकान् ॥

गोधूमांश्चणकांस्तिल्वान् मसूरान् सर्षपांस्तथा ।
निष्पावांश्च कुलुत्थांश्च षष्टिकांश्च यवांस्तथा ॥

श्वेतसर्षपसंयुक्तान् सारभूतान् समाहरेत् ।
वेणुपात्रे तु संन्यस्य सोमं तत्रैव पूजयेत् ॥

''इमे बीजे''ति मन्त्रेण बीजानि त्वभिमन्त्रयेत् ।
''प्ररोह बीजान्'' इत्युक्त्वा वापनं सर्वतश्चरेत् ॥

पश्चात् कर्षकमाहूय कर्षयित्वा शनैः शनैः ।
''दुहतां दिवम्'' इत्युक्त्वा जलं सम्यक् प्रदापयेत् ॥

प्रदक्षिणं ततः कृत्वा रक्षां सर्वत्र कारयेत् ।
चक्रामितौ समादाय तूर्यघोषसमायुतम् ॥

स्वगृहं संप्रविश्यैव गुरवे दक्षिणां ददेत् ।

स. ३. २३-६

[अत्र ''सोमं राजान''मिति मन्त्रेण बीजानामभिमर्शनं विष्णुसूक्तसमुच्चरणपुरस्सरं बीजावापनं वारुणमन्त्रतः जलसेकश्चेति विशेषः ।]

ज्ञा. २२.४३

[अत्र ''समुद्रवतीं'' ''शृङ्गे शृङ्ग'' इति मन्त्राभ्यां उर्व्याः आनमनं 'देवि त्वयि' इति मन्त्रेण बीजावापः, प्रथमकर्षणात्परं बीजावापश्चेति विशेषः ।]

क्रि. २.५३-५

[अत्र ''देवि त्वयि'' इति मन्त्रेण बीजावापः प्रथमकर्षणात्परं बीजावापश्चेति विशेषः ।]

नि. ४

[अत्र ''सोमं राजान''मिति मन्त्रेण बीजाभिमर्शः विष्णुसूक्तेन बीजावापः वारुणमन्त्रेण जलसेकश्चेति विशेषः ।]

प्र. १.४३-५

[अत्र ''देवि त्वयि'' इति मन्त्रेण बीजावाप इति विशेषः ।]

य. ३.१४,५

[अत्र विष्णुसूक्तेन बीजावापः वारुणेन जलसेकः प्रथमकर्षणात्परं बीजावापश्चेति विशेषः ।]

वा. २

[अत्र ''सोमं राजान''मिति मन्त्रेण बीजादानमिति विशेषः ।]

वि. ३.१४

[अत्र बीजेषु षाष्टिकमुत्तमं प्रियङ्ग्वादि मध्यमं मुद्गसर्षपादि अधमम् इति बीजभेदाः, विष्णुसूक्तेन बीजानामभिमर्शश्चेति विशेषः।]

३.२.२६ ——— ——— पक्वसस्यनिवेदन-

खि. ३. ६४-९

सस्यं पक्वं समालोक्य अनुकूलदिनं भजेत् ॥

तद्दिनादेव पूर्वेद्युः ☆चक्रादींस्तत्र संनयेत् ।
संन्यस्य पूर्ववत् स्थाप्य पूर्ववत् सम्यगर्चयेत् ॥

रात्रौ गवामनेकेषामधिवासनमाचरेत् ।
पुनः प्रभाते धर्मात्मा यजमानयुतो गुरुः ॥

स्नात्वा स्नानविधानेन गाः सर्वाः संप्रणम्य च ।
पश्चिमे न्यस्तचक्रादिदेवान् सम्यक् प्रणम्य च ॥

गोदानसूक्तमुच्चार्य गोभ्यः सम्यक् निवेदयेत् ।
''गावो ही''ति जपन् मन्त्रं शुद्धादीनां जपं चरेत् ॥

गोगणैरभिसंक्रान्तां भूमिं सम्यक् प्रविश्य च ।★
''इमां सिञ्चामि'' मन्त्रेण प्रोक्षयित्वा तु सर्वतः ॥

स. ५. १-३

ज्ञा. २२. ४३,४

[अत्र 'धारा से''ति मन्त्रेण प्रणमनं 'सस्या इम' इति मन्त्रेण सस्याभिमन्त्रणं गोसावित्रीजपकरणं चेति विशेषः ।]

☆ आदिपदेन विष्वक्सेनवीशौ ग्राह्यौ ।

★ बालस्थानगतं हरिमर्चयेदित्यग्रिमेणान्वयः ।

नि. ६

[अत्र प्राङ्मुखा उदङ्मुखा वा गाव इति विशेषः ।]

प्र. १. ४६,७

[अत्र सस्या इमे इति मन्त्रेण पक्वसस्यप्रणमनम् इति विशेषः ।]

य. ३. १५,६

वा. २
[अत्र निरुक्ताधिकारवत्]

वि. ३.१४,५

३.२.२७ ——— ——— सद्यःकर्षण-

स. ५. ३-८

सद्यः कर्तुमशक्तो वा यजमानोऽथ तद्ध्रुवम् ॥

एवं तां कर्षयित्वैव दूर्वादीनि तृणानि च ।
बहुलान्येव संहृत्य भूमौ सर्वत्र तत्र वै ॥

विप्रकीर्य च गाः सर्वाः सवत्साः संप्रवेशयेत् ।
तृणेषु गोभिर्ग्रस्तेषु तृणान्यास्तृणुयात् पुनः ॥

गोगणैरपि संक्रान्ता भूमिः शुद्धा भवेत्ततः ।
गोमूत्रैर्गोमयैर्दुग्धैर्वत्सास्यनिःसृतैरपि ॥

स्वयं च पतितैः रोमैः फेनैः श्वासैस्तथैव च ।
यातैश्च शयनैस्तासां खुरैः पूर्णैश्च पाटनैः ॥

भूमिः शुद्धा भवेदेवमिति धर्मविदो विदुः ।

क्रि. २. ५५-८

[अत्र बीजानां ब्राह्मणेभ्यः प्रदानं तृणपूलस्य पलालस्य वा गोभ्यः निवेदनं चाधिकमिति विशेषः ।]

नि. ६.
य. ३.१६
वा. २

वि. ३.१५
[अत्र गोभ्यः निवेदनीयत्वेन पलालभाराश्च निर्दिष्टा इति विशेषः ।]

३. बालालयः ।

३.३.१.० आलयनिर्माण - मार्ग - द्विविध - सामृतादि-

खि. २.७५

सामृतो हारकश्चैव द्विविधो मार्ग उच्यत ।

वा. १

३.३.१.१ ——— ——— सामृत-

स. ४. ३५,६

बालालयेऽर्चनं कुर्वन् विमानं कारयेद्बुधः ॥
एतत् सामृतमित्युक्तं- - - - - - -।

ज्ञा. २१.४१
अ. ८
य. ३१. ३३-५
वा.१

३.३.१.२ ——— ——— हारक-

स. ४. ३७

बालालयं विना पूर्वमालयारम्भणं तु यत् ।

तत्तु हारकमित्युक्तम् - - - - - - - - ॥

ज्ञा. २१.४१
अ. ८
य. ३१.३६
वा.१

३.३.१.३ ——— ——— सामृतहारक - तारतम्य-

य. ३१.३७

तयोस्तु सामृतं मुख्यं गौणं तद्धारकं विदुः ।

३.३.१.४ ——— ——— सामृत - अधिकारिन्-

स. ४. ३६

- - - - - - - - - शक्तः सामृतमाचरेत् ।
राज्ञो ग्रामस्य शक्तानामन्यथा तु विपद्भवेत् ॥

ज्ञा. २१.४१

[अत्र राज्ञां राजसमानां द्विजानाममात्यानां च सामृतमेव इति विशेषः ।]

३.३.१.५ ——— ——— हारक - अधिकारिन्--

स. ४. ३७,५२,३

- - - - - - - -अशक्तानामिदं स्मृतम्[★] ॥

- - - - - - - - - - - - - - - -

कुर्याच्चेद्धारकं मार्गमशक्तो भक्तिसंयुतः ।
भक्तिमेव पुरस्कृत्य विनैव तरुणालयम् ॥

पूर्वं विमानं कृत्वैव ध्रुवबेरं च कौतुकम् ।
कारयित्वा विधानेन प्रतिष्ठां कारयेद्बुधः ॥

ज्ञा. २१.४१

[अत्र दरिद्राणां भक्तिमात्रसाधनानां चेत्यधिकमिति विशेषः ।]

खि. २.१०९

३.३.२ —— बालालयकल्पन - स्थान-

य. ५. १,२

अत ऊर्ध्वं प्रवक्ष्यामि बालालयविधिक्रमम् ।
प्रथमावरणे वाथ द्वितीयावरणेऽथवा ॥

मूलस्थानस्य चैशान्यामैन्द्रे सौम्ये विशेषतः ।
वायव्यां पश्चिमे वाथ कल्पयेत्तरुणालयम् ॥

स. ४. १,२
ज्ञा. २३.४६
क्रि. ३. १,२

★ हारकम् ।

खि. २. ७५,६

नि. ५

वि. ४.१६

[अत्र प्रथमावरणे इत्यस्य स्थाने तृतीये इति, ऐन्द्रसूत्रादुत्तरे इत्यधिकमिति च विशेषः ।]

३.३.३ ——— ——— उपादानद्रव्य-

ज्ञा. २३.४६

तरुणालयं कुर्यात् मृण्म(न्म?)यं दारुमयं वा । नेष्टमिष्टकाभिः शिलाभिरिति।

स. ४.३

[अत्र मृन्मात्रं निर्दिष्टमिति विशेषः ।]

य. ५.६,८

[अत्र शिलाया एव निषेधः इष्टकायाः नेति, बालालयस्य लुपोपरि तृणैः लौष्टैर्वा आच्छादनमिति च विशेषः ।]

वि. ४.१७

[अत्र बालालयस्य लुपोपरि तृणैः लोष्टैर्वा आच्छादनं कुर्यादित्यधिकमिति विशेषः ।]

३.३.४ —— बालालय - प्रमाण-

नि. ५

नवहस्तोत्तमं विद्यात् सप्तहस्तं तु मध्यमम् ।
अधमं पञ्चहस्तं स्यात् बालस्थानस्य चायतम् ॥

स. ४. २,३

[अत्र उत्तमादिभेदा न निर्दिष्टाः इति, बालालयप्रमाणस्य पञ्चहस्तादहीनत्वमात्रं निर्दिष्टमिति च विशेषः ।]

खि.२. ८०,१

[अत्र समूर्तार्चनाधिकरणवत् ।]

य. ५. ३,४

[अत्र उत्तमादिभेदा न निर्दिष्टाः इति, कुड्यमूलं चतुस्तालं त्रितालं वा विशालम्, अन्तर्विशालं तु पञ्चसप्तकरान्तकं चेत्यधिकमिति च विशेषः ।

वि. ४.१६

[अत्र उत्तमादिभेदा न निर्दिष्टा इति, त्रिहस्तादि त्रित्रिहस्तान्तं तरुणालयं कुर्यादिति निर्दिश्यते इति च विशेषः ।]

३.३.५ —— नवमूर्त्यादिबालालय- ——

वि. ५.२०,१

पूर्वोक्तदेशे तस्य प्राकारान्नातिक्रम्य, नवहस्तायतविस्तारं तरुणालयं कृत्वा तस्मिन्नेकाशीतिविभागं कृत्वा तन्मध्ये नवभागं गर्भागारं, तद्बहिः षोडशभागमभ्यन्तरभित्तिः, तद्बहिश्चतुर्विंशतिभागमलिन्दं, तद्बहिः द्वात्रिंशद्भागं बाह्यभित्तिः, तद्भित्तौ (चतुर्दिक्षु) चतुर्द्वारयुतमेकद्वारयुतं, अन्यासु जालकं वा - - - - - - - - षण्मूर्तिप्रतिष्ठा चेत् एवमेव बालागारं कृत्वा - - - - - - - -पञ्चमूर्त्तिप्रतिष्ठा चेत् तथैव बालागारं कृत्वा - - - - - - - -

३.३.६. ——— बालालय - बहुभूमिक - प्रमाण-

नि. ५

बहुभूमिविधानं चेत् तालभेदक्रमेण वै ।
वेदभागैकभागेन वर्धयेदायतं पुनः ॥

पञ्चमूर्तिक्रमेणस्य(णास्य?) मूलप्रासादवद्भवेत् ।
वर्जयेद्भित्ति-भित्तिं वर्जयेदष्टका(?) शिलाम् ॥

३.३.७ ——— ——— द्वार-

य. ५:५

यथा मूलालयद्वारं तथा स्यात्तरुणालये ॥

वि. ४.१७

३.३.८ ——— ———. अर्चापीठ - वेदिसंख्या-

वि. ४.१७

तन्*मध्ये द्विवेदिसहितमर्चापीठं च कृत्वा

स. ४.४

[अत्र त्रिवेदिसहितमर्चापीठमिति विशेषः ।]

३.३.९. ——— ——— ——— मान-

खि. २.८३

अर्चायामं त्रिधा कृत्वा तत्रैकं पीठमाचरेत् ।

३.३.१० ——— ——— मुखमण्टप-

वि. ४.१७

भित्तिमूलविशालं मात्राङ्गुलेन द्वितालं, त्रितालं, चतुस्तालं वा, तदवशेषं नालीग्रहविशालं समं त्रिपादम् अर्धं वा मुखमण्टपम् ।

य. ५.५

३.३.११ ——— ——— मूलालयाद्विशेष-

य. ५. ६-८

प्रथमेष्टकां च गर्भं च द्वारसंस्थापनक्रियाम् ॥
विनैव बालागारे तु कारयेद्विधिचोदितम् ।
द्वारस्तम्भं कवाटं च रक्षार्थं तरुणालये ॥

---

* तरुणालयमध्ये ।

मन्त्रेण स्थापयेद्रत्नान्(?)विनैव च तलादिषु ।

३.३.१२ ——— ——— बालबिम्ब - उपादानद्रव्य-

य. ५.१३

सौवर्णं राजतं वाथ ताम्रं वाथ स्वशक्तितः ।
दारवप्रतिमां वाथ कृत्वा संस्थापयेद्बुधः ॥

स. ४.८,९

[अत्र लोहविशेषाननिर्दिश्य अश्वत्थेन ध्रुवबेरोक्तदारुणा वा बालबिम्बं कुर्यादिति निर्दिश्यते इति विशेषः ।]

नि. ५

वि. ४.१७

[अत्र लोहविशेषाननिर्दिश्य खदिरासनचम्पकार्जुनपनसवकुलमधूकाश्वत्थबिल्वशमीनामन्यतमेन दारुणा बालबिम्बं कुर्यादिति निर्दिश्यते इति विशेषः ।

३.३.१३ ——— ——— ——— प्रमाण-

वि. ४.१७

मानाङ्गुलेन सप्ताङ्गुलम् नवाङ्गुलम् एकादशाङ्गुलं त्रयोदशाङ्गुलं वा देवीभ्यां सहितं रहितं वा देवं सलक्षणं स्थितमासीनं वा कृत्वा☆- - - - -।

☆ प्रतिष्ठाप्यार्चयेदित्युत्तरेणान्वयः ।

स. ४.४-६

[अत्र विमानमादौ निश्चित्य तदनुरूपं देवीभ्यां सहितम् आसीनं स्थितं वा नवभेदेष्वन्यतमं बालबेरं कारयेदिति निर्दिश्यते इति विशेषः ।]

३.३.१४ —— पञ्चमूर्तिबालालय- —— ——

य. ५·१२

एकैकं तद्द्वितालोच्चं पञ्चमूर्तेर्विशेषतः ।
ब्राह्मे चैकपदं धीमानुन्नतं तु समाचरेत् ॥

३.३.१५ —— बालालय - ध्रुवबिम्ब - मान-

खि. २.८२

बिम्बं सलक्षणं कृत्वा दशतालक्रमेण वै ।

स. ४.७

अथवा कौतुकं कृत्वा कौतुकस्यानुरूपतः ।
ध्रुवं तस्यानुरूपं च विमानं कारयेत् पुनः ॥

३.३.१६ —— —— कौतुक-

स. ४.६

ध्रुवबेरानुरूपं तु कौतुकं कारयेद्बुधः ।

खि. २.७७

३.३.१७ ——— ——— ——— उत्तम-

खि. २.८२

☆तदङ्गुल्यश्चतुर्विंशदुत्तमं कौतुकं भवेत् ।

३.३.१८ ——— ——— ——— मध्यम-

खि. २.८१

★तदर्धं मध्यमं प्रोक्तम्- - - - - - - ॥

३.३.१९ ——— ——— ——— अधम-

खि. २.८१

- - - - - - - - तस्या*र्धमधमं विदुः ॥

३.३.२० ——— ——— याचितबिम्ब-

य. ५.१४

☆ बालालयाङ्गुल्यः ।

★ उत्तमकौतुकप्रमाणार्धप्रमाणम् । * मध्यमकौतुकप्रमाणार्धप्रमाणम् ।

अन्यालयेऽर्चितं शून्यं संप्राप्तं च पुनस्तथा ।
याचितं तद्विदुर्धीमानाचरेत् त्वरयान्वितः ॥

३.३.२१ —— —— गृहार्चाबिम्ब-

य. ५.१५

अथवा तद्गृहार्चां वा स्थापयेद्बालधामनि ।

३.३.२२ —— बालालयप्रतिष्ठा - काल-

नि. ५

सुमूहूर्ते सुनक्षत्रे तिथौ च शुभवासरे ।
ग्रामस्य यजमानस्य चानुकूले समाचरेत् ॥

य. ५.१७

३.३.२३ —— —— ऋत्विग्वरण-

ज्ञा. २३.४६

श्वःकर्तास्मीति संचिन्त्य पत्न्यपत्ययुतान् शुद्धान् मन्त्रकल्पविचक्षणान् श्रीवैखानसविदः आहूय अलंकृत्य एतैरैव कारयेत् । सर्वे ते च सुलुप्तश्मश्रुकेशाः सुवस्त्राः सुशुद्धदन्तनखाः आपराह्णमुपवासयुता भवेयुः ।

स. ४.१०

३.३.२४ —— —— अङ्कुरार्पण - काल-

स. ४.१०

स्थापनादिवसात् पूर्वमङ्कुरानर्पयेत् क्रमात् ॥

ज्ञा. २३.४६

[अत्र स्थापनादिवसात् पूर्वं नवमे सप्तमे पञ्चमे त्र्यहे वा अङ्कुरार्पणविधिरिति विशेषः ।]

खि. २.८४
नि. ५
य. ५.१७
वि. ४.१७

३.३.२५ —— —— वास्तुहोम-

स. ४.११,३

वास्तुहोमाङ्गहोमौ च हुत्वा-------।
- - - - - - - - - - - - - - - - -॥

आलयस्योत्तरे रात्रौ वास्तुहोमश्च हूयते ।

अ. ४
नि. ५
वि. ४.१८

३.३.२६ —— —— बालबिम्बनेत्रोन्मीलन-

वि. ४.१७

अक्ष्युन्मोचनं कृत्वा ।

स. ४.११
ज्ञा. २३.४६
य. ५.१८

३.३.२७ —— —— बालबिम्बाधिवास-

य. ५.१८

- - - - - - - - - - -क्षीरे गव्ये जले तथा ।
अधिवास्य- - - - - - - - - - - - - - - ॥

स. ४.११
ज्ञा. २३.४६
नि. ५

[अत्र अधिवासनं नयनोन्मीलनार्थकमिति निर्दिश्यते इति विशेषः ।]

वि. ४.१७

३.३.२८ —— —— यागशालादिकल्पनः

वि. ४.१७

बालालयाभिमुखे दक्षिणे वा यागशालां कृत्वा तोरणाद्यैरलंकृत्य मध्ये शय्यावेदिं द्विहस्तायतविस्तारां तत्तुरीयोत्सेधां तत्प्राच्यां सभ्याग्निकुण्डं तत्प्राच्यामैशान्यां वा स्नानवेदिं च कुर्यात् । पञ्चाग्नीन् कल्पयेदित्येके ।

स. ४.१२
ज्ञा. २३.४६

खि. २.८७-९०
[अत्र प्राच्यादिषु क्रमशः आहवनीयक-अन्वाहार्यक - गार्हपत्य - आवसथ्यकल्पनं कुर्यादित्यधिकमिति विशेषः ।]

नि. ५
य. ५. १८,९

३.३.२९ —— —— कुम्भपूजन-

ज्ञा. २३.४७

द्वात्रिंशत्प्रस्थसंपूर्णं खण्डस्फुटितकालवर्जितं पक्वबिम्बफलाकारं कुम्भमादाय 'स्वस्तिदावी'ति तन्तुना यवान्तरमङ्गुल्यन्तरं वा परिवेष्ट्य 'धारास्वि'ति नादेयं जलमुत्पूय कुशाक्षतैः सह वारिभिः 'विश्वतश्चक्षु'रिति कुम्भमापूर्य 'अतो देवा'दीन् जप्त्वा सौवर्णान् अष्टमङ्गलवर्णचिह्नान् रत्नानि 'इयं जागृति'रिति

क्षिप्त्वा अभिमृश्य अश्वत्थाशोकपल्लवैर्युतं दुकूलयुग्मेनाहतेन युग्मवस्त्रेण वा आकण्ठमावेष्ट्य अलंकृत्य प्राणायामं कृत्वा धारणामास्थाय अपां पत्यास्रावितपीयूषाकृतिमैन्द्रं परममास्थाप्यान्तर्गतजगत्त्रयप्रत्यगात्मविभाषितमाहेन्द्रमध्यगं वारुणमण्डलं ध्वात्वा वारिबीजावेष्टितमनिरुद्धं निधाय कुम्भमावेश्याद्यमष्टशतमावर्त्य 'विष्णुस्त्वां रक्ष'त्वित्यभिमृश्य अखिलजगद्बीजमिति तं प्रणम्य अब्जहोमं हुत्वा हौत्रं प्रशंस्य आवाहनं करोति । आवाहनक्रमेण जुष्टाकारस्वाहाकारौ कृत्वा पूर्ववत् दिक्पालामितवीशादीनां पृथक् कुम्भं पूजयेदिति ।

स. ४. १४,५
नि. ५
य. ५. २०,१
वि. ४.१८

३.३.३० —— —— स्नपन-

नि. ५

तत्कुम्भं पुरतश्चैव पश्चात् बिम्बं समाचरेत् ।
स्नपनस्थानं प्रवेश्यैव श्वभ्रे बिम्बं न्यसेत् क्रमात् ॥
तस्य दक्षिणतः पार्श्वे तत्कुम्भं च सुसंन्यसेत् ।
कलशैः पञ्चविंशद्भिः स्नपनोक्तक्रमेण वै ॥
तद्बिम्बं स्नपनं कुर्यात् वस्त्राद्यैरभिभूषयेत् ।

स. ४.१६

[अत्र कलशसंख्या न निर्दिष्टेति विशेषः ।]

ज्ञा. २३.४६

[अत्र सप्तभिः कलशैः स्नापनमिति विशेषः ।]

खि. २.९१-३

[अत्र सोपस्नानैः सप्तभिः कलशैः स्नपनं निर्दिष्टमिति विशेषः ।]

य. ५.२१

वि. ४.१८
[अत्र चतुर्दशकलशैः स्नपनमिति विशेषः ।]

३.३.३१ ——— ——— प्रतिसरबन्धनं-

नि. ५

सौवर्णं पद्मसूत्रं वा कार्पासं वा स्वशक्तितः ।
हेमादिलोहपात्रे तु शुद्धतण्डुलपूरिते ॥

सूत्रं च संन्यसेद्विद्वान् यजमानगृहात्ततः ।
गेयवाद्यसमायुक्तं शकुनसूक्तसमन्वितम् ॥

स्तोत्रध्वनिसमायुक्तं छत्रपीठा(पिञ्छा?)दिभिर्युतम् ।
चामरादिसमायुक्तं धूपदीपसमन्वितम् ॥

ग्रामप्रदक्षिणं कृत्वा शयनं संप्रविश्य च ।
अर्चयित्वा तु तद्बिम्बं पुण्याहमपि वाचयेत् ॥

प्रतिसरबन्धनं कृत्वा शयने शाययेत्ततः ।

स. ४.१७

खि. २.९८
य. ५.२३
वि. ४.१८

३.३.३२ —— —— शयनाधिवास-

य. ५.२२-४

शय्यावेद्यां तथास्तीर्य अण्डजादीन् यथाक्रमम् ।
आरोप्योपरि देवेशं कुम्भेन सह शाययेत् ॥

पुण्याहं वाचयेत्तत्र- - - - - - - - - - -।
यद्वैष्णवं समुच्चार्य प्राक्छिरःशाययेद्धरिम् ॥

उत्तराच्छादनं कृत्वा- - - - - - - - -।

स. ४.१६,७

[अत्र शय्यावेद्यां व्रीहिराशिकल्पनमधिकमिति विशेषः ।]

ज्ञा. २३.४६

[अत्र व्रीहिराशेः दर्भास्तरणस्य च कल्पनमधिकमिति विशेषः ।]

खि. २. ९४-६,८

[अत्र अण्डजादीनामलाभे प्रत्येकं वस्त्रास्तरणं निर्दिश्यते इति विशेषः ।]

नि. ५

वि. ४.१८

[अत्र शय्यावेद्यां धान्योपरि अण्डजादीनि पञ्चशयनानि वासांसि वा आस्तरणीयानीति निर्दिश्यते इति विशेषः ।]

३.३.३३. —— —— होम-

ज्ञा. २३. ४६,७

विमानाद्दक्षिणे अब्जाग्निकुण्डम् एकोनविंशत्यङ्गुलयुतं कृत्वा वैखानससूत्रोक्तविधिना आघारं हुत्वा- - - - - - परितः प्रागाद्युत्तरान्तमाहवनीयान्वाहार्यगार्हपत्यावसथ्यान् यथाक्रमेण मध्ये सभ्यं च कृत्वा पूर्ववदग्निं साधयित्वा आहवनीये सौरं सौम्यमाग्नेयमैन्द्रम्, अन्वाहार्ये याम्यं नैर्ऋतं दुर्गासूक्तं गार्हपत्ये वारुणमनिलदैवत्यम् आवसथ्ये कौबेरमीशदैवत्यं सभ्ये ब्राह्मं प्राजापत्यं गारुडमार्षं दौवारिकं वैष्णवयुतम् आज्येन हुत्वा अग्निं विसर्जयित्वा- - - - - -

स. ४. १३,४,८,९
खि. २. ९९-१०४
नि. ५
य. ५. २४,५
वि. ४. १८,९

३.३.३४ —— —— बिम्बप्रतिष्ठाप्रकार-

वि. ४, १९,२०

आचार्यः प्रभाते स्नात्वा आगारं प्रविश्य आनम्य देवमुत्थाप्य अष्टोपचारैरभ्यर्च्य प्रणमेत् । यजमान आचार्यादिभ्यो दक्षिणां दद्यात् । मुहूर्ते समनुप्राप्ते

स्थापका देवमादद्युः। आचार्यः शिरसा कुम्भं धारयन् अग्रतो गच्छेत् । सर्ववाद्यसमायुक्तं स्तोत्रनृत्तगेययुक्तं शीघ्रं विनोदं कारयेदिति केचित् । शकुनसूक्त समुच्चार्य तोयधारापुरःसरं प्रदक्षिणं कृत्वा अभ्यन्तरं प्रविश्य शुभे चरराशौ 'प्रतद्विष्णु'(ऋ.सं. २-२-२४)रिति देवं संस्थाप्य, विष्णुसूक्तं पुरुषसूक्तं जप्त्वा देवपादौ स्पृशन् 'भूर्भुवःसुव'रिति बिम्बस्य मूर्ध्नि नाभौ पादयोश्च क्रमेण विन्यस्य यकारं पादयोरन्तरे पीठे न्यस्य अकारं हृदये न्यस्य तं प्रणवैर्वेष्टयित्वा कुम्भस्थां शक्तिम् 'इदं विष्णु'(ऋ.सं. १-२-७)रितिमन्त्रेण कूर्चेनादाय 'आयातु भगवानि'(वै.म.प्र. ६)ति बिम्बस्य मूर्ध्नि 'विष्णुमावाहयामी'ति संस्राव्य, आवाहयेत् । 'दक्षिणे श्रियं, वामे हरिणी'मित्यावाह्य पीठान्ते प्रागादि सुभद्राद्यावरणत्रयदेवानावाह्य आसनाद्युपचारैरभ्यर्च्य पुण्याहं वाचयित्वा दक्षिणे ब्रह्माणम् उत्तरे मार्कण्डेयं वामे शंकरं पद्मापितरं द्वारेषु धात्रादिद्वारदेवान् द्वारपालान् विष्वक्सेनगरुडश्रीभूतादिमहाभूतान्तान् परिषदेवान् नवभेदेष्वेकमार्गेणावाहयेत् । पायसं शुद्धान्नं प्रभूतं वा निवेदयेत् ।

स. ४.१९-२७

प्रभाते विधिना स्नात्वा ऋत्विग्भिः सहितो गुरुः ॥

आचार्यस्थापकादिभ्यो यजमानो मुदान्वितः ।
यथोक्तदक्षिणां दद्यात् सोदकं देवसंनिधौ ॥

आचार्यः स्थापकैर्युक्तः चरराशौ विशेषतः ।
देवं कुम्भं समानीय बालागारं प्रविश्य च ॥

रत्नन्यासं विना पीठे मन्त्रेण स्थापयेत् प्रभुम् ।
दक्षिणे चोत्तरे देव्यौ श्रीभूम्यौ स्थापयेद्बुधः ॥

कुम्भाद्बिम्बे च तच्छक्तिं जलेनावाह्य मन्त्रतः ।
आसनादिभिरभ्यर्च्य हविस्तत्र निवेद्य च ॥

धात्रादिद्वारदेवांश्च द्वारि तद्वारपालकान् ।
विष्वक्सेनं च गरुडं श्रीभूतं भूतनायकम् ॥

तत्तद्देशे समावाह्य नाम्नाभ्यर्च्य बलिं ददेत् ।
उक्तमन्त्रविधानेन देवान् इन्द्रादिकानापि ॥

तत्तद्देशे समावाह्य नित्यं तांश्च समर्चयेत् ।
- - - - - - - - - - - - - - - - - ।

प्रतिष्ठोक्तक्रमेणैव शिष्टं सर्वं समाचरेत् ॥

ज्ञा. २४.४७,८

प्रभाते स्नात्वा मृष्टसिक्तोपलेपनाद्यैः संशोध्य शान्तिं हुत्वा शयनस्थं देवं संप्रणम्य सुवर्भुवर्भूरिति बिम्बस्य मूर्धनाभिपादेषु क्रमेण न्यस्य प्रणवमुच्चार्य बोधयित्वा शयनादुत्थाप्य आनम्य अलंकृत्य कुम्भयुतं देवमादाय कनिक्रदादीन् जपन् गच्छेत् । देवावासं गत्वा ब्राह्मे मुहूर्ते संप्राप्ते 'प्रतद्विष्णुस्तवत' इति देवेशं स्थापयति ।
देवस्य दक्षिणे यमान्तरे कुम्भं संस्थाप्य - - - - - - - - -
देवीभ्यां ऋषिभ्यां दिक्पालैः देवमावाह्याभ्यर्च्य पुण्याहं वाचयेत् । ततो निष्कादधिकं पृथक् पृथक् सुवर्णं दत्त्वा ब्राह्मणान् भोजयेत् ।

खि. २. १०५-८

मूहुर्ते समनुप्राप्ते उद्धृत्य शयनाद्धरिम् ।
पाद्याद्यर्घ्यान्तमभ्यर्च्य पूजयित्वा यथाक्रमम् ॥

सर्वालंकारसंयुक्तं सर्ववाद्यसमायुतम् ।
देवमादाय यत्नेन बालागारं प्रवेशयेत् ॥

जप्त्वा तु वैष्णवं सूक्तं स्थापयित्वा विचक्षणः ।
पुण्याहं वाचयित्वा तु प्रोक्षणेन समन्वितम् ॥

आराध्य विधिवन्मन्त्रैः हविः सम्यङ्निवेदयेत् ।
पश्चान्नित्यं समभ्यर्च्य विमानं कारयेद्बुधः ॥

नि. ५

कौतुकस्योक्तमार्गेण प्रतिष्ठां कारयेद्बुधः ।
- - - वा सुखासीनां केचिदिच्छां समाचरेत् ॥
- - - - - - - - - - - - - - - - - - -।
ततः प्रभाते त्वाचार्यः स्नात्वा स्नानविधानतः ॥

आचार्यः सुप्रसन्नात्मा शयनादुद्धरेद्धरिम् ।
दीपान्तमर्चयित्वा तु गर्भागारस्य मध्यमे ॥

त्रिवेदिसहितं पीठं रत्नन्यासं विना क्वचित् ।
ब्रह्मस्थाने प्रकल्प्यैव चरराशौ विशेषतः ॥

आचार्यः स्थापकैर्युक्तः मन्त्रेण स्थापयेद्धरिम् ।
दक्षिणोत्तरयोश्चैव श्रीभूम्यौ स्थापयेत् पुनः ॥

कुम्भं च पुरतः स्थाप्य आचार्यो भक्तिसंयुतः ।
कुम्भाद्बिम्बे तु तच्छक्तिं जलेनावाह्य मन्त्रतः ॥

देव्योर्वै प्रतिमाभावे रत्नं वा हेममेव(?)वा ।
तत्तत्स्थाने तु संन्यस्य समावाह्य विधानतः ॥

आसनादिभिरभ्यर्च्य हवींष्यपि निवेदयेत् ।
धात्रादिद्वारदेवांश्च नवधा मार्गतः क्रमात् ॥

तं न(तत्र?) देवेशमावाह्य समभ्यर्च्य बलिं ददेत् ।

य. ५.२५-३०

यागस्थानं प्रविश्यैव उद्धरेद्धरिमव्ययम् ॥

आचार्यदक्षिणां दत्त्वा चरराशौ शुभोदये ।
कुम्भं बिम्बं समादाय तोयधारापुरःसरम् ॥

धाम प्रदक्षिणं कृत्वा 'प्रतद्विष्णु'रिति ब्रुवन् ।
संस्थाप्य वेद्यां देवेशं देवीभ्यां स्नपनोत्सवे ॥

आत्मसूक्तं जपित्वा तु विष्णुसूक्तादिकं जपेत् ।
कुम्भस्थां शक्तिमादाय ध्यायन् विष्ण्वादिमूर्तिभिः ॥

बिम्बस्य मूर्ध्नि चावाह्य देव्यादीन् परिषद्गणान् ।
आवाह्य चोत्सवेऽर्चायां बलिबिम्बे च कौतुकात् ॥

दीपाद्दीपमिवावाह्य समभ्यर्च्य यथाक्रमम् ।
पुण्याहं वाचयेत्तत्र पायसादीन् निवेदयेत् ॥

३.३.३५ ——— ——— बिम्बे भगवदावाहनोपपत्तिः

ज्ञा. २४.४८

यथायसि महासारं मुकुले गन्धं क्षीरे सर्पिः मधुन्युदकं तिले तैलमिव
.सर्वव्यापिनो व्योमाभस्य ब्रह्माद्यैरप्यनभिलक्ष्यस्य विष्णोरावाहनं पूजनमभिमुखीकरण- —
मुद्रासनं स्वेच्छानुमोदनमिति ब्रह्मवादिनो वदन्ति । अणोरणीयान् महतो

महीयानात्मेति आत्मैवेदं सर्वं नेह नानास्ति किंचनेति श्रुतयो गृणन्ति । यथा आदर्शसहस्रेषु दृश्यते पुरुषोत्तमः अम्भस्यर्कबिम्बानि गिरिषु प्रतिशब्दा इव तस्य नानात्वम् । यथान्धकारे रज्जुसर्पदण्डोदकधारा अवभासन्ते तथा विद्याद्धरिम् । तस्मादात्मस्वभावः प्रपञ्चो न प्रपञ्चस्वभाव आत्मा । समुद्रस्वभावस्तरङ्गो न तरङ्गस्वभावः समुद्र इति यावत् । यथा ह्यरण्यामनलः सर्वगोऽप्येकदेशमथनात् उज्ज्वलति तथा सर्वगतस्यात्राविर्भावः । यथा सर्वगतो वायुः व्यजनेन प्रकाशते तस्मात् ध्यानमथनेन मथनात् हृद्याविर्भवति । पश्चादावाहनध्यानजपहोमाद्यैः भक्तियुक्तैः तृप्तो यथेष्टं ददाति । यथाग्नेर्विस्फुलिङ्गाः तथात्मनो ब्रह्मेशेन्द्रादयः । तत् (ब्रह्म) अचलं चलमिति तत्त्वविदो वदन्ति- चलेषु पूजितं सर्वमचलं गच्छति ।

३.३.३६ —— —— नवमूर्तिबालालय - बिम्बस्थापनस्थान

वि. ५.२०,१

गर्भागारं सप्तसप्तविभागं कृत्वा ब्राह्मे विष्णुमूर्तिं तत्पश्चिमे मानुषभागे तृतीयतले कौतुकस्य द्वितालोच्छ्रायं पीठं कृत्वा अलिन्द्रे द्वारदक्षिणे पुरुषमूर्तिं प्राङ्मुखम् अलिन्द्रे दक्षिणाभिमुखं सत्यं तथा पश्चिमे पश्चिमाभिमुखमच्युतम् उत्तरे चोत्तराभिमुखमनिरुद्धं तदलिन्द्रे अनिरुद्धमूर्तेर्वामपार्श्वे द्वितीयतले वाराहमुत्तराभिमुखम् अच्युतमूर्तेरुत्तरपार्श्वे पश्चिमाभिमुखं नारसिंहं सत्यमूर्तेः पश्चिमतो दक्षिणाभिमुखौ नरनारायणौ च कृत्वा एवं नवमूर्तिप्रतिष्ठाक्रमेण प्रतिष्ठापयेत् ।

३.३.३७ —— —— नवमूर्तिप्रतिष्ठाप्रकार-

वि. ५. २१-३

एतेषां बालबेराणि पूर्ववत् कृत्वा प्रत्येकमक्ष्युन्मेषाधिवासादीनि कृत्वा

आदिमूर्तेर्यागशालाभिमुखे तत्प्राच्यां पुरुषमूर्तेः तत्प्राच्यां तृतीयतले कौतुकस्य आलयाद्दक्षिणे सत्यमूर्तेः यागशालां दक्षिणे नरनारायणयोः आलयात्पश्चिमे अच्युतमूर्तेर्यागशालां तत्पश्चिमे नृसिंहस्य आलयादुत्तरे अनिरुद्धमूर्तेः यागशालां तदुत्तरे वाराहस्य च एवं षोडशद्वादशाष्टचतुःस्तम्भयुक्तां कृत्वा प्रत्येकं तोरणपूर्णकुम्भवितानध्वजदर्भमालाद्यैरलंकृत्य मध्ये शय्यावेदिं चतुस्त्रिद्विहस्तायतविस्तारां तत्तुरीयांशोत्सेधां चतुरश्रां च कारयेत् । आदिमूर्तेः पञ्चाग्नीन् पौण्डरीकाग्निं च कृत्वा अनन्तशयनस्य पञ्चाग्नीनेव पुरुषमूर्तेराहवनीयं सत्यमूर्तेरन्वाहार्यम् अच्युतमूर्तेर्गार्हपत्यं अनिरुद्धमूर्तेरावसथ्यं वाराहस्य नृसिंहस्य गार्हपत्यं नरनारायणयोः पौण्डरीकं कारयेत् । आदिमूर्तेः शयानस्य च प्रत्येकं सभ्याग्निमेव कारयेदिति केचित् । तत्तद्यागशालां प्रत्येकं स्नानश्वभ्रं च कृत्वा आलयस्योत्तरे वास्तुहोममेकमेव कृत्वा गर्भागाराणि पर्यग्निपञ्चगव्याभ्यां संशोध्य पुण्याहं वाचयित्वा सर्वेष्वग्निकुण्डेषु आघारं हुत्वा आचार्यः तद्बेराभिमुखे प्रतिष्ठोक्तविधिना कुम्भान् संपूज्य आवाह्य सप्तभिः कलशैः बेराणि संस्नाप्य तत्तद्वेद्यां धान्योपरि 'वेदाह'मित्यण्डजादीनि पञ्चशयनानि वासांसि वास्तीर्य सर्वान् देवान् तत्तत्कुम्भं च तत्तद्वेद्यां समारोप्य पुण्याहान्ते प्रतिसरं बद्ध्वा 'यद्वैष्णव'मिति यद्दिग्द्वारं तद्दिङ्मौलि शाययेत् । तत्तत्प्रधानाग्नौ होत्रं प्रशंस्य तत्तन्मूर्तिमन्त्रैः तत्तत्परिषद्देवानामावाहनादीनि कारयेत् । आदिमूर्तेरनन्तशयनस्य च सभ्याग्नौ वैष्णवं विष्णुसूक्तं पुरुषसूक्तं श्रीभूमिदेवत्यं सर्वभूमिदेवत्यं च हुत्वा पुरुषमूर्तेराहवनीये पुरुषसूक्तं सत्यमूर्तेरन्वाहार्ये विष्णुसूक्तं अच्युतमूर्तेर्गार्हपत्ये वैष्णवम् अनिरुद्धमूर्तेरावसंथ्ये रुद्रसूक्तमेकाक्षरं चतुष्कृत्वो हुत्वा वाराहस्य सभ्याग्नौ 'क्ष्मामेका'मिति मन्त्रेण अष्टाधिकशतं हुत्वा नृसिंहस्य गार्हपत्याग्नौ 'यो वा नृसिंह' इत्येकं नरनारायणयोः पौण्डरीकाग्नौ 'सत्यः सत्यस्थ' इति मन्त्रं विष्णुगायत्रीं च अष्टोत्तरशतं हुत्वा अत्रानुक्तं सर्वं महाप्रतिष्ठोक्तक्रमेण कृत्वा रात्रिशेषं व्यपोह्य प्रभाते स्नात्वाचार्यादिभ्यो दक्षिणां दद्यात् । सर्वान् देवानुत्थाप्य रत्नन्यासं विना चरराशौ तत्तत्स्थाने प्रतिष्ठाप्य पुण्याहं वाचयित्वा नित्यार्चनाविधानेनाभ्यर्च्य हविर्निवेदयेत् ।

३.३.३८. ——— ——— षण्मूर्तिबालालय - प्रतिष्ठाप्यमूर्ति-

वि. ५.२१

षण्मूर्तिप्रतिष्ठा चेत् ☆एवमेव बालागारं कृत्वा वाराहं नारसिंहं नरनारायणौ च हित्वा विष्ण्वादिपञ्चमूर्तिं तृतीयतलकौतुकं च तत्क्रमेण प्रतिष्ठापयेत् ।

३.३.३९ ——— ——— षण्मूर्तिप्रतिष्ठाप्रकार-

वि. ५.२३

षण्मूर्तिप्रतिष्ठा चेत् वाराहं नारसिंहं नरनारयणौ च हित्वा षण्मूर्तीः संस्थाप्यार्चयेत् । - - - - - - -एष विशेषः अन्यत्सर्वं ★समानम् ।

३.३.४० ——— ——— पञ्चमूर्तिबालालय - प्रतिष्ठाप्यमूर्ति-

वि. ५.२१

पञ्चमूर्तिप्रतिष्ठा चेत् *तथैव बालागारं कृत्वा तृतीयतले पञ्चमूर्तिकौतुकं वाराहादींश्च हित्वा विष्ण्वादिपञ्चमूर्तीस्तत्क्रमेण प्रतिष्ठापयेत् ।

३.३.४१ ——— ——— बहुभूमिविमान - पञ्चमूर्तिस्थापनस्थान-

य. ५.९-११

☆ नवमूर्तिबालालयवत् ।

★ नवमूर्तिप्रतिष्ठयेति शेषः ।

*नवमूर्तिबालालयवत् ।

बहुभूमिविमानं चेत् तलभेदक्रमाद्बुधः ।
अन्तरं धातुभागं च विभजेन्मध्यमे सुधीः ॥

आदिभूमिं च संकल्प्य दैवमानुषमध्यमे ।
द्वितलाय तथा धीमान् पैशाचे त्रितलाय च ॥

द्वितलं मानुषे युग्मं पञ्चमूर्तिर्भवेद्यदि ।
पैशाचे परितो मध्ये पुरुषादीन् स्थापयेद्बुधः ॥

३.३.४२ ——— ——— पञ्चमूर्तिप्रतिष्ठाप्रकार-

स. ४.२८-३२

पञ्चमूर्तिप्रतिष्ठा चेच्चूलिकासहितं शुभम् ।
मध्ये गर्भयुतं कृत्वा गर्भागारे परे पदे ॥

तत्र मानुषभागे तु सोन्नतं कारयेत् स्थलम् ।
ऊर्ध्वं तलं समुद्दिश्य तत्र देवं समर्चयेत् ॥

मध्यमे विष्णुमूर्तिं च पुरुषं मुखमण्डपे ।
सत्यं दक्षिणतो देवमच्युतं पश्चिमे तथा ॥

उत्तरे ह्यनिरुद्धं च चूलिकायां यथाक्रमम् ।
पञ्चमूर्तिप्रतिष्ठोक्तविधिना स्थापयेद्बुधः ॥

यथोक्तपञ्चमूर्तीनामर्चनं च समाचरेत् ।
गुरवे चाथ ऋत्विग्भ्यः पृथग्दद्याच्च दक्षिणाम् ॥

ज्ञा. २३.४६

[अत्र पञ्चानामपि मूर्तीनां पृथक् पृथक् गर्भगृहमिति विशेषः ।]

वि. ५.२३

३.३.४३ —— एकतलविमानबालालय - पञ्चमूर्तिप्रतिष्ठाप्रकार-

वि. ५.२३

यस्मिन्नेकतलविमाने ध्रुवबेरस्यैकस्यैव कौतुकानि☆ पञ्चैव सन्ति अतः तेषां कौतुकानां बालस्थापने स्थापनं यदीच्छेत् पूर्वं तरुणालयं सालिन्द्रम् अभ्यन्तरभित्तिविहीनं वा कृत्वा तत्तत्पदे विष्ण्वादिपञ्चानां कौतुकानां पञ्चाग्नीन् परिकल्प्य होमं हुत्वा संस्थाप्यार्चयेत् इत्याह मरीचिः ।

३.३.४४ —— बालालयकल्पनाभाव - अशक्तविषयक-

वि. ३.१६

अशक्तश्चैवं शुद्धिं कृत्वा तरुणालयं विना विमानं ध्रुवबेरं कौतुकाद्यं च कृत्वा प्रतिष्ठां कारयेत् ।

ज्ञा. २४.४८

एवं कर्तुमशक्तश्चेत् ब्रह्मपद्मे कृते तत्रैवामितं संस्थाप्य सप्तविंशतिभेदैः सान्नबलियुतमेवं प्रतिष्ठान्तमभ्यर्च्य दैविकं बिम्बमादाय विमाने स्थापयेदिति कश्यपः ।

३.३.४५ —— सद्यःप्रतिष्ठा - बालबिम्ब - उपादानद्रव्य-

क्रि. ३.२२

सद्यश्चेत्त्वरितः कर्तुं शरीरानित्यतादिना ।
लौहं वा दारवं वापि बिम्बमर्चितमेव वा ॥

☆ अत्र कौतुकशब्दः बेरपर्यायः ।

ज्ञा. ६४.११२

प्रथमे तरुणालये सद्यः अर्चितुमिच्छन् अलब्धे यथोक्ते कौतुके बिम्बे यथोक्तं तद्यावत्पुनः लभेत तावत् ध्रुवबेरस्योक्तवृक्षैरश्वत्थेन वा यथालाभमानेन कृतं बिम्बं प्रतिष्ठाप्यार्चयति । परिवारदेवानां च तत्तद्बिम्बं संन्यस्य तत्तद्रूपाणि यथोक्तं ध्यात्वा आवाहयेत् ।

३.३.४६ ——— ——— बालालयप्रतिष्ठा

क्रि. ३.२३-३८

यागशालां प्रकल्प्यैव पञ्चाग्नीन् परिकल्प्य च ।
बालालयप्रतिष्ठार्थम् आचार्यं परिकल्प्य च ॥

बालालयप्रतिष्ठार्थम् इष्टकार्थं तथैव च ।
शूलसंस्थापनार्थं च कल्पयेदृत्विजः पृथक् ॥

संभृत्य सर्वसंभारांस्तथा शूलांस्तथेष्टकाः ।
पूर्वरात्रौ विशेषण कृत्वा सद्योऽङ्कुरार्पणम् ॥

क्रमाच्च गार्हपत्यादिकुण्डेष्वाघारमाचरेत् ।
कृत्वा जङ्गमबेरस्य नेत्रोन्मेषाधिवासने ॥

कुम्भं संस्थाप्य विधिना सप्तभिः कलशैः पुनः ।
सोपस्नानैश्च संस्नाप्य कुम्भं चापि प्रपूजयेत् ॥

तत्कुम्भोदिततीर्थैश्च विधिना प्रोक्षणादनु ।
हौत्रं प्रशंस्य चावाह्य निरुप्याज्याहुतीर्यजेत् ॥

बालालयप्रतिष्ठोक्तहोमं पूर्वं जुहोति च ।
इष्टका वा शिला वाथ स्नापयेत् कलशैस्तथा ॥

इष्टकाश्च पृथग्वेद्याम् अधिवास्य यथाविधि ।
प्रोक्तं यथेष्टकान्यासे तथा होमं समापयेत् ॥

शूलं वा शैलबेरं वा स्नापयेत् कलशैस्तथा ।
बद्ध्वा प्रतिसरं तद्वच्छयने शाययेत् पृथक् ॥

नृत्तैर्गीतैश्च वाद्यैश्च रात्रिशेषं निनीय च ।
प्रातः स्नात्वा विधानेन (सूक्तानि च जपेत् तथा ॥

मुहूर्ते समनुप्राप्ते) पूर्वं भूमिं परीक्ष्य च ।
कर्षयित्वा समास्तीर्य तृणं गोभ्यो निवेद्य च ॥

बालालये प्रतिष्ठाप्य पुनराद्येष्टकां न्यसेत् ।
गर्भगेहं विनिश्चित्य तद्घनं दृढकुट्टितम् ॥

अधिष्ठानावसानान्तं कल्पयित्वा तु तत्र वै ।
शूलं वा शैलबेरं वा स्थापयेत् पूर्ववत् सुधीः ॥

परितः पञ्जरं कृत्वा विमानं कल्पयेद्बहिः ।
अथवा यागशालायां मध्ये वेदीः पृथक् पृथक् ॥

बालालयेष्टकाशूलस्थापनार्थं तथैव च ।
तस्य तस्य मुखे सभ्यं कुण्डं कृत्वा पृथक् पृथक् ॥

कुम्भं संसाध्य संस्नाप्य हुत्वा संस्थापयेत् क्रमात् ।

३.३.४७ —— —— —— अशक्तविषया

क्रि. ३.३८-४१

☆एवं कर्तुमशक्तश्चेद्ध्रुवबेरं च कौतुकम् ॥

शैलं ध्रुवार्चाबेरं वा प्रतिष्ठाप्य समर्चयेत् ।
ब्रह्मादिपैशाचान्तेषु योगादीन् निक्षिपेत् क्रमात् ॥

☆ सद्यःप्रतिष्ठायां बालालयप्रतिष्ठोक्तक्रमेण

सर्वाङ्गसुन्दरं बेरं कृत्वा चोक्तप्रकारतः ।
अक्ष्युन्मेषाधिवासौ च कारयित्वा यथाविधि ॥

शूलस्थापनमार्गेण पूर्वं संस्थाप्य शिल्पिना ।
महाप्रतिष्ठामार्गेण प्रतिष्ठां पुनराचरेत् ॥

३.३.४८ —— —— —— एकबेरप्रतिष्ठा-

क्रि. ३.४२-४

एकबेरप्रतिष्ठां च सद्यः कर्तुं यदीच्छति ।
पूर्वोक्तेनैव मार्गेण रात्रौ होमं समाप्य च ॥

प्रातर्भूमिं परीक्ष्यैव कर्षयित्वा तथा भुवम् ।
घनभित्तिं च कृत्वा तु तत्र संकल्पयेत् पुनः ॥

पञ्जरं परितः कृत्वा विमानं कल्पयेत् बहिः ।

३.३.४९ —— बालालय - नित्यार्चन-

य. ५.३१

आवाहनविसर्गौ च विनैव विधिपूर्वकम् ।
नित्ये नैमित्तिके धीमान् विधिनैव समर्चयेत् ॥

स. ४.२६

ज्ञा. २४.४८

[अत्र पाद्यादिभिः पञ्चविंशत्या उपचारैः नित्यार्चनं विधीयते इति विशेषः ।]

नि. ५

वि. ४.२०

३.३.५० ——— ——— उत्सव-

क्रि. ३.२,३

उत्सवं कर्तुकामश्च प्रथमे तरुणालये ॥
ध्वजं बालालयाग्रे तु समारोप्योत्सवं चरेत् ।

नि. ५

३.३.५१ ——— उपयुक्तबालबिम्ब - विनियोग-

य. ५.१५

मूलस्थापनकाले तु गृहार्चां याचितं त्यजेत् ॥

४. वास्तुपूजनम्

३.४.१. आलयनिर्माण - वास्तुपूजन - पदकल्पन-

खि. ३.७०-८२

तद्दिने चैव सायं तु चरुमाहृत्य यत्नतः ।
पूर्वं देवं समभ्यर्च्य बालस्थानगतं हरिम् ॥

तां भूमिं समनुप्राप्य नवतन्तून् प्रसार्य च ।
प्रागग्रानुत्तराग्रांश्च चतुःषष्टि*पदं चरेत् ॥

ईशं चैव तु पर्जन्यं जयन्तं च विशेषतः ।
अर्चयेत्तु क्रमेणैव महेन्द्रादित्यसत्यकान् ॥

भृशान्तरिक्षावग्निं च प्राच्यां वै बाह्यसन्धिषु ।
पूजयित्वा विधानेन बलिं तत्र समर्पयेत् ॥

उष्णांशुपूषवितथान् गृहक्षतमतः परम् ।
यमं तथैव गन्धर्वं भृङ्गराजमृषिं तथा ॥

निर्ऋतिं दौवारिकं सुग्रीवं पुष्पदन्तं सरित्पतिम् ।
असुरं शोषणं रोगं जवनं च विशेषतः ॥

नागं मुख्यं च भल्लाटं सोममर्गलमेव च ।
अदितिं सूरिदेवं च विधिनैव विचक्षणः ॥

---

* यद्यपि खिलाधिकारे समूर्तार्चनाधिकरणे च पदानां चतुःषष्टिसंख्याकत्वं प्रतिज्ञातं तथापि गणनया ग्रन्थान्तरसंवादेन च एकाशीतिसंख्याकत्वं निर्णीयते ।

आग्नेयादि तथैशान्तं बाह्ये सन्धिषु चार्चयेत् ।
क्रमेण तु बलिं दद्यात् स्वनामपदपूर्वकम् ॥

ब्रह्मार्यमा दण्डधरः पाशभृद्धनदस्तथा ।
मध्ये पदे चतुर्दिक्षु पञ्चैतान् पूजयेत् क्रमात् ॥

सवितारं च सावित्रमाग्नेयं कोणमाश्रितौ ।
इन्द्रं चेन्द्रजयं चैव नैर्ऋतं कोणमाश्रितौ ॥

रुद्रं रुद्रजयं चैव वायव्यं कोणमाश्रितौ ।
आपं चैवापवत्सं च ऐशान्यं कोणमाश्रितौ ।
एते चाष्टौ तु कोणेषु द्वौ द्वौ पूज्यौ पृथक् पृथक् ॥

ब्रह्मा नवपदं भुङ्क्ते मध्ये तत्परितश्च वै ।
अर्यमाद्याश्च चत्वारः पृथक् षट्पदभोजिनः ॥

सवित्राद्यास्तथैवाष्टौ भुञ्जते द्वे पृथक् पृथक् ।
देवा द्वात्रिंशदीशाद्या एकैकपदभोजिनः ॥

स. ५. ९-२०

क्रि. २.५९

[अत्र एकाशीतिपदकल्पनं विधीयते इति विशेषः ।]

नि. ६

[अत्र चतुःषष्टिपदकल्पनम् एकाशीतिपदकल्पनं वा विधीयते इति विशेषः ।]

प्र. २. ६-१५ }
वि. ३.१५ } [अत्र क्रियाधिकारवत् ।]

३.४.२ ——— ——— पददेवताबलिदान-

खि. ३. ८३-५

चतुःषष्टिपदे पञ्चचत्वारिंशच्च देवताः ।
अन्तःसूत्राधिदेवांस्तान् स्थापयित्वा बलिं ददेत् ॥

सन्धौ सन्धौ बलिभुजः सन्धिष्वेतान् प्रकल्पयेत् ।
चरकी देवतारिश्च पूतना पापराक्षसी ॥

प्रागादि चोत्तरान्तस्थाः बाह्ये तासां बलिं ददेत् ।

स. ५.२१
[अत्र सक्त्वपूपैः बलिं दद्यादित्यधिकमिति विशेषः ।]

प्र. २.२७-९
[अत्र द्रोणं द्रोणार्धं वा तण्डुलान् दधिगुडाज्यसंयुक्तं पाचयित्वा ब्रह्मादीनां नमोऽन्तं स्वाहान्तं वा बलिं दद्यादिति विधीयते इति विशेषः ।]

वि. ३. १५,६
[अत्र एतेषां पञ्चचत्वारिंशद्देवानां प्रत्येकं द्विप्रस्थैस्तण्डुलैश्चरुं पक्त्वा गुडघृतदधियुक्तमुत्तमं, ब्रह्मणोऽर्यमादीनां चतुर्णां सावित्र्याद्यष्टानां मध्यमं, ब्रह्मण एकस्याधमम्, अन्येषां द्रोणैस्तण्डुलैरेकपात्रे चरुं पक्त्वा तत्तन्नाम्ना पूर्वमुदकं पुष्पं पश्चाद्बलिमुदकं दद्यात् इत्युच्यते इति विशेषः ।]

३.४.३ ——— ——— गर्भगृहप्रदेश - पददेवतार्चनादि-

खि. ३.८५-१०२

गर्भालयं समुद्दिश्य पञ्चसूत्राणि कल्पयेत् ॥

प्रागन्तं चोत्तरान्तं च सूत्रयुक्तं पदं चरेत् ।
नागं भूतं च यक्षं च दुर्गां घोटमुखीं तथा ॥

धात्रीं च वृषं चैव राक्षसं च ततः परम् ।
जयं कक्षं सुरुण्डं च शिवं प्राणं कविं तथा ॥

चक्रं च पुरुहूतं च विद्यां च यशसं तथा ।
भद्रां वेदभृतं चैव तापसं सिन्धुषामपि ॥

विद्यां चैव ततोऽभ्यर्चेदनन्त पाञ्चभौतिकम् ।
प्रागुदक्सूत्रसन्धिस्थान् पञ्च पञ्च पदार्थिनः ॥

शिवं विश्वं तथा मित्रमत्रिं चैवार्चयेत् क्रमात् ।
बिम्बस्य पृष्ठतश्चापि प्रादक्षिण्यक्रमेण तु ॥

कुस्तुरुण्डाय गर्भाय वरुणाय धनाय च ।
कालायेति च मन्त्रज्ञो दक्षिणे सम्यगर्चयेत् ॥

दहनाय च विघण्टाय पवनाय मुदाय च ।
गोलकाय च मन्त्रेण पश्चिमे सम्यगर्चयेत् ॥

महिषघ्नाय वेत्राय वेत्रसाराय चेत्यपि ।
कपोतकाय वै तुल्यवादिने चेति चोत्तरे ॥

फुल्लाय फुल्लरूपाय विघ्नायाविघ्नकारिणे ।
सर्वोद्वहायेति मन्त्री प्राच्यां सम्यक् प्रपूजयेत् ॥

किष्किन्धाय च तीर्थाय मोह्नायाथ दण्डिने ।
यूथकायेति मन्त्रेण अङ्कणेतोन्तकाय च ॥

स्पर्धघ्नाय च निघ्नाय सुखदाय हिताय च ।
अङ्कणस्य च मध्ये तु अर्चयित्वा बलिं ददेत् ॥

योऽजः पुरा इति शिष्टानां सर्वेषां च बलिं ददेत् ।
पिशाचेभ्यश्च भूतेभ्यः गणेभ्यश्च बलिं ददेत् ॥

सर्वं व्यपैतु जप्त्वा तु जलैः सर्वत्र सेचयेत् ।
पूर्वं स्थितेति मन्त्रेण सर्वान् देवान् प्रणम्य च ॥

पुष्पाञ्जलिसमायुक्तं तिललाजसमायुतम् ।
पृक्तं कृत्वा विशेषेण भक्ष्ययुक्तं च संहरेत् ॥

चरमं चर इति चोक्त्वा तु बलिं बाह्ये च कारयेत् ।
अस्तु स्वस्ति इति च जपन् जलैरास्राव्य सर्वतः ॥

शान्तं पश्चात्प्रणम्यैव गत्वा तु स्वगृहं तथा ।
वीशं चक्रं च तत्काले प्रणम्यैवानुमान्य च ॥

यजमानो गुरुश्चैव भुञ्जीत सह बान्धवैः ।
भगवच्चरितं पुण्यं श्रुत्वा रात्रिं व्यपोह्य च ॥

स. ५. २१-७

[अत्र कक्ष-सिन्धुषा-अनन्तानां स्थाने कृष्ण-सञ्जुषा-अमिता निर्दिश्यन्ते शिवविश्वादयो न निर्दिश्यन्ते इति अन्यदेवेभ्यश्च सामान्येन बलिदानं विधीयते इति च विशेषः ।]

ज्ञा. २२.४४

[अत्र वपुष-कक्ष-सुणुण्ड-चक्र-सिन्धुष-अनन्तानां स्थाने वपुर्षा-कृष्ण-मुरुण्ड-शुक्र सञ्जुषा-अमिताः निर्दिश्यन्ते इति पुरुहूतविद्ययोर्मध्ये ज्येष्ठा अधिकतया निर्दिश्यते इति च विशेषः ।]

क्रि. २. ५९-६३

[अत्र सक्त्वपूपैः बलिदानं विधीयते इति विशेषः ।]

वि. ३.१६

[अत्र कक्ष-सुरुण्ड-चक्र-अनन्तानां स्थाने कृष्ण-मुरुण्ड-शक्र-अमिताः निर्दिश्यन्ते इति एकपात्रे द्रोणार्धैस्तण्डुलैश्चरुं पक्त्वा बलिदानं विधीयते इति च विशेषः ।]

३.४.४ —— —— भूमियज्ञ-

खि. ३.१०३-८

पुनः प्रभाते धर्मज्ञः यजमानयुतो गुरुः ।
स्नात्वा स्नानविधानेन गत्वा तां भूमिमादरात् ॥

सूत्रोक्तेन विधानेन भूमियज्ञं समाचरेत् ।
पर्यग्निं चैव कृत्वा तु प्रोक्षणैः प्रोक्ष्य सर्वतः ॥

गर्भालयप्रदेशे तु पौण्डरीकं तु कारयेत् ।
आघारं विधिवत्कृत्वा अदितेऽन्वादिभिः क्रमात् ॥

परिषेकं तु कृत्वा तु कूर्चयुक्तेन वारिणा ।
जुहुयात् पौरुषं सूक्तं विष्णुसूक्तमतः परम् ॥

एकाक्षरादिसूक्तं च गोसूक्तं तदनन्तरम् ।
वैष्णवं च स्विष्टकृतं सर्वशान्तिर्भविष्यति ॥

अग्निं विसर्जयित्वा तु देवदेवं प्रणम्य च ।

ज्ञा. २२.४५

[अत्र वैखानससूत्रोक्तविधिना भूमियज्ञं हुत्वा पूर्वोक्तदेवता हुत्वा इत्येव निर्दिश्यते इति विशेषः ।]

अ. ३

स्नात्वा स्नानविधानेन यजमानयुतो गुरुः ।
श्वः कर्तास्मीति संचिन्त्य पूर्वेद्युर्देवमर्चयेत् ॥

तरुणालयस्याग्रतः प्रपां कृत्वातिसुन्दरम् ।
तन्मध्ये स्थण्डिलं कुर्यात् शालिपीठं प्रकल्पयेत् ॥

चक्रं दक्षिणतः स्थाप्य उत्तरे शैषिकं भवेत् ।
प्रमुखे गरुडं स्थाप्य व्रीहिभिः स्थण्डिलं भवेत् ॥

देवेशं गरुडं चक्रं शैषिकं च समर्चयेत् ।
हविर्भिः संनिवेद्यैव शयनं संप्रकल्पयेत् ॥

पञ्चभिः शयनं कृत्वा तु देवेशं च सुसंन्यसेत् ।
सूत्रबन्धं च कृत्वा तु देवेशं शयनं चरेत् ॥

शैषिकं गारुडं चाक्रं विधिना शयनं भवेत् ।
गरुडशैषिकयोर्मध्ये कुण्डं कृत्वा सलक्षणम् ॥

आघारं पूर्ववत् कृत्वा ब्राह्मं रौद्रं च वैष्णवम् ।
श्रीभूमिभ्यां मुनिभ्यां च इलादीनां च हूयते ॥

चाक्रं च शैषिकं हुत्वा गारुडं च सुहूयते ।

३.४.५ ——— ——— वास्तुपुरुषस्वरूप-

प्र. २.१६-९

वास्तुनः शिर ईशाने पादौ नैर्ऋतिके चरेत् ।
हस्तौ सरित्पतौ ज्ञेयौ अग्नौ बाहुरुदाहृतः ॥

अपे कण्ठ इति प्रोक्तं हृदयं चापवत्सके ।
नाभिर्ब्रह्मणि संख्याता कुक्षिः सवितृसंज्ञके ॥

इन्द्र इन्द्राजके गुह्यं ऊरुमूले विधानतः ।
पार्श्वं तु दक्षिणं प्रोक्तं वाममेवं प्रकल्पयेत् ॥

शेते वास्तुभुवं प्राप्य वास्तुदेवस्त्वधोमुखः ।

३.४.६ —— —— वास्तुपुरुषार्चन-

स. ५.२७,८

वास्तु स्वस्त्यस्तु सर्वत्र इत्युक्त्वा स्रावयेज्जलम् ॥

विसृज्य देवान् तत्रस्थमर्चयेद्वास्तुपूरुषम् ।

खि. ३.१०८

प्र. २. १९,२०

[अत्र पुण्याहवाचनं प्रोक्षणैः प्रोक्षणं पुष्पगन्धधूपदीपैः पूजनं प्रणवाद्यैः स्वनामभिर्नमस्करणं चाधिकमिति विशेषः ।]

३.४.७ —— —— शल्यपरीक्षण-

प्र. २. २१-७

पूजनान्ते स्पृशेत् कर्ता यमङ्गं तन्निरीक्षयेत् ।
वास्तुदेवेऽपि तत्रैव शल्यं ब्रूयाद्यथार्थतः ॥

अस्ति(स्थि) शल्यं शिरस्पर्शे तद्धस्तद्वयमानतः ।
कण्ठस्पर्शे गले चैव हस्तमात्रे समादिशेत् ॥

उपस्पर्शात् त्रिभिर्हस्तैः शृङ्खलाशल्यमादिशेत् ।
हस्तमात्रे करस्पर्शात् खट्वापादं समादिशेत् ॥

बाहुसंस्पर्शनात् कर्तुः अङ्गारं तु त्रिहस्ततः ।
गुल्मे(ल्फे?) सर्पादिभिर्दुष्टं वितस्तिद्वयमानतः ॥

पादे कण्टकमित्युक्तं षड्वितस्तिप्रमाणतः ।
कनिष्ठाङ्गुष्ठयोः स्पर्शात् हस्तं तत्र समाचरेत् ॥

व्ययाधिके चतुर्हस्ते जानुस्पर्शात् ततः परम् ।
शल्यं विशोध्य भूमिं तां तलं कृत्वा समांनतः ॥

पञ्चगव्येन संप्रोक्ष्य वास्तुदेवान् प्रपूजयेत् ।

३.४.८ —— —— ब्रह्मपद्मविधि- काल-

ज्ञा. २२.४३

कार्तिक्यां मार्गशीर्षे मासे ब्रह्मपद्मविधिं कारयेत् ।

३.४.९ —— —— —— शुभाशुभपरीक्षार्थक-

खि. ३. १०९-२३

द्वात्रिंशत्प्रस्थसंपूर्णं नवं कुम्भं प्रगृह्य च ।
सूत्रेण वेष्टयित्वालंकृत्य चाङ्कुरपल्लवैः ॥

नादेयं जलमादाय पूरयित्वा विधानतः ।
वरुणं पाशभृतं वीरमुदकपमिति ब्रुवन् ॥

अर्चयेद्वारुणं कुम्भे चतुर्मूर्तिविधानतः ।
अधिवासं ततः कृत्वा रात्रिशेषं व्यपोह्य च ॥

पुनः प्रभाते धर्मात्मा यजमानयुतो गुरुः ।
गर्भालयोद्दिष्टभूमिं समासाद्य प्रयत्नतः ॥

तत्रैव ब्रह्मणो भागे अवटं चैव खानयेत् ।
एकहस्तप्रमाणेन विस्तारं च चतुर्दिशम् ॥

हस्तप्रमाणेन निम्नं खानयेत्तु विचक्षणः ।
त्वां खनामीतिमन्त्रेण प्राङ्मुखस्त्वेव खानयेत् ॥

अवटाद्बहिरुत्क्षिप्य मृदं तामभिमन्त्रयेत् ।
पांसून् प्रेष्यामिमन्त्रेण मृदं खातां पुनः क्षिपेत् ॥

अधिकेऽभ्युदयः प्रोक्तः हीने चाशुभमुच्यते ।
परीक्ष्य तु ततः पश्चात् कुम्भं तत्रैव संनयेत् ॥

उत्फुल्लं पद्ममादाय तत्काले गुरुरत्वरः ।
यः सखा इति मन्त्रेण विष्वक्सेनं समर्चयेत् ॥

त्वं सर्वेति जपन्मत्रं विष्वक्सेनं प्रणम्य च ।
सुक्र(त्रा?)मा इति च तत्काले कुम्भं स्पृष्ट्वाभिमन्त्रयेत् ॥

सर्वा वरुणमन्त्रेण कुम्भमादाय वै बुधः ।
पातु मां वरुणो रक्त इति खातं प्रपूरयेत् ॥

पद्ममादाय हस्ताभ्यामायातु भगवानिति ।
अवटस्थे जले क्षिप्त्वा निमित्तं चैव लक्षयेत् ॥

दक्षिणावर्तकं स्याच्चेत् सर्वसंपत्करं भवेत् ।
वामावर्तं यदि भवेत् प्रायश्चित्तं हुनेत् क्रमात् ॥

जुहुयात् पौरुषं सूक्तं विष्णुसूक्तमतः परम् ।
जयाद्यैरपि हुत्वा तु यद्देवाद्येस्ततः परम् ॥

व्याहृतीभिश्च हुत्वा तु अन्तहोमं च कारयेत् ।
सर्वदोषोपशमनं सर्वकर्मसमृद्धिदम् ।
तस्मात् सर्वप्रयत्नेन देवकार्यं समाचरेत् ॥

स. ५. २८-३६

ज्ञा. २२. ४४,५

[अत्र अब्जे वामावर्ते याम्यगे कुटिले स्फुटिते स्तब्धे विदिग्गते अधरोत्तरे अधोमुखे वा अनर्थान्तरं कर्मकर्तुः मृत्युश्चेति, तोये आस्थापिते पांसुच्छन्ने

सबुद्बुदे फेने क्षिप्रनाशे सशब्दे वा अनर्थान्तरं कर्मकर्तुः मृत्युरिति च निर्दिश्यते इति विशेषः ।]

अ. ३

[अत्र पद्मेन सह करवीरस्य उत्पलस्य अन्यस्य वा तदर्हस्य पुष्पस्य आहरणं विधीयते इति विशेषः ।]

क्रि. २. ६३,४

नि. ६

[अत्र पद्मस्य चतुर्दिग्गतत्वे शुभदत्वं कोणगतत्वे वामावर्तत्वे अधोमुखत्वे चाशुभदत्वं चोच्यते इति विशेषः ।]

३.४.१० ——— ——— पाञ्चभौतिकनिमित्तपरीक्षण-

ज्ञा. २२.४५

तस्मिन्नहनि☆ विद्युत्स्तनितोल्कानिपातब्रह्मदण्डध्वजधूमकेतुप्रतिसूर्येन्द्रचापादिदर्शने कुम्भभङ्गे प्रतिमादिविरूपणे च महदनर्थसूचकं भवति । अत्र शोभनं तत्काले दिग्गतः सौम्यो विदिग्गतः पापकृदैशान्यगो नीलगः शुभदो भ्रामकश्चण्डकश्चण्डो भवति । तत्कालस्थापितो दीर्घदीपश्चञ्चलो वामावर्तो विदिक्शिखसधूमः सर्वदोषकृत् । सौम्योऽचञ्चलश्चारुदर्शनो दीप्तोर्ध्वशिखश्च आयुःसर्वसंपत्समृद्धिदश्च । एवं पञ्चभूतगतान् शुभाशुभान् परिज्ञाय अशुभदर्शने शान्तिं हुत्वा शुभावहश्चेत् समारभेतेति विज्ञायते ।

☆ ब्रह्मपद्मविधिदिने

५. आद्येष्टकान्यासः

३.५.१ आलयनिर्माण - आद्येष्टकान्यास - काल-

खि. ४.१-८

अतः परं प्रवक्ष्यामि वास्तुनः प्रथमेष्टकाम् ।
अयनं चोत्तरं श्रेष्ठं दक्षिणं त्वापदि स्मृतम् ॥

मासानां फाल्गुनं श्रेष्ठं चैत्रं वैशाखमेव च ।
मार्गशीर्षकमाघौ द्वौ निन्दितौ ब्रह्मणा पुरा ॥

शेषेष्वपि च कर्तव्यं त्वरितेनेति मे मतिः ।
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ॥

न हि प्रतीक्षते मृत्युः कर्तव्यो धर्मसंग्रहः ।
तस्मात् सर्वप्रयत्नेन देवकार्यं समाचरेत् ॥

त्रिषूत्तरेषु रोहिण्यां हस्ते स्वात्यां पुनर्वसौ ।
श्रवणे वारुणे चैव मैत्रे सौम्ये तथैव च ॥

शुभर्क्षे देवकार्याणि समारभ्य समःपयेत् ।
तथा युग्माश्च तिथयः प्रशस्ता विष्टिवर्जिताः ॥

गुरुशुक्रबुधेन्दूनां वाराश्चैव सुशोभनाः ।
चरराशिं वर्जयित्वा स्थिरराशौ तु कारयेत् ॥

ग्रामस्य यजमानस्य चानुकूले दिने चरेत् ।

स. ६.१-७

[अत्र मार्गशीर्षमाघयोरपि त्वरितस्य आद्येष्टकान्यासः कैश्चित् विधीयते इति निर्दिश्यते इति विशेषः ।]

ज्ञा. ३०.५८

[अत्र मासतिथिवारनक्षत्राणि विशिष्य न निर्दिष्टानीति विशेषः ।]

अ. ४

[अत्र उत्तरायणं श्रेष्ठमिति माघमासः चरलग्नं च वर्ज्यमिति च निर्दिश्यते इति विशेषः ।]

नि. ६

[अत्र अर्चनाधिकारवत्]

य. ६. १,२

[अत्र चैत्रमासो निषिद्धः, तिथिवारनक्षत्राणि च न निर्दिष्टानि इति विशेषः ।]

वा. ३

वि. ६.२४

[अत्र फाल्गुन-चैत्र-वैशाख-तिष्य-ज्येष्ठमासाः उत्तमाः, श्रावण-आषाढ-कार्तिक-आश्वयुजः मासाः मध्यमाः, शेषाः अधमाः इति निर्दिश्यते इति कृष्णपक्ष स्यान्त्यभागः निषिध्यते इति च विशेषः ।]

३.५.२ —— —— अङ्कुरार्पण-

खि. ४.८,९

तस्मात्☆ तु दिवसात् पूर्वं नवमे वाथ सप्तमे ॥

☆ आद्येष्टकान्यासार्थं संकल्पितात् ।

पञ्चमेऽहनि वा कुर्यात् विधिना चाङ्कुरार्पणम् ।

ज्ञा. ३०.५८

[अत्र आद्येष्टकान्यासात् पूर्वदिने अङ्कुरार्पणं विधीयते इति विशेषः ।]

अ. ४

[अत्र काश्यपज्ञानकाण्डवत् ।]

य. ६.७

[अत्र प्रतिष्ठोक्तक्रमेण अङ्कुरार्पणमात्रं विधीयते इति विशेषः ।]

वि. ६.२६

अत्र यज्ञाधिकारवत् ।

३.५.३ —— —— भूखनन-

वि. ६.२५

तत्पश्चिमे मेदिनीति मन्त्रेण जलान्तं शिलान्तं वा खनित्वा शल्यानपोह्य वालुकाभिरापूर्य हस्तिपादेन दृढं कृत्वा सप्ताहेऽतीते तत्खातं पञ्चधा कृत्वा त्रिभागावसाने चोत्तमं द्विभागावसाने मध्यमम् एकभागावसाने चाधमं तस्मिन् शिलां वा (अथ) इष्टकां वा विन्यसेत् ।

स. ६.७-९

[अत्र उत्तमादिभेदगणनं नास्तीति विशेषः ।]

अ. ४

[अत्र समूर्तार्चनाधिकरणवत् ।]

खि. ४.९-११
[अत्र पूर्ववत् ।]

नि. ६
[अत्र पूर्ववत् ।]

प्र. ३.३०-२
[अत्र पूर्ववत् ।]

य. ४.१३-८; ६.३
[अत्र दशाहान्ते इष्टकान्यासो विधीयते इति विशेषः ।]

वा. ३
[अत्र समूर्तार्चनाधिकरणवत् ।]

३.५.४ ——— ——— आद्येष्टका - उपादानद्रव्य-

प्र. ४.१,२

अथातः संप्रवक्ष्यामि वास्तुनः प्रथमेष्टकाम् ।
साधयित्वा पूर्वरात्रौ चतस्रः प्रथमेष्टकाः ॥

शिलायां मृण्मये वाथ कुर्याल्लक्षणसंयुताः ।
शैला दोषविनिर्मुक्ताः सुपक्का अथ मृण्मयाः ॥

खि. ४.१२
वा. ३

य. ६.४

शिलां वा चेष्टकां वाथ कारयेत् प्रथमेष्टकाम् ।
इष्टकेष्टकया चेत्तत्★ शिला चेच्छिलया बुधः ॥

३.५.५ —— —— —— मान-

स. ६.१०,१

तालोन्नता हस्तमात्रचतुरश्राः शिलाः शुभाः ।
हस्तायामार्धविस्तारा भागोत्सेधाश्च शोभनाः ॥

इष्टका वाथ संगृह्य- - - - - - - - - - - - -।

अ. ४

विधिवत् शैलजं ग्राह्यं षोडशाङ्गुलमायतम् ।
तदर्धं विस्तृतं चैव उत्सेधं चतुरङ्गुलम् ॥

खि. ४.१२-६

वक्ष्यमाणेन विधिना शिलासंग्रहणं चरेत् ॥

जर्जरीश्च (?) समाहृत्य इष्टका वाथ संभरेत् ।
हस्तं हस्तद्वयं वापि त्रिहस्तं वा यथार्हतः ॥

आयतं चतुरश्रं वा घनं युक्त्या तु कारयेत् ।
तालं तालद्वयं वापि त्रितालं वा समाहरेत् ॥

उन्नतं भागमुद्दिष्टम् इष्टकानामितीरितम् ।
मुखं पृष्ठं तथा ज्ञात्वा अग्रं पादं तथैव च ॥

★ निर्मास्यमानः आलयः इष्टकया चेत् ।

विधिं विदित्वा धर्मात्मा शिल्पिभिः कृतनिश्चयः ।

नि. ६

मानाङ्गुलेन सप्तादि चतुर्विंशदङ्गुलात् (?) ।
अ(व?)र्धयेद्गोलकं चैव मार्गेण घटितस्य च (?) ॥

तदस्थं(र्धं?) समृ(विस्तृ?)तं प्रोक्तं विस्तरार्धं स(घ?)नं भवेत् (?) ।
तत्सहस्तं सविस्तारं तस्माद्द्विगुणमायतम् ॥

विस्तरार्धं घनं तत्र केचिदाहुर्मनीषिणः ।

प्र. ४.३,४

विस्तारेणेष्टकाः प्रोक्ताः षट्पञ्चचतुरङ्गुलाः ।
उत्तमादिक्रिया(क्रमा ?)देव विस्तारद्विगुणायताः ॥

विस्तारार्धं घनं प्रोक्तम् इष्टकानां प्रमाणतः ।

य. ६.५,६

मानाङ्गुलेन धात्रादित्रयोविंशतिकावधि ।
वर्धयेद्विभवेनैव संदद्यादीर्घमुच्यते ॥

तदर्धं विस्तृतं प्रोक्तं विस्तारार्धं घनं भवेत् ।
मुखं पादौ विदित्वा तु संज्ञां कृत्वाऽऽकृतौ स्मृतम् ॥

वि. ६.२५

तयोर्लक्षणं युग्मायुग्महस्तविमानानां तद्धस्तं प्रतित्र्यङ्गुलं द्व्यङ्गुलं वा वर्धयेत् । अङ्गुलिसंख्यासमायामं तस्यार्धविस्तारम् अर्धबाहुल्यम् अथवा त्र्यङ्गुलोद्येकादशाङ्गुलान्तमेकाङ्गुलवृद्ध्या विस्तारं नवधा भवति, तदर्धबाहुल्यविस्तारं द्विगुणायतम् एवं चतस्रः शिला वा अथेष्टका वा आग्रपादं मुखं पृष्ठं च संलक्ष्यैव आहरेत् ।

३.५.६ —— —— आद्येष्टकाकल्पन-

ज्ञा. २९.५६

सस्यक्षेत्रे नदीतीरे वा एकभागं पुलिन्दं द्विभागं वालुकां तत्समं ग्रावादिकमेवं संशोध्य काष्ठलोष्टतृणशिलादिवर्जितं श्लक्ष्णं जलेन संमर्द्य बहुदिनपर्युषितमृजुं चिक्कणमौर्जमेवं समादाय कृमिकीटमक्षिकाद्यसङ्कुले समन्तात् जलविमुक्ते मनोरमे शुद्धे अवकाशे अच्छाये विवर्जिते यमविस्तारान् द्विगुणायामान् भागोच्छ्रितान् सुदृढान् लघुतरनिर्मितान् भूमिकान् कृत्वा तैः पृथक् पृथक् विश्वामित्राद्यस्पृष्टाः केशास्थिलोष्टपाषाणशर्कराद्यसंश्लिष्टाः खण्डस्फुटितविहीनाः चतस्रः समाश्चेष्टकाः कल्पयित्वा आतपेनाशोष्य विविक्ते जनवर्जिते महाछु(चु?)ल्लीं प्रकल्प्य अग्निनोद्दीप्य विमानसीम्नो बाह्ये स्थापयित्वा आरभेत । एवं तरुपाषाणेष्टकाः संगृह्य नवमार्गेषु एकमालम्ब्य यथाशक्त्यारभेत ।

नि. ६

याज्ञिकैः दारुभिः कुर्यात् घटिका शिल्पिना शुभम् ॥

पूर्वोक्तेनैव मार्गेण घटिकस्यान्तरं भवेत् ।
मृदं सवालुकाशुद्धं(?)मध्यं चैव शनैः शनैः ॥

घटिकायां सुसंन्यस्य इष्टकामेव कारयेत् ।
प्राङ्मुखः प्रयतो भूत्वा महीसूक्तं समुच्चरन् ॥

मध्यमे पार्श्वयोश्चैव रेखामार्जवसंयुताम् ।
कल्पयेन्मध्यमे रेखा पुमानेव समाचरेत् ॥

स्त्रीरेखा दक्षिणे पार्श्वे वामे रेखा नपुंसकम् ।
वामेनैव समादाय दाहयित्वा तु शोभनाम् ॥

अ. ४

३.५.७ ——— ——— शैलेष्टकाकल्पन-

अ. ४

प्राच्यां शिरः प्रकल्प्यैव पादः पश्चिमतो भवेत् ।
अधोमुखं च कृत्वा तु पृष्ठमूर्ध्वमुदाहृतम् ॥

यन्मुखं देवतागारं तन्मुखं तु शिरो भवेत् ।
एवं वै विधिना ग्राह्य ज्ञात्वा चैव सुलक्षयेत् ॥

एवं वै विधिना कृत्वा शिलापञ्चकसंभवम् ।
एवं तु शैलजं ग्राह्यं छेदनं शिल्पिना भवेत् ॥

३.५.८ ——— ——— आद्येष्टका - जलाधिवास-

स. ६.११

---------------वारुणेनैव मन्त्रतः ।
जलाधिवासं कुर्वीत त्र्यहमेकाहमेव वा ॥

अ. ४

खि. ४.१६,७

[अत्र 'पञ्चाह'मिति 'अथवा नाडिकाः पञ्च' इति च अधिकमिति विशेषः ।]

नि. ६
वि. ६.२६

३.५.९ ——— ——— ——— धान्याधिवास-

ज्ञा. ३०.५८

सभ्यादक्षिणे धान्योपरि वासांस्यास्तीर्य इष्टकाश्च शिला वा संस्थाप्य अभ्यर्च्य वस्त्रेणाच्छाद्य- - - - - - ।

३.५.१० ——— ——— ——— शय्याधिवास-

स. ६.२०-५

मध्ये मण्डलमालिप्य चतुरश्रं समन्ततः ।
पञ्चवर्णैरलंकृत्य धान्यान्यपि विकीर्य च ॥

धान्योपर्युपधानेन वासांस्यास्तृणुयात् क्रमात् ।
ताः शिला वेष्टका वाथ सप्तभिः कलशैस्ततः ॥

पुर आहवनीयस्य स्थापयेच्च विधानतः ।
वस्त्रैरावेष्ट्य ताः सर्वाः चतुर्वेदाधिदेवताः ॥

चतुर्वेदमयाश्चैव चतुरश्राः शिलाः शुभाः ।
वस्त्रे वस्त्रे पृथक् दिक्षु वेष्टका वाथ संन्यसेत् ॥

- - - - - - - - - - - - - - - - - ।
शाययित्वैव ताः सर्वाः मन्त्रेण विधिकोविदः ॥

वस्त्रेणोपरि संछाद्य प्रत्येकं पुष्पसंयुतम् ।

अ. ४

[अत्र सभ्यस्य दक्षिणे पार्श्वे पञ्चभिः शयनकल्पनम्, इष्टकाभिः सह देवेशस्य शायनं चाधिकमिति विशेषः ।]

क्रि. ५.६-९

[अत्र सभ्यस्य पश्चिमायां शयनकल्पनमिति विशेषः ।]

खि. ४.२६-३३

[अत्र सभ्यस्य दक्षिणपार्श्वे शयनकल्पनं विधीयते इति विशेषः ।]

नि. ६

[अत्र इष्टकाभिः सह देवस्य शायनमधिकमिति विशेषः ।]

प्र. ४.७

य. ६.१०

वि. ६.२६

३.५.११ —— —— प्रतिसरबन्धन-

अ. ४

पुण्याहं वाचयेत्तत्र सूत्रबन्धनमाचरेत् ।

स. ६.२४

क्रि. ५.८

नि. ६

प्र. ४.७

य. ६.१०

वि. ६.२६

३.५.१२ —— —— भूमियज्ञ-

य. ६.९

-------------भूमियज्ञं च कारयेत् ।

अग्निं संसाध्य विधिवत्-------------॥

प्र. ४.६

३.५.१३ ——— ——— आद्येष्टकास्नापन-

अ. ४

तरुणालयस्य चाग्रे तु प्रपां कृत्वातिसुन्दरम् ।।

चतुर्हस्तप्रमाणेन मध्यवेदिं प्रकल्पयेत् ।
तालमात्रसमुत्सेधं तलं कृत्वातिसुन्दरम् ।।

गोमयेनोपलिप्यैव सर्वालङ्कारसंयुतम् ।
- - - - - - - - - - - - - - - - -।।

ऐशान्ये चोत्तरे वापि स्नपनालयमाचरेत् ।
लोहपात्रे सुसंग्राह्य इष्टकां च सुसंन्यसेत् ।।

तरुणालयेऽर्चितं देवं स्नानालयमुपाव्रजेत् ।
श्वभ्रमध्ये स्थितं देवं दक्षिणे चेष्टकां न्यसेत् ।।

अर्चयित्वा तु देवेशं कूर्चं सम्बन्धमाचरेत् ।
कलशं पञ्चविंशच्च द्रव्यन्यासं च कारयेत् ।।

स्नापयित्वा विधानेन इष्टकाप्रोक्षणं भवेत् ।
प्लोतवस्त्रोत्तरीयाद्यैरर्चयित्वा यथाक्रमम् ।।.

क्रि. ५.५,६

[अत्र आहवनीयाग्नेः प्राच्यां श्वभ्रे सप्तकलशैः प्रागादिक्रमेण इष्टकानां स्नापनं विधीयते इति विशेषः ।]

नि. ६

[अत्र स्नपनश्वभ्रकल्पने ऐशान्यम् अभिमुखं वा निर्दिश्यते इति विशेषः ।]

प्र. ४.६,७

[अत्र स्नापनं सप्तभिः कलशैरिति विशेषः।]

य. ६.९,१०

[अत्र प्रकीर्णाधिकारवत् ।]

वि. ६.२६

[अत्र प्राच्यामैशान्यां स्नानश्वभ्रकल्पनमिति चतुर्दशकलशैः स्नापनमिति च निर्दिश्यते इति विशेषः ।]

३.५.१४ ——— ——— होम-

स. ६.१२-९

ततः प्रपां च कृत्वैव प्रमुखे दक्षिणेऽथ वा ।
पूर्वस्मिन्नेव दिवसे रात्रौ होमं समाचरेत् ॥

सूत्रे वैखानसे प्रोक्तं वास्तुहोमं यजेत् तथा ।
वालुकोपरि तत्स्थाने पर्यग्निं चापि कारयेत् ॥

प्राच्यामाहवनीयस्याप्यन्वाहार्यस्य दक्षिणे ।
प्रतीच्यां गार्हपत्यस्य चावसथ्यस्य चोत्तरे ॥

सभ्याग्नेर्मध्यमे चैव पञ्चाग्नीनां पृथक् पृथक् ।
मृदा वा सिकताभिर्वा कुण्डान्येवं प्रकल्पयेत् ॥

उक्तेनैव विधानेन तेष्वाघारं समाचरेत् ।
आघारान्ते च होतव्यं पञ्चस्वग्निषु वैष्णवम् ॥

होतव्यं पौरुषं सूक्तमैन्द्रमाहवनीयके ।
आग्नेयं च विधानेन व्याहृत्यन्तं प्रति प्रति ॥

अन्वाहार्ये विष्णुसूक्तं याम्यं नैर्ऋतिसंयुतम् ।
वैष्णवं गार्हपत्ये च वारुणं वायुदैवतम् ॥

सौम्यमीशानदैवत्यमावसथ्ये च वैष्णवम् ।
सभ्ये च सर्वदैवत्यं विष्णुसूक्तं च वैष्णवम् ॥

क्रि. ५. १-५

ज्ञा. ३०.५८

प्रभाते प्राच्यां दक्षिणे वा प्रपां कृत्वा उत्तरे पूर्ववद्रात्रौ वास्तुहोमं हुत्वा प्रपायां पञ्चाग्नीन् समुपकल्प्य सूत्रोक्तविधिना आघारान्ते वैष्णवं हुत्वा ऐन्द्रमाहवनीये अन्वाहार्ये आग्नेयं याम्यं नैर्ऋतं गार्हपत्ये वारुणं वायुदैवत्यम् आवसथ्ये सौम्यमैशानं सभ्ये शान्तिं हुत्वा-------------अग्निं परिस्तीर्य वैष्णवं श्रीभूमिदैवत्यं हुत्वा------------॥

अ. ४

पञ्चाग्नीन् कारयित्वाथ आघारं पूर्ववच्चरेत् ।
- - - - - - - - - - - - - - - - -।
विष्णुसूक्तं च हुत्वा तु ऐन्द्रमाग्नेयसंयुतम्॥

एवं प्रधानान् हुत्वा तु ऐन्द्रे चाहवनीयके ।
पुरुषसूक्तं ततो हुत्वा याम्यं नैर्ऋतमेव च ॥

अन्वाहार्ये सुहोतव्यं प्रधानं च पृथक् भवेत् ।
वैष्णवं दौर्गिकं सूक्तं वायव्यं वारुणं तथा ॥

पश्चिमे गार्हपत्ये तु एवं वै जुहुयात् बुधः ।
ध्रुवसूक्तं ततो हुत्वा सौम्यमीशानसंयुतम् ॥

उत्तरे चावसथ्याग्नौ प्रधानं च सुहूयताम् ।
वैष्णवं च ततो हुत्वा श्रीभूमिभ्यां समायुतम् ॥

एकाक्षरादिसूक्तं च चक्रशैषिकसंयुतम् ।
गारुडेन समायुक्तं हुनेत् सभ्याग्निकुण्डके ॥

पौण्डरीके विधानेन आदिशान्तिं हुनेत् बुधः ।
एवं प्रधानमन्त्रैश्च जुहुयुश्च यथाक्रमम् ॥

नृत्तगीतैश्च वाद्यैश्च रात्रिशेषं नयेद्गुरुः ।

खि. ४.१७-२६,३३,४
प्रपां च तत्र कुर्वीत पूर्वस्मिन् दक्षिणेऽथ वा ॥

प्राच्यामाहवनीयं तु अन्वाहार्यं तु दक्षिणे ।
गार्हपत्यं प्रतीच्यां तु आवसथ्यमथोत्तरे ॥

मध्ये सभ्यं च कुर्यात्तु किंचित्पूर्वसमाश्रिते ।
नादेयैः सर्वयत्नेन शीतैः क्लिन्नैश्च वालुकैः ॥

औपासनविधानेन कुर्यादाहवनीयकम् ।
धनूरूपं च याम्ये तु कुण्डं स्यात् वारुणे तथा ॥

त्रिकोणं चोत्तरे कुर्यादग्निकुण्डं सलक्षणम् ।
सभ्यस्थानीयमथवा मध्ये श्रामणकं चरेत् ॥

वास्तुकल्पोक्तविधिना वास्त्वग्निं परिकल्पयेत् ।
सूत्रोक्तेन विधानेन आघारं सम्यगाचरेत् ॥

आघारान्ते च जुहुयात् सूक्तं सर्वत्र वैष्णवम् ।
होतव्यं पौरुषं सूक्तमैन्द्रमाहवनीयके ॥

आग्नेयं वैष्णवं सूक्तं याम्यं नैर्ऋतसंयुतम् ।
दक्षिणाग्नौ तु जुहुयात्तत्तद्देवमनुस्मरन् ॥

वारुणे वैष्णवं हुत्वा वारुणं वायुदैवतम् ।
सौम्ये तु सर्वदैवत्यं(?) सौम्यमैशान्यसंयुतम् ॥

मध्ये तु सर्वदेवत्यं जुहुयात् तु विधानतः ।
- - - - - - - - - - - - - - - - ।
पश्चात्☆ तु परिषिच्याग्निं अदितेऽन्वादिभिः क्रमात् ॥

पूर्वोक्तेनैव मन्त्रेण प्रत्येकं चैकविंशतिम् ।
जुहुयात् तु विधानेन तं तं देवमनुस्मरन् ॥

नि. ६

तरुणालयस्य परितः प्रपां वा मण्डपं तु वा ।
तालोत्सेधं चतुर्हस्तं प्रमाणं चतुरश्रकम् ॥

गोमयेनोपलिप्यैव मध्ये वेदिं प्रकल्पयेत् ।
आलयस्योत्तरे पार्श्वे वास्तुहोमं सुहूयताम् ॥

तद्वेदिं परितः पश्चात् अग्निकुण्डानि कल्पयेत् ।
- - - - - - - - - - - - - - - - - - - ।
जुहुयादाहवनीयाग्नौ विष्णुसूक्तं न(स ?)वैष्णवम् ॥

ऐन्द्रमाग्नेयसंयुक्तं व्याहृत्यन्तं प्रति प्रति ।
जुहुयात् पौरुषं सूक्तं आज्ये तैलं(?) तथैव च ॥

दक्षिणाग्नौ विशेषेण व्याहृत्यन्तं तथा यजेत् ।
पश्चिमे गार्हपत्याग्नौ दुर्ग(?)सूक्तं सवारुणम् ॥

व्याहृत्यन्तं सुहुत्वा तु जुहुयात् तन्त्रवित्तमः ।
उत्तरे चावसथ्ये तु ध्रुवसूक्तं सुहूयताम् ॥

सौम्यं रौद्रं सुहोतव्यं व्याहृत्यन्तं क्रमेण वै ।
सभ्ये चैकाक्षरं सूक्तं वैष्णवं च सुहूयताम् ॥

☆ शयनाधिवासात् परम् ।

श्रीसूक्तं च महीसूक्तं चक्रं शैषिकमेव च ।
गारुडं मूर्तिभिः मन्त्रैः हुत्वा चैव यथाक्रमम् ॥

नृत्तैर्गेयैश्च वाद्यैश्च रात्रिशेषं नयेद्बुधः ।

प्र. ४.४-६, ८,९

आलयाभिमुखे चैव प्रपां कृत्वा विचक्षणः ॥

तन्मध्ये वेदिकां कृत्वा हस्तमात्रप्रमाणतः ।
विस्तारं तत्समं चैवमुत्सेधं तु तदर्धकम् ॥

सभ्याग्निं विधिवत् कृत्वा विधिनाघारमाचरेत् ।
- - - - - - - - - - - - - - - - - - ॥

हुत्वा तु पौरुषं सूक्तं विष्णुसूक्तमतः परम् ।
चतुर्वेदादिमन्त्रांश्च श्रीभूसूक्ते यजेत् क्रमात् ॥

इष्टका वा शिला वाथ तन्नामाद्यक्षरं स्मरेत् ।
नृत्तैर्गेयैश्च वाद्यैश्च रात्रिशेषं नयेत् क्रमात् ॥

य. ६.११,२

हुत्वा तु वैष्णवं मन्त्रं विष्णुसूक्तमतः परम् ।
चतुर्वेदादिमन्त्रांश्च श्रीसूक्तं च सपौरुषम् ॥

सहव्याहृतिकं हुत्वा पावकं संप्रणम्य च ।
सवेदाध्ययनाद्वाद्यान्नृत्तगेयान्नयेन्निशाम् ॥

वा. ३

इष्टका वाथ संगृह्य प्रतिष्ठोक्तविधानतः ॥

पञ्चाग्नीन् परिकल्प्यैव त्रेताग्नीन् वाथ कारयेत् ।
आघारादीनि सर्वं च वास्तुहोममधिवासनम् ॥

एतैः सर्वक्रियां चैव अत्रिणोक्तक्रमाच्चरेत् ।

वि. ६.२६,७

हौत्रं प्रशंस्य पुरुषादिचतुर्मूर्तीः रन्तेशं विष्णुं दिग्देवांश्चावाह्य जुष्टाकारं स्वाहाकारं च हुत्वा देवं ध्यायन् आहवनीये पुरुषसूक्तमैन्द्रमाग्नेयं वैष्णवं च अन्वाहार्ये विष्णुसूक्तं ब्राह्मं याम्यं नैर्ऋतं च गार्हपत्ये वैष्णवम् एकाक्षरादीन् वारुणं वायव्यं च आवसथ्ये वैष्णवं रुद्रसूक्तं सौम्यं रौद्रं च प्रत्येकं दशकृत्वो जुहुयात् ।

३.५.१५ —— आद्येष्टकान्यासप्रकार-

अ. ४

ततः प्रभाते धर्मात्मा यजमानयुतो गुरुः ।
स्नात्वा स्नानविधानेन देवालयमुपाव्रजेत् ॥

प्रदक्षिणं ततः कृत्वा शयनस्थानमाविशेत् ।
शयनादुद्धृतं देवमर्चयित्वा विधानतः ॥

मुहूर्ते समनुप्राप्ते दैवज्ञमभिपूजयेत् ।
आचार्यं पूजयित्वा तु वस्त्राभरणकुण्डलैः ॥

अङ्गुलीयकसंयुक्तं प्रत्येकं तु पृथक् पृथक् ।
पद्मरागं च वज्रं च वैडूर्यं मौक्तिकं तथा ॥

गोमेदं स्फटिकं चैव नीलकं रजतं च सु(?) ।
तद्रत्नं च सुसंगृह्य लोहपात्रे सुसंन्यसेत् ॥

सौवर्णं राजतं ताम्रमायसं त्रपुसं(त्रापुषं?) तथा ।
मनःशिला हरितालमञ्जनं श्याममेव च ॥

सौराष्ट्रं राजतं चैव गैरिकं भारतं भवेत् ।
शालिव्रीहियवा मुद्गतिलमाषप्रियङ्गवः ॥

गोधूमाः सर्षपाश्चैव निष्पावाश्च कुलुत्थकम् ।
पृथक् पृथक् सुसंगृह्य चैकपात्रे सुसंग्रहेत् ॥

अथ स्थानं प्रविश्यैव गर्भागारं च निर्दिशेत् ।
सूत्रेण सूचयित्वा तु पदभागं विभज्य च ॥

द्वारस्य दक्षिणे भागे इष्टकां च सुसंन्यसेत् ।
प्रविश्य शयनस्थानं देवेशं च समुद्धरेत् ॥

इष्टकाश्च समुद्धृत्य रत्नादीनि समुद्धरेत् ।
छत्रपिञ्छवितानाद्यैः चामरैरभिवीजयेत् ॥

धूपदीपसमायुक्तं तोयधारासमायुतम् ।
नृत्तगीतसमायुक्तं वाद्यध्वनिसमायुतम् ॥

प्रदक्षिणं ततः कृत्वा मूलस्थानं प्रवेशयेत् ।
मूलस्थानात् पश्चिमतः देवेशं प्राङ्मुखं स्थितम् ॥

रत्नादीनिष्टका गृह्य गर्भागारं प्रवेशयेत् ।
आचार्यं गुरुणा चैव यजमानः सहानयेत् ॥

इषे त्वोर्जेतिमन्त्रेण ऐन्द्रे चैवोत्तराग्रकम् ।
अग्निमीळेति मन्त्रेण प्रागग्रं दक्षिणे न्यसेत् ॥

अग्न आयाहि वीतेति पश्चिमे चोत्तराग्रकम् ।
शंनो देवीतिमन्त्रेण प्रागग्रं चोत्तरे न्यसेत् ॥

मध्ये सुषिरसंयुक्तं धान्यबीजसमायुतम् ।
फेलां चैव तले ध्यात्वा हीने रत्नं तले न्यसेत् ॥

इन्द्रं प्रणवन्तमित्युक्त्वा तले फेलां सुसंन्यसेत् ।
ब्रह्म जज्ञेतिमन्त्रेण नवरत्नं सुसंन्यसेत् ॥

हिरण्यवर्णेतिमन्त्रेण सुवर्णादि च विन्यसेत् ।
इन्द्रं प्रणवन्तमित्युक्त्वा संन्यसेत्तु मनःशिलाम् ॥

सोमं राजानमित्युक्त्वा शाल्यादीनि सुसंन्यसेत् ।
तदूर्ध्वे चेष्टकां न्यस्य पश्चात् वस्त्राभरणकुण्डलैः ।
गन्धमाल्यैरलंकृत्य शिल्पिना सुदृढं भवेत् ॥

स. ६.२५-३७

[अत्र चतुर्णां स्थापकानां पूजनमधिकमिति विशेषः ।]

ज्ञा. ३०.५८

[अत्र द्वारदक्षिणभागे नवरत्नविन्यासः स्थापकार्चनं चाधिकमिति विशेषः ।]

क्रि. ५.९-१३

[अत्र ध्रुवसूक्तजपपुरःसरं रत्नन्यासो विधीयते इति विशेषः ।]

खि. ४.३५-४५

[अत्र चतुर्णां स्थापकानां पूजनं वैष्णवमन्त्रोच्चारणपुरःसरं रत्नन्यासश्च अधिक इति विशेषः ।]

प्र. १०.३

य. ६. १३-६

[अत्र उपानहः अधस्तात् भूमेः नवभागविभजनम् अधिकमिति विशेषः ।]

वा. ३

वि. ६.२७,८

[अत्र विमाननित्यसूत्रं प्रसार्य द्वारं विदित्वा अभ्यन्तरद्वारदक्षिणे यमद्वयं हित्वा भित्तिमध्ये चतुरश्रम् उपलिप्य नवभागं विभज्य आचार्यः प्राङ्मुखमासित्वा प्राणायामं कृत्वा प्रथमशिलेष्टकाग्रमूर्ध्वाननम् आग्नेयां तत्पादं याम्ये द्वितीयशिलेष्टकाग्रं नैर्ऋत्यां तत्पादं वायव्ये तृतीयशिलेष्टकाग्रं वारुण्यां तत्पादम् ऐशान्यां चतुर्थशिलेष्टकाग्रं तत्पादम् - इत्येवं क्रमेण शिलेष्टका न्यस्येदित्यधिकमिति विशेषः ।]

३.५.१६ —— आस्थानमण्डपादि - आद्येष्टकान्यासप्रकार-

क्रि. ५.१८,२१,२

आस्थानमण्डपादीनाम् ऐशान्ये प्रथमेष्टकाम् ।
नास्ति चेत्तत्र तद्भित्तिः भित्त्यैशान्येऽथवा न्यसेत् ॥

- - - - - - - - - - - - - - - - - - -।
चतुर्वेदादिमन्त्रांश्च वारुणं स्नपनालये ॥

श्रीभूमिसूक्तमन्त्रांस्तु यजेदास्थानमण्डपे ।

३.५.१७ —— महानस- ——

क्रि. ५.१९,२२,३

महानसस्य चाग्नेय्यां कल्पयेत् प्रथमेष्टकाम् ।
- - - - - - - - - - - - - - - - -।
हवीरक्षकदैवत्यं श्रीभूसूक्तं महानसे ॥

वैष्णवं विष्णुसूक्तं च पौरुषं सूक्तमेव च ।

३.५.१८ —— स्नपनालय- ——

क्रि. ५.१७

प्राग्द्वारदक्षिणे कुर्यादिष्टकाः स्नपनालये ।

३.५.१९ —— परिवारदेवतालय- ——

क्रि. ५.२४,५

आलये परिवाराणां तत्तन्मन्त्रं सवैष्णवम् ।
अष्टोत्तरशतं हुत्वा संन्यसेत् चतुरिष्टकाः ॥

एष एव विशेषः स्यात् अन्यत्सर्वं खिलोक्तवत् ।

३.५.२० —— गोपुर- ——

क्रि. ५.१४-६,२१

अथातः शयनात् प्राच्याम् अग्नावाहवनीयके ।
पौरुषं विष्णुसूक्तं च वैष्णवं च ततः परम् ॥

एकाक्षरादिसूक्तं च दिग्दैवत्यसमन्वितम् ।
दशकृत्वः तथा हुत्वा सर्वं पूर्ववदाचरेत् ॥

तथैव गोपुराणां च संन्यसेत् द्वारदक्षिणे ।
प्रवेशदक्षिणे व्यासः गोपुराणां विशिष्यते ॥
- - - - - - - - - - - - - - - - - - ॥

द्वारेषु द्वारपालानां यजेन्मन्त्रांश्च गोपुरे ।

३.५.२१ —— प्राकार- ——

क्रि. ५.१७, २०,३

प्राकाराणां च सर्वेषाम् ऐशान्ये नैर्ऋतेऽथवा ।
- - - - - - - - - - - - - - - - - - ।

प्राकारेषु यजेत् तत्तत्परिवाराधिदैवतम् ॥

- - - - - - - - - - - - - - - - - - ।

प्राकारादिषु सर्वेषु चैकामेव शिलां न्यसेत् ॥

३.५.२२ ——— शाला - आद्येष्टकान्यासनिषेध-

क्रि. ५. १९,२०

शालाश्रयाणां सर्वेषां नाचरेत् प्रथमेष्टकाम् ।
- - - - - - - - - - - - - - - - - ॥

शालादीनां तु सर्वेषां सभ्यमौपासनं तु वा ।

३.५.२३ ——— आद्येष्टकान्यास - दिङ्निर्णय-

ज्ञा. ३०.५७,८

अथ प्रथमेष्टकाविधानम् । विधिना कल्पिते देशे दृढतरे जलेन सर्वं सममिति ज्ञात्वा पूर्ववच्छङ्कुं संस्थाप्य छायाग्रपतनं दृष्ट्वा ऐशान्यामङ्गुलार्धं मुखं याम्ये समं वारुण्यां वायुवीक्षणं सौम्यं वायव्याम् अर्धाङ्गुलमेवं कृते समं भवति । प्रागग्रपतनार्धेषूत्तरेऽपि (?) वर्धयेत् । उदगयने समाग्रमर्धाधिकं ततोऽन्यस्मिन् प्राच्योदीच्यप्रबन्धने (?) प्राचीमेवं ज्ञात्वा चतुष्पञ्चषडंशाः भित्तिमूलाः क्रमेणोत्तममध्यमाधमाः । त्रिभूमीनां चतुर्थांशं पञ्चभूमीनामष्टांशं सप्तभूमीनां दशांशमेवं गर्भगृहं ज्ञात्वा शुभर्क्षे शुभहोरायां प्रथमेष्टका न्यसेत्।

क्रि. ३.४-७

जलान्तं वा शिलान्तं वा खात्वा भूमिं समन्ततः ।
वालुकाभिः प्रपूर्यैव जलेन सहितं शनैः ॥

मुसलैर्हस्तिपादैश्च दारुतुण्डैर्बृहत्तरैः ।
दृढीकृत्य तु सर्वत्र जलेनैव प्रपूरयेत् ॥

तत्र शङ्कुं प्रतिष्ठाप्य दिक्परिच्छेदमाचरेत् ।
तेन प्राचीं विनिश्चित्य शङ्कुना श्रवणेन वा ॥

यथोक्तविधिना तत्र कृत्वा च प्रथमेष्टकाम् ।
आरभेत विमानं तु पञ्चहस्तादिभेदतः ॥

प्र. २. १-५

अतः परं प्रवक्ष्यामि शङ्कुस्थापनमुत्तमम् ।
मेषं तथैव वृषभं गते सूर्ये दिने तथा ॥

कृत्वा समतलां भूमिं गोमयेनोपलेपयेत् ।
तद्बहिः भ्रामयेत्सूत्रद्वयं तेनैव मानतः ॥

पूर्वाह्णे चापराह्णे च शङ्कुच्छायां तु लाञ्छयेत् ।
ततः सूत्रत्रयं वाथ पातयेच्छङ्कुमध्यमे ॥

भ्रामयेदधिकेऽर्धं तु न्यूने तावद्विवर्धयेत् ।
प्राचीं तत्सूत्रमानेन मध्यमेनैव कल्पयेत् ॥

उदक्सूत्रं भवेत्तत्र कृत्वा तु चतुरश्रकम् ।
पञ्चगव्येन संप्रोक्ष्य पुण्याहमपि वाचयेत् ॥

य. ३.१७-२२; ४.१-१२

गर्भालयप्रदेशे तु शुद्धिं कृत्वा मनोरमे ।
व्रीहिभिः स्थण्डिलं कृत्वा द्विहस्तायतविस्तृतम् ॥

पूर्वाग्राश्चोत्तराग्राश्च वर्णरेखास्तथा कुरु ।
कर्णसूत्रद्वयोपेतं चतुःशिरसमन्वितम् ॥

वेदतोऽङ्गुलसंयुक्तं नागैरन्तश्चतुष्पथम् ।
सूत्राष्टयोगे धातारं दिशिला(?) शूलयोस्तथा ॥

लोकपालान् समभ्यर्च्य बलिं दत्त्वाथ पायसैः ।
कृत्वाचार्यः स्वयं सर्वं पूर्वं वै शिल्पिना विना ॥

पश्चादत्र च तद्देवान् शिल्पिना चाभिवन्दयेत् ।
संशोध्य विश्वं संगृह्य वायसेभ्यः प्रदीयताम् ॥

अत्र शङ्कुं सुसंस्थाप्य गुरुस्तच्छिल्पिना सह ।
दिशो निश्चित्य धामार्थं विमानं विधिनारभेत् ॥

शङ्कुप्रतिष्ठामार्गं च प्रवक्ष्यामि तपोधनाः ।
प्रासादनिर्मितिस्थाने समं कृत्वा भुवस्तलम् ॥

गोचर्ममात्रं तत्रैव गोमयेनोपलेपयेत् ।
प्रागन्तं चोत्तरान्तं च मध्ये सूत्रं प्रसारयेत् ॥

तन्मध्ये शङ्कुसंस्थानं याज्ञिकैस्तरुभिस्तथा ।
शङ्कुं कुर्याद्विधानेन तस्योत्तुङ्गं वितस्तिना ॥

वितस्त्या मूलनाहं स्यादग्रनाहं नवाङ्गुलम् ।
क्रमात् कृशमवक्रं स्याच्छङ्कोर्लक्षणमेव च ॥

तन्मध्ये मण्डलं कुर्यात् शङ्कोर्द्विगुणमानतः ।
स्थापयेदुदयात् पूर्वं शङ्खनादसमायुतम् ॥

तस्मिन्नधिपमादित्यम् इन्द्रादीन् परितोऽर्चयेत् ।
रेखागतायां छायायां पश्चिमे बिन्दुमर्पयेत् ॥

तथापराह्णे रेखायां प्रागते बिन्दुमर्पयेत् ।
तत् षण्णवतिकं भागं कृत्वैकांशं तदङ्गुलम् ॥

मेषे च वृषभे शून्यं तुलामासे द्व्यङ्गुलम् ।
कर्कटे वृश्चिके मीने तेनैव चतुरङ्गुलम् ॥

चापे कुम्भे षडङ्गुल्यं मकरेऽष्टाङ्गुलं क्रमात् ।
अङ्गुलीर्मासि मास्युक्ताः त्रिंशद्भागं विभज्य च ॥

गतर्क्षाणां तु युक्त्या तैरंशं नित्यावशेषितम् ।
तद्बिन्दोरुत्तरे याम्ये नीत्वा बिन्दुं समर्पयेत् ॥

सूत्रं प्रसारयेद्विद्वान् मध्ये प्रागन्तमेव च ।
दक्षिणोत्तरतो बिन्दुं मत्स्यवद् भ्रामयेद्बुधः ॥

तत्पुच्छाननयोर्मध्ये सूत्रं पश्चात् प्रसार्य च ।
एवं दिशो विनिश्चित्य मूलस्थानं च कल्पयेत् ॥

वि. ६.२४,५

कृष्टभूमिमध्ये चतुर्दिशं चतुर्हस्तं जलेन समं कृत्वा तन्मध्ये शङ्कुं स्थापयेत् । शङ्कुवृक्षान् सारवत्तरान् याज्ञिकान् षा आहरेत् । मानाङ्गुलेन अष्टाङ्गुलायतं द्वादशाङ्गुलायतं वा सुवृत्तं निर्व्रणम् आयामसदृशं मूलनाहं छत्राकारं शङ्कुं कृत्वा उदयात् पूर्वं तन्मध्ये शङ्कुद्विगुणमानेन मण्डलमालिख्य तन्मध्ये शङ्कुं स्थापयेत् ।

पूर्वाह्णापराह्णयोः छाया यदि तन्मण्डलान्तगा तद्बिन्दुद्वयगतं सूत्रं प्रसारयेत् । तत्पूर्वापरदिक् उक्तच्छायां दक्षिणतो वामे च निदध्यात् । स शङ्कुर्नरतनुः तस्मात् षण्णवतिभागं कृत्वैकांशमङ्गुलं तदङ्गुलेनावच्छायाः प्रतिमासं विशोधयेत् । मेषे मिथुने सिंहे तुलायां च रवौ स्थिते द्व्यङ्गुलं कुलीरे वृश्चिके मीने चतुरङ्गुलं धनुषि कुम्भे षडङ्गुलं मकरे अष्टाङ्गुलं नयेत् । वृषभे कन्यायां नावच्छाया भवेत् । मासि मास्युक्तमङ्गुलं त्रिंशद्भागं कृत्वा दिने दिने चैकैकं भागं युक्त्या शोधयेत् । तस्मिन् पुनर्बिन्दुद्वयं कृत्वा तयोर्मध्यं पूर्वापरं प्रसार्य दक्षिणोत्तरं तद्बिन्दुद्वयं मत्स्यमुत्पाद्य तन्मुखपुच्छविनिर्गतं सूत्रं प्रसारयेत् ।

३.५.२४ ——— ——— फल-

खि. ४.४९,५०

विष्णोरालयमुद्दिश्य यः कुर्यात् प्रथमेष्टकाम् ।
कार्ये सिद्धेऽप्यसिद्धे वा साकल्येन फलं लभेत् ॥

सर्वजन्मकृतं पापं स्वल्पं वा यदि वा बहु ।
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ॥

६. गर्भन्यासः

३.६.१ - आलयनिर्माण - गर्भन्यास - आवश्यकता-

अ. ५

गर्भं तु प्रथमं प्रोक्तं स्थलगर्भं द्वितीयकम् ॥

तृतीयं मस्तके प्रोक्तं चतुर्थं बेरदैविकम् ।
पञ्चमं गर्भमध्ये तु ब्राह्मे चैव सुसंन्यसेत् ॥

पञ्चगर्भविहीनं तु आभिचारिकमुच्यते ।
तस्मात् सर्वप्रयत्नेन पञ्चगर्भं सुसंन्यसेत् ॥

प्र. ४.१४

[अत्र आदौ गर्भन्यासः कर्तव्यः इत्येव विधीयते इति विशेषः ।]

३.६.२ ——— ——— काल-

खि. ५. १८-२०

त्रिषूत्तरेषु रोहिण्यां स्वात्यां चैव पुनर्वसौ ।
चित्रायां मृगशीर्षे च अनूराधे तथैव च ॥

नक्षत्रेष्वेषु हस्ते च गर्भप्रक्षेपणं चरेत् ।
तेषां शुभांशगे चन्द्रे स्थिरराशौ तु कारयेत् ॥

ग्रामस्य यजमानस्य चानुकूले दिने चरेत् ।

अ. ५

अयने चोत्तरे कुर्यात् माघमासं च वर्जयेत् ।
शुक्लपक्षे सुनक्षत्रे सुतिथौ शुभवासरे ॥

ग्रामस्य यजमानस्य चानुकूलदिनं भवेत् ।

स. १०.३५,६

रात्रावेव निधातव्यं गर्भपात्रं सुशोभनम् ।
सौम्ययुक्ते शुभांशे वा स्थिरे चोर्ध्वोदये शुभे ॥

ऊर्ध्वाननं निधातव्यं राशौ शुद्धाष्टमव्यये ।

क्रि. ५.२९,३०

[अत्र सौम्ययुक्ते इति राशिविशेषणं नास्तीत्येव विशेषः ।]

नि. ७

[अत्र रात्रावेवेत्यस्य स्थाने शुभवारसुनक्षत्रयोर्निर्देश इति विशेषः ।]

य. ७.१९

[अत्र शुभे कर्त्रनुकूलर्क्षे स्थिरराशौ इत्येव निर्दिश्यते इति विशेषः ।]

वि. १३.६१

[अत्र शुभे कर्त्रनुकूले नक्षत्रे राशौ शुभोदये इत्येव निर्दिश्यते इति विशेषः ।]

३.६.३ —— —— अङ्कुरार्पण - काल-

खि. ५. २०,१

तस्मात्तु★ दिवसात् पूर्वं नवमे वाथ सप्तमे ॥

पञ्चमेऽहनि वा कुर्याद्विधिना चाङ्कुरार्पणम् ।

अ. ५.

[अत्र नवमसप्तमपञ्चमदिननिर्देशो नास्तीति विशेषः ।]

★ गर्भन्यासात्

नि. ७

[अत्र अर्चनाधिकारवत् ।]

य. ७·१९

[अत्र 'पूर्वेद्युस्तद्दिने तथा' इति निर्दिष्टमिति विशेषः ।]

३.६.४ —— —— आहरणीयद्रव्य-

य. ७. १६-८

मङ्गलान् पर्वतान् बीजान् शङ्खाद्यानायुधानपि ॥

मृदः कन्दांस्तथा रत्नान् वर्णचिह्नांस्तथैव च ।
वाद्यधातुकांश्चैव स्वर्णाद्याभ्यांस्तथैव च ॥

प्लक्षादीनां त्वचश्चैव गजरूपादयस्तथा ।
पुण्यतीर्थोदकांश्चैव सर्वाण्यन्यानि चाहरेत् ॥

क्रि. ५. २८,९

[अत्र द्रव्याणां विशिष्य निर्देशो नास्ति इति विशेषः ।]

नि. ७

३.६.५ —— —— —— अष्टमङ्गल-

वि. १३.६१

श्रीवत्सपूर्णकुम्भभेर्यादर्शमत्स्ययुग्माङ्कुशशङ्खावर्तानष्टमङ्गलान् यथालाभमानेन कारयति ।

नि. ७

३.६.६ ——— ——— ——— पर्वत-

नि. ७

हिमवान् दुर्जयो विन्ध्यो विधा(दू ?)रो वेदपर्वतः ।
महेन्द्रैव पुरि(न्द्रश्च हरि?)श्चन्द्रशतशृङ्गाश्च पर्वताः ॥

३.६.७ ——— ——— ——— धान्य-

स. १०. ६,७

- - - - - - - - - - -शालिनीवारकङ्गुभिः ।
माषं कुलुत्थनिष्पावतिलमुद्गयवानपि ॥

नि. ७

[अत्र व्रीहि-गर्भषष्टि-गोधूम-तिल्वक-वंशबीज-प्रियङ्गु-मसूर-चणकाः-अधिकतया निर्दिश्यन्ते इति विशेषः ।)

वि. १३.६०

३.६.८ ——— ——— ——— शङ्खाद्यायुध-

वि. १३.६१

सुवर्णेन- - - - - - - - शङ्खचक्रगदाशाङ्र्गासींश्च पञ्चायुधांश्च-
- - - - -यथालाभमानेन कारयति ।

नि. ७

[अत्र चक्रशङ्खशक्तिशार्ङ्गखेटकानि पञ्चायुधत्वेन परिगण्यन्ते इति विशेषः ।]

३.६.९ —— —— —— मृत्तिका-

स. १०. १-३

अथातः संप्रवक्ष्यामि गर्भन्यासविधिं बुधाः ।
समुद्राच्चैव नद्याश्च पर्वतात् तीर्थदेशतः ॥

ह्रदात् कुलीरवासाच्च वल्मीकाच्च खलादपि ।
गजदक्षिणदन्ताच्च वृषदक्षिणशृङ्गतः ॥

पृथक्पात्रे ग्रहीतव्या मृत्तिकास्ताः सुशोभनाः ।

नि. ७

[अत्र खलपर्वततीर्थदेशानां स्थाने बिल्वकुशस्थलयोर्निर्देश इति विशेषः ।]

वि. १३.६०

[अत्र तीर्थदेशस्य निर्देशो नास्ति इति विशेषः ।]

३.६.१० —— —— —— मूल-

स. १०. ८,९

उत्पलस्य च मूलं च पद्ममूलं तथैव च ॥

गृह्णीयात् कौमुदं मूलं मूलं नीलोत्पलस्य च ।
सर्वाण्येतानि संगृह्य-----------------॥

नि. ७

[अत्र मूलस्थाने कन्दः निर्दिश्यते इति, नीलोत्पलमूलस्थाने कल्हारकन्दः निर्दिश्यते इति च विशेषः ।]

वि. १३.६१

[अत्र निरुक्ताधिकारवत् ।]

३.६.११ ——— ——— ——— रत्न-

स. १०. ३,४

वज्रमौक्तिकवैडूर्यान् शङ्खं च (शङ्खजं ?) स्फाटिकं तथा ॥

पुष्यं चन्द्रमणिं चैव नीलं ब्रह्ममणिं तथा ।
रत्नानि संपरीक्ष्यैव गृह्णीयात् तानि यत्नतः ॥

नि. ७

[अत्र अमृताश्ममणि-लोहिताक्षमणि-उत्पलमणि-प्रवाल–विद्रुमाः अधिकतया निर्दिश्यन्ते इति विशेषः ।]

वि. १३.६०

[अत्र शङ्खजस्य निर्देशो नास्तीति विशेषः ।]

३.६.१२ ——— ——— ——— वर्णचिह्न-

वि. १३.६१

सुवर्णेन चतुर्वर्णचिह्नानि स्रुक्स्रुवकमण्डलुजुहूपजुहूपभृत्छत्रचामराङ्कुशध्वजतुलातोद्युगलाङ्गलादीनि- - - - - -यथालाभमानेन कारयति ।

नि. ७

[अत्र स्रुक्स्रुवोपजुहूपभृच्छत्रचामराङ्कुशध्वजतुलातोद्युगानां स्थाने दर्वीडापात्रदण्डोपवीतसरस्वतीरथहारपिण्डिपालानां निर्देश इति विशेषः ।]

३.६.१३ ——— ——— ——— धातु-

स. १०. ५,६

मनःशिला हरितालमञ्जनं श्यामसीसकम् ।

सौराष्ट्रं रोचनं चैव गौरिकं पारदं तथा ॥

एतान् संगृह्य धातून् वै - - - - - - - - - -।

नि. ७

[अत्र अञ्जनसौराष्ट्ररोचनानां निर्देशो नास्तीति विशेषः ।]

वि. १३.६०

३.६.१४ ——— ——— ——— **लोह-**

वि. १३. ६०,१

सुवर्णरजतताम्रपित्तलायसारकूटवृत्तलोहवैकृतत्रपुसीसान् यथाक्रमेणाहरेत् । हेमरूप्यताम्रायसलोहांश्च.......आहरेत् ।

स. १०.८

[अत्र हिरण्यरजतताम्रायसत्रपूणामेव निर्देश इति विशेषः ।]

३.६.१५ ——— ——— ——— **वृक्षत्वच्-**

नि. ७

प्लक्षस्योदुम्बराश्वत्थवटवृक्षं समाहरेत्☆ ।

३.६.१६ ——— ——— ——— ***कूर्मादि-**

स. १०. ९,१०

☆ अत्र निर्दिष्टानां वृक्षाणां त्वचमाहरेत् इति भावः ।

* ग्रन्थान्तरे आहरणीयद्रव्यनिर्देशे गजस्यादौ निर्देशेऽपि आदर्शग्रन्थे कूर्मस्यादौ ग्रहणात् शीर्षकेऽस्मिन् कूर्मादि इति निर्दिश्यते ।

- - - - - - - - - - - - -कूर्मचक्राम्बुजान्यपि ॥
ऋषभं - - - - - सुवर्णेनैव कारयेत् ।

नि. ७

[अत्र गजगरुडकूर्मान् सुवर्णेन कल्पयेदिति निर्दिश्यते इति विशेषः ।]

वि. १३.६१

[अत्र निरुक्ताधिकारवत् ।]

३.६.१७ ——— ——— ——— पुण्यतीर्थ-

नि. ७

लब्धनद्या(?)तटाके तु हृदयात्सरसं फलम् (हृदाच सरसो जलम् ?)॥

गिरिप्रस्रवात् कूपात् तुषारोदकसंयुतम् ।
आहृत्य संभृतं यत्तत् पुण्यतीर्थमुदाहृतम् ॥

३.६.१८ ——— ——— ——— *फेलाकल्पन-

वि. १३.६१

फेलायामविशालं त्रिपञ्चसप्तनवैकादशत्रयोदशपञ्चदशसप्तदशैकोनविंशत्येकविंशतित्रयोविंशतिपञ्चविंशत्यङ्गुलमेतद्यथाक्रमेणैकतलादिद्वादशतलान्तं विमानानां गर्भभाजनं तद्भित्त्युच्चं तद्विस्तारसमम् अष्टांशोनं षड्भागोनं पञ्चभागोनं वा तस्य बाहुल्यम् एकद्वित्रिचतुर्यवं नवकोष्टयुतमच्छिद्रां रम्यां फेलां कारयति । कोष्टभित्त्युच्चं विस्तारार्धं त्रिभागैकभागं वा तत्पादानां यथोचितमर्धाङ्गुलभित्त्युच्चं निर्व्रणं वृत्तं

---

* फेलाशब्दः गर्भभाजनवाचकः ।

चतुरश्रं वा शुद्धेन ताम्रेण वा कारयेत् । अथवा तत्प्रासादविष्कम्भं तदष्टांशोनं तत्पादहीनं वा फेलायामविशालं शेषं पूर्ववत् ।

अ.५

गर्भपात्रं सुसंगृह्य फेला तां मृण्मयं(ताम्रमयी?) भवेत् ।
षोडशाङ्गुलमानेन पञ्चविंशत्पदं भवेत् ॥

उन्नतार्धाङ्गुलं नैव उत्सेधार्धं तु विस्तृतम् ।
ऊर्ध्वं वेष्टितमेवं स्याच्चतुर्भागैकभागिकम् ॥

मध्यमं द्वादशाङ्गुल्यं त्रयोदशपदं भवेत् ।
अधमं चाष्टाङ्गुलं प्रोक्तं नवकं पदमाचरेत् ॥

भग्नं छिन्नं विवर्ज्यं च सुषिरं रन्ध्रवर्जितम् ।
विस्तारोन्नतष्ट्यैव(?) पूर्ववद्विधिमाचरेत् ॥

खि. ५. १४-७

आरम्भकालात् पूर्वस्मिन् फेलां ताम्रमयीं हरेत् ।
षण्णवतियवायामविस्तृता चोत्तमा भवेत् ॥

चतुःषष्टियवायामविस्तृता मध्यमा स्मृता ।
चत्वारिंशद्यवायामविस्मृता चाधमा मता ॥

तदर्धमुन्नतां कुर्यात् पादहीनोत्तरच्छदम् ॥
श्लक्ष्णामेवंविधाकारां भेदच्छिद्रविवर्जिताम् ॥

पंचविंशत्पदैर्युक्तामथवा नवभिः पदैः ।

क्रि. ५.२८

स. १०. १०-२

फेलामष्टाङ्गुलायामां तावदङ्गुलविस्तृताम् ॥

भागमात्रसमुत्सेधामर्धोत्सेधोत्तरच्छदाम् ।
कृत्वा ताम्रमयीं सिग्धां नवकोष्ठसमन्विताम् ॥

अच्छिद्रामक्षतां रम्यां यवमात्रघनायुताम् ।

नि. ७

उत्तमे षोडशाङ्गुल्यं मध्यमे द्वादशाङ्गुलम् ।
अधमेऽष्टाङ्गुलं प्रोक्तं तत्समं विस्तृतायतम् ॥

विस्तारार्धं समुत्सेधं नवांशैकांशकार्धकम् ।
घनमेवं विजानीयात् अवक्रं बीजमिष्यते(?)॥

पदमेकोनपञ्चाशत् उत्तमं तदुदाहृतम् ।
पञ्चविंशत्पदं मध्ये नवकं वा कनीयसम् ॥

अभ्यन्तराणां भित्तीनां यवाष्टांशैरपि स्मृतम् ।
घनमेवं समुद्दिष्टं खण्डस्फुटितवर्जितम् ॥

फेलोत्सेधं त्रिभागैकम् उच्छ्रयं फेलकोपरि ।
पिधानमेवमेवोक्तं शेषं युक्त्यैव कारयेत् ॥

अस्निग्धं सुदृढां फेलां ताम्रेणैव विचक्षणः ।

प्र. ४. १९-२३

तथा ताम्रमयी फेला स्फाटिका वा प्रशस्यते ।
पादविष्कम्भविस्तारां फेलां तत्त्वपदाञ्चिताम् ॥

खण्डस्फुटितवर्ज्या सा---------------।
घनं विंशतिभागैकं तदर्धार्धांशमेव वा ॥

विस्तारस्य चतुर्भागं कोष्ठभित्त्युच्छ्रयं भवेत् ।
उत्तमं तु समोत्सेधं त्रिपादं मध्यमं स्मृतम् ॥

अधमं चार्धमुत्सेधं त्रिविधं तत्प्रचक्षते ।
त्रिभागैकं पिधानं स्यात् द्विभागं भागिकं भवेत् ॥

अन्तरे चाङ्गुलायामं तदर्धं भिन्नभित्तिकम् ।
संयोगार्धविहीनं स्यात् पिधानेऽभ्यन्तरे तथा ॥

य. ७.८,९ १४-६

प्रासादपादविपुलं नाहांशोनमथापि वा ।
पादांशोनमथो फेलाविशालायाममुच्यते ॥

विस्तारसमभित्त्युच्चमष्टांशोनमथापि वा ।
- ॥

भूतांशोनं च वा तस्य बहुलं जघमेव(?) वा ।
नवकोष्ठयुतां फेलामच्छिद्रां सापिधानकाम् ॥

स्वर्णेन रजतेनैव कुर्यात्ताम्रेण वा पुनः ।
येन मार्गेण गन्तव्यं शिखरं तेन मार्गतः ॥

अश्रमष्टाश्रं(?) वृत्तं वा कारयेद्गर्भभाजनम् ।

३.६.१९ —— —— फेलाशोधन-

नि. ७

जलाधिवासनं चैकाहमाम्लेनैव शोधयेत् ॥

पूर्वेद्युरेव पूर्वाह्णे गव्यैः पञ्चभिरेव च ।
यन्मे गर्भेति तत्प्रोक्ष्य प्रक्षाल्य च पुनस्तथा ॥

शंनो देवीति मन्त्रेण क्षालयेद्गन्धवारिणा ।

अ. ५

प्र. ४.२४

३.६.२० ——— ——— फेला - द्रव्यनिक्षेप-

स. १०. १७-३१

प्रभाते विधिना स्नात्वा पुण्याहं वाचयेत् क्रमात् ॥

मृदो द्रव्याणि निक्षिप्य फेलायां देवसंनिधौ ।
कनिक्रदादिशकुनसूक्तघोषसमन्वितम् ॥

वैष्णवं पौरुषं सूक्तं जपन् वै प्रोक्षणैरपि ।
संप्रोक्ष्यैव यथान्यायं तां फेलां द्रव्यकैः सह ॥

तत्रैव स्थापयेत् द्रव्यं विधिना गर्भभाजने ।
प्रक्षाल्य पञ्चगव्येन प्रणवं मन्त्रमुच्चरन् ॥

गायत्र्या प्रोक्षयेत् पश्चाच्छुद्धतोयेन वै बुधः ।
समुद्रमृत्तिकां पूर्वं परितः प्रक्षिपेत् ततः ॥

दिश्यैन्द्र्यां पार्वतीं याम्यां तीर्थजां प्रक्षिपेत् ततः ।
नादेयीं पश्चिमे सौम्ये ह्रदजां विन्यसेत् क्रमात् ॥

कौलीरवासामाग्नेय्यां वाल्मीकीं नैर्ऋते न्यसेत् ।
वायव्यां खलजा प्रोक्ता चैशान्यां हस्तिदन्तजा ॥

ब्रह्मस्थाने च दातव्या वृषदक्षिणशृङ्गजा ।
पाद्ममुत्पलमूलं तु कौमुदं मूलमेव च ॥

इन्द्रादीनां महादिक्षु प्रक्षिपेच्च यथाक्रमम् ।
वज्रादीनि च रत्नानि इन्द्रादीनां दिशि क्रमात् ॥

मनःशिलाद्यं च तथा शमल्याद्यं च यथाक्रमम् ।
हिरण्यं ब्रह्मणः स्थाने ऐन्द्रे तु रजतं न्यसेत् ॥

याम्ये ताम्रं निधातव्यं वारुण्यामायसं न्यसेत् ।
त्रपु सौम्ये क्षिपेद्विद्वान् सर्वमेवमसंकरम् ॥

गरुडं कूर्मरूपं च शङ्खचक्रसमन्वितम् ।
विदिक्षु संन्यसेदेवं मण्यादीनि यथाक्रमम् ॥

धनुर्दण्डं गदात्मीयजातिद्रव्यं तथैव च ।
सुवर्णेनैव कृत्वा तु ब्रह्मस्थाने विनिक्षिपेत् ॥

हैमानि मङ्गलान्यष्टौ क्रमादैन्द्रादिषु न्यसेत् ।
तत्तद्दिगीशमन्त्रैश्च सर्वाण्येतानि निक्षिपेत् ॥

एवमेव विनिक्षिप्य शालिबीजैश्च पूरयेत् ।

अ. ५

ब्रह्मस्थाने ब्रह्ममणिं ब्रह्म जज्ञानमुच्चरन् ॥

इन्द्रं प्रणवन्तमित्युक्त्वा ऐन्द्रे वज्रं सुसंन्यसेत् ।
आग्नेय्यां मौक्तिकं न्यस्य अग्निर्मूर्धेति चोच्चरन् ॥

याम्ये संन्यस्य वैडूर्यं यमो दातारमन्त्रतः ।
नैर्ऋत्यां शङ्खजं न्यस्य नमस्ते निर्ऋतेति च ॥

वारुण्यां स्फाटिकं न्यस्य ये ते शतमितीरयन् ।
मरुतः परमात्मेति पुष्यरागं तु वायवे ॥

सौम्ये तु चन्द्रकान्तं स्यात् सोमं राजानमन्त्रतः ।
ऐशान्यां संन्यसेन्नीलमीशमीशेतिमन्त्रतः ॥

हिरण्यगर्भमन्त्रेण सुवर्णं मध्यमे न्यसेत् ।
ऐन्द्रे तु रजतं न्यसे(स्ये?)त् तत्कुरुष्वे(तत्पुरुषे?)तिमन्त्रतः ॥

अभित्वा शूरमन्त्रेण याम्ये ताम्रं सुसंन्यसेत् ।
जपन् दत्त्वेति मन्त्रेण वारुण्यां त्रपु संन्यसेत् ॥

पूतस्तस्येतिमन्त्रेण त्रपु सौम्ये निवेशयेत् ।
ऐन्द्रे तु पद्ममूलं स्यात् श्रिये जातेतिमन्त्रत्तः ॥

दक्षिणे चोत्पलं न्यस्येन्मेदिन्यादि समुचरन् ।
कुमुदं वारुणे न्यस्य वसोः पवित्रेतिमन्त्रतः ॥

शं नो देवीतिमन्त्रेण सौम्ये नीलोत्पलं न्यसेत् ।
मनःशिलां हरीतालमञ्जनं श्याममेव च ॥

आग्नेये नैर्ऋते चैव वायव्यैशान्ययोरपि ।
मनःशिलादिधातूनां धाता धातेतिभन्त्रतः ॥

मृदं पूर्वोक्तमाहृत्य मेदिन्याद्यष्टदिक्षु च ।
श्रीवत्साद्या च वर्षान्ताम् ऐन्द्रादीशान्तमाचरेत् ॥

ब्राह्मणानां हितार्थाय मेखला चोपवीतकम् ।
स्रुक्स्रुवौ दर्भसंयुक्तौ दण्डं चैव कमण्डलुम् ॥

अङ्कुशं चास्त्रशस्त्रं च मौलहारौरुपादितम्(?) ।
वैश्यस्तुलां प्रकुर्वीत शूद्राणां युगलाङ्गले ॥

यजमानस्य नाम्नैव पत्रं सौवर्णमालिखेत् ।
पद्ममध्ये सुविन्यस्य जातिवृद्धिं तु मध्यमे ॥

शालिव्रीहियवा मुद्गास्तिलमाषप्रियङ्गवः ।
सर्षपाश्चाष्टधान्यानि अष्टदिक्षु सुसंन्यसेत् ॥

सोमं राजानमन्त्रेण बीजान् सर्वान् सुसंन्यसेत् ।

खि. ५. २१-५२, ६४-७६

अङ्कुरार्पणकादूर्ध्वं द्रव्याण्यपि समाहरेत् ॥

जले तु निक्षिपेत् फेलां पञ्चगव्येन शोधिताम् ।
लिखित्वा चैव दिग्भागं फेलायां च चतुर्दिशम् ॥

ब्राह्मस्थाने ब्रह्ममणिं चैन्द्रे वज्रमणिं न्यसेत् ।
अग्नौ मौक्तिकमुद्दिष्टं याम्ये वैदूर्यमुच्यते ॥

नैर्ऋते शङ्खजं दद्याद्वारुणे स्फटिकं न्यसेत् ।
वायौ पुष्यमणिं चैव चन्द्रकान्तं तथोत्तरे ॥

ऐशान्यां विन्यसेन्नीलमेवं नवपदे न्यसेत् ।
बाह्ये तु षोडशपदेष्वैन्द्रे सौवर्णमेव च ॥

अग्नीन्द्रयोस्तथा मध्ये हरितालमुदाहृतम् ।
आग्नेये वै तथा स्थाने शुक्तिजं प्रक्षिपेद्बुधः ॥

यमाग्न्योर्मध्यमे स्थाने न्यसेच्चैव मनःशिलाम् ।
विन्यसेत् तु यमस्थाने आयसं तु विशेषतः ॥

यमनैर्ऋतयोर्मध्ये प्रक्षिपेत् पारदं परम् ।
नैर्ऋते तु तथा स्थाने अमृताश्मकमुच्यते ॥

नीलवारुणयोर्मध्ये प्रक्षिपेच्छ्यामकं तथा ।
वरुणस्य तथा स्थाने रजतं तत्र विन्यसेत् ॥

वरुणोदानयोर्मध्ये प्रक्षिपेदञ्जनं तथा ।
उदानस्य तथा स्थाने पुष्यकान्तं च विन्यसेत् ॥

उदानसोमयोर्मध्ये कुरुविन्दं विशेषतः ।
सोमस्य तु तथा स्थाने प्रक्षिपेत् ताम्रकं बुधः ॥

ईशानसोमयोर्मध्ये सौराष्ट्रं चैव विन्यसेत् ।
ईशाने विमलं तत्र विन्यसेत् तत्पदक्रमात् ॥

तथेन्द्रेशानयोर्मध्ये गोरोचनमुदाहृतम् ।
एवं तु विन्यसेद्विद्वान् पञ्चविंशत्पदेषु वै ॥

शालिव्रीहियवा मुद्गतिलमाषप्रियङ्गवः ।
गोधूमाश्चणकास्तिल्वा मसूराश्चातसी तथा ॥

कुलुत्थसर्षपाद्यास्तु षष्टिर्निष्पाव एव च ।
बाह्ये षोडशबीजानि क्रमादैन्द्रादि विन्यसेत् ॥

मध्ये वै सर्वबीजानि निक्षिपेत् क्रमविद्बुधः ।
समुद्रे चैव वल्मीके नदीतीरे च पर्वते ॥

सस्यक्षेत्रे गजदन्ते गोविषाणे कुलीरके ।
स्थानेष्वष्टमृदश्चैव ऐशान्यादिषु विन्यसेत् ॥

नीलोत्पलं च कल्हारमुत्पलं पद्ममेव च ।
एतेषां चैव मूलानि चतुर्दिक्षु निधापयेत् ॥

यज्ञोपवीतं मौञ्जीं च दण्डं वै कुण्डिकां तथा ।
वेदं कूर्चं स्रुवं चैव आज्यस्थालीं तथैव च ॥

अन्यानि यज्ञपात्राणि विप्रो गर्भे निधापयेत् ।
हारं च मकुटं चैव कुण्डले चाङ्गदे तथा ॥

वलयं हस्तबन्धं च क्षौमं वै मेखलायुतम् ।
धनुश्चर्मासिखड्गांश्च प्रासं सवलयं तथा ॥

शङ्खचक्रगदापाशान् रथं तुरगसंयुतम् ।
भेरीं चाङ्कुशसंयुक्तं प्रतोदं योक्त्रमेव च ॥

छत्रं पताकासंयुक्तमष्टमङ्गलसंयुतम् ।
सौवर्णं कूर्मरूपं च वज्रं चाशनिमेव च ॥

क्षत्रियाणां जयार्थं वै सर्वानितान् सुसंन्यसेत् ।
तुलां कृत्वा यथान्यायं वैश्यानां स्थापयेद्धिताम् ॥

हलं हैरण्मयं कृत्वा युगं वै बीजभाजनम् ।
पशूंश्चैव तथा कृत्वा शूद्राणां स्थापयेत् क्रमात् ॥

- - - - - - - - - - - - - - - - ।

श्रीरूपं कूर्मरूपं च मेघरूपं तथैव च ॥

गजं च गरुडं चैव वृषभं हंसमेव च ।
शङ्खचक्रासिशार्ङ्गांश्च शरं खेटकमेव च ॥

पञ्चवर्णैरलंकृत्य धान्यराशिं प्रपूर्य च ।
तण्डुलानुपरि न्यस्य दर्भानुपरि विन्यसेत् ॥

फेलां तत्रैव विन्यस्य वस्त्रयुग्मेन वेष्टयेत् ।
तस्य दक्षिणदिग्भागे वेदिं कृत्वोपलिप्य च ॥

वर्णानुद्दिश्य विहितद्रव्याणां च विशेषतः ।
ब्रह्मस्थाने निधातव्यद्रव्याणां चोपकुर्वताम् ॥

उपवीतादिकानां तु पूर्वेद्युर्ग्रहणं चरेत् ।
विलिख्य नाम प्रत्येकं लक्ष्यीकृत्याप्रमादतः ॥

असांकर्येण द्रव्याणि प्रत्येकं निक्षिपेद्बुधः ।
- - - - - - - - - - - - - - - ॥

पुनः प्रभाते धर्मात्मा यजमानयुतो गुरुः ।
स्नात्वा स्नानविधानेन तर्पयित्वा च देवताः ॥

जप्त्वा द्वादशसूक्तानि देवदेवं प्रणम्य च ।
ततस्त्वग्निं समासाद्य परिस्तीर्य च पावकम् ॥

हुत्वा तु पौरुषं सूक्तं विष्णुसूक्तमतः परम् ।
इन्द्रादिलोकपालानां हुत्वा तत्र यथाक्रमम् ॥

यजमानो गुरुश्चैव वस्त्राभरणकुण्डलैः ।
हैमपुष्पैश्च माल्यैश्च अर्घ्यपाद्यादिभिस्तथा ॥

पूजयित्वा विशेषेण नमस्कुर्यात् ततो गुरुः ।
कुण्डस्य दक्षिणे भागे मण्डलान्युपलिप्य च ॥

दर्भानुपरि संन्यस्य पुष्पाक्षतसमायुतान् ।
आसनं ब्राह्ममास्थाय फेलां तां प्राङ्मुखीं न्यसेत् ॥

हरिणीं च समाराध्य फेलायामुपरि क्रमात् ।
नमो वरुण इत्युक्त्वा स्पृशन् रत्नादिकं जपेत् ॥

ब्रह्म प्रतिष्ठा इत्युक्त्वा तु ब्रह्माणं मनसा स्मरन् ।
ब्रह्मस्थानं समुद्दिश्य उक्तान् सर्वान् सुसंन्यसेत् ॥

उपवीतादि सर्वाणि वर्णानुद्दिश्य यानि वै ।
ब्राह्मं मन्त्रं समुच्चार्य ब्रह्मस्थाने निधापयेत् ॥

इन्द्रं प्रणवन्तम् इत्युक्त्वा इन्द्रस्थाने सुसंन्यसेत् ।
ऐन्द्राद्यैशान्यपर्यन्तं तत्तन्मन्त्रमुदीरयन् ॥

रत्नं धातुसमायुक्तं बीजं मृच्चाष्टमङ्गलान् ।
एकैकं मन्त्रमुच्चार्य संन्यसेच्च यथाक्रमम् ।
वेदानां चाप्यध्ययनं तत्तद्दिक्षु समाचरेत् ॥

ऋग्वेदं पूर्वतो जप्त्वा यजुर्वेदं तु दक्षिणे ।
पश्चिमे सामवेदं चाथर्ववेदं तथोत्तरे ॥

एवं दिवा प्रकुर्वीत कृच्छ्रान्नं भोजयेत् ततः ।
अन्नादींश्चैव कृत्वा तु ब्राह्मणादींश्च तर्पयेत् ॥

नि. ७

ततः प्रभाते त्वाचार्यः स्नात्वा स्नानविधानतः ॥

देवालयं प्रविश्यैव कृत्वा तत्र प्रदक्षिणम् ।
देवेशमनुमान्यैव विन्यासं च समाचरेत् ॥

प्रमुखे देवदेवस्य शालिभिस्तण्डुलैस्तिलैः ।
- - - - - विस्तृतायामौ चतुरश्रं विकीर्य च ॥

यत्पदं कल्पिते फेलां(?) तत्पदं तत्र कल्पयेत् ।
मृत्पूर्वं संन्यसेद्विद्वान् - - - न समाहितम् ॥

समुद्रमृद्गजातींश्च(?)ब्रह्मरत्नं च हाटकम् ।
गै- - - - - - - - - -तामणिभिस्तदा ॥

चक्रादि - व्यशङ्खादीन् पद्मकन्दं तथैव च ।
स्रुगादि संन्यसेत् तत्र स्थण्डिले हृदये पदे ॥

प्रथमावरणे चैव प्रागादिक्रमयोगतः ।
गिरिजमृदं षष्टिंश्च(?) व्रीहि व- - - - - ॥

वासवे न्यस्य आग्नेय्यां तटाकमृत्वि - - - ।
मौद्गिकं च कुलुत्थं च माषं चैव तु विन्यसेत् ॥

वैडूर्यमुद्गगोधूमौ ताम्रवल्मीमृदं तथा ।
(याम्ये) पदे न्यसेत् तत्र कुशमूलमृदं तथा ॥

शङ्खजं तिलतिल्वं च तत्र नीलपदे न्यसेत् ।
वारुणं स्फाटिकं चैव यवं शकस्त [वंशयवं त?]था ॥

बिल्वमूलमृदश्चैव - - - वारुणे संन्यसेत् ।
वायव्यं(व्ये?) पुष्परागं च कौलि(कुलीरा?)वासमृदं तथा ॥

नीवारं च प्रियङ्गुं च संन्यसेत् तत्र कोविदः ।
कौबेर(रे?) कं-वेदं च(?) गोधूमयवमायसम् ॥

वृषभश्शूल(शृङ्ग?)मृदं न्यस्य ऐशान्ये गजदन्तमृत् ।
सर्वबीजमहंमलं संन्यसेत् क्रमशः सुधीः ॥

द्वितीयावरणे चैव ईशानादिप्रदक्षिणम् ।
गोरोचनं च नीलं च हरितालं तथैव च ॥

लोहिताक्षमणिं चैव तथैव च मनःशिलाम् ।
तथैवोत्पलमणिं चैव अर्जुनं च क्रमेण वै ॥

प्रवालं चैव श्यामं च मनःशिलां च मणिं तथा ।
कासीसं शुक्तिकं चैव पारदं विमलं मणिम् ॥

सौराष्ट्रकं प्रवालं च संन्यसेत् क्रमशः सुधीः ।
तृतीयावरणे चैव ऐन्द्रादिषु पदेषु वै ॥

श्रीवत्सं कुमुदं चैव तथैवोर्जवपर्वतम् ।
पूर्णकुम्भं तथा चैव तथा लक्षत्वरं (प्लक्षत्वचं ?) च वै ॥

पिण्ड्यं चैव तथा भेरीं कन्दं चोत्पलकस्य तु ।
विधोरमादयश्चै(विदूरादर्शने चै(?)वोदुम्बरं वेदपर्वतम् ॥

मत्स्ययुग्मं च कह्लारं महेन्द्रं चाङ्कुशं तथा ।
अश्वत्थं चापुरिश्चन्द्रं - - काहलकं तथा ॥

शतश्शृङ्गं तथा चैव आवर्तं च घटेन वै ।
हिमवत्पर्वतं चैव प्रादक्षिण्यक्रमेण वै ॥

एकैकं विन्यसेद्विद्वान् उत्तमे कल्पिते पदे ।
मध्यमं कल्पितं चेत्तु द्रव्यन्यासं(सो?) विधीयते ॥

हृदये प्रथमं चैव गर्भन्यासः पुरोक्तवत् ।
भूरिगारं तथा चैव श्रीवत्सं कौमुदं तथा ॥

वासवे संन्यसेत् तत्र वासवानलयोरपि ।
रोहिताक्षं न्यसेन्मध्ये आग्नेय्यामूर्जयश्च वै ॥

पूर्णकुम्भसमायुक्तं तथैव च मनःशिलाम् ।
प्लक्षत्वाचमथो न्यस्य यमाग्न्योरन्तरेऽपि च ॥

मध्यं(ध्ये?) चैवोत्पलमणिं संन्यसेत् तत्रकोविदः ।
अञ्जनं चैव भेरीं च याम्ये चैवोत्पलं न्यसेत् ॥

यमरक्षेशयोर्मध्ये प्रवालं संन्यसेद्बुधः ॥
आदर्शनं त्वौदुम्बरं विदूरं श्याममेव च ॥

तत्र नीलपदे न्यस्य नीलवारुणयोरपि ।
मनःशिलामणिं चैव मध्यमे वेदपर्वतम् ॥

संन्यसेद्वारुणे तत्र कासीसं मत्स्ययुग्मकम् ।
कह्लारमपि संन्यस्य वरुणानिलयोरपि ॥

मध्यमे शुक्तिजमणिं संन्यसेत् त(न्त्र?)वित्तमः ।
महेन्द्रं पारदं तन्तु अङ्कुशाश्वत्थमेव च ॥

वायव्यां संन्यसेद्विद्वान् पुरिश्चन्द्रं विमलमणिम् ।
वायुसोमान्तरे तत्र सौम्ये सौराष्ट्रकं तथा ॥

कौशेपकं(काशेरवं?) तथा शङ्खं संन्यसेत् तत्र कोविदः ।
कौबेरेशानयोर्मध्ये - - - संन्यसेत् क्रमात् ॥

आवर्तं शतशृङ्गं च - - गोरोचनं तथा ।
ऐशान्ये संन्यसेत् - - वासवेशानयोरपि ॥

मध्ये नीलमणिं चैव हिमवन्तं च संन्यसेत् ।
अधमं कल्पितं चेत् तु द्रव्यन्यास - - - - ॥

- - - - - - - - - - - - - - - - - ।
- - - - - - - - - षष्टिव्रीहिं तथैव च ॥

वस्त्रं च हरितं चैव हरीतारं(लं?) च कौमुदम् ।
वासवे पदमध्ये तु विन्यसेत् तन्त्रवित्तमः ॥

हिमवत्पर्वतं नीलमणिं चैवोत्तरे न्यसेत् ।
श्रीवत्सं लोहिताक्षं च तत्र दक्षिण - - - - ॥

- - - त मौक्तिक कु(?) तदर्धं माषमेव च ।
मनःशिलां तथा प्लक्षमाग्नेय्यां मध्यमं न्यसेत् ॥

ऊर्गयं(र्जवं?) दक्षिणे न्यस्य कुम्भं वामे तु संन्यसेत् ।
वल्मीकमृत्तथा ताम्रं वैडूर्योत्पलकन्दकम् ॥

अञ्जनं चैव मुद्गं च गोधूमं मध्यमेऽत्र वै ।
विन्ध्यं चैवोत्पलमणिं प्राग्यां(च्यां?) पार्श्वे सुसंन्यसेत् ॥

भेरीं चैव प्रवालं च याम्ये पश्चिमतो न्यसेत् ।
कुशमूलमृदं चैव श्यामं शङ्खजमेव च ॥

उदुम्बरं तिलतिल्वं च मध्य(ध्ये?) नीलपदे न्यसेत् ।
विदूरं दक्षिणे न्यस्य वामे वादर्शनं न्यसेत् ॥

बिम्बं मृद्वपुषां चैव कल्हारं स्फाटिकं तथा ।
यवं वंशयवं चैव कासीसं वारुणे पदम्(दे?) ॥

संन्यसेन्मध्यमे तत्र वेदपर्वतमेव च ।
मनःशिलामणिं चैव संन्यसेद्दक्षिणे बुधः ॥

शुक्तिजं मत्स्ययुग्मं च उत्तरे संन्यसेत् तु वै ।
कुलीरमृत्प्रियङ्गुं च नीवारं पारतन्त्रकम् (पारदं त्रपुम् ?) ॥

अश्वत्थं पुष्परागं च वायव्ये मध्यमे न्यसेत् ।
महेन्द्रं पश्चिमे पार्श्वे पूर्वपार्श्वं (र्श्वे ?) सुसंन्यसेत् ॥

वृषशृङ्गमृदं चैव यवं गोधूममेव च ।
काशेरवं च सौराष्ट्रं चन्द्रकान्तमथायसम् ॥

कौबेरमध्यमेनैतान् संन्यसेत् तन्त्रवित्तमः ।
पश्चिमेन पुरिश्चन्द्रं संन्यसेद्विमलं मणिम् ॥

पूर्वपार्श्वं तथा शङ्खं प्रवालं चैव संन्यसेत् ।
गजदन्तमृदं चैव यवं गोरोचनं तथा ॥

सर्वबीजं महानीलम् ईशान्ये मध्यमे न्यसेत् ।
पश्चिमे शतशृङ्गं च आवर्तं पूर्वतो न्यसेत् ॥

आचार्यः सुप्रसन्नात्मा शरावेषु पृथक् पृथक् ।
संगृह्य स्थण्डिले स्थाप्य वस्त्रेण परिवेष्टयेत् ॥

पूर्वाह्णे देवदेवेशम् अर्चयित्वा निवेदयेत् ।
प्रणमेद्दण्डवद्भूमौ विष्णुसूक्तं समुच्चरन् ॥

देवदेवमनुज्ञाप्य फेलायां न्यासमाचरेत् ।
पदस्था देवतास्तत्र तत्तन्नाम्ना विशेषतः ॥

अर्धद्विगोपचारेण(?) क्षालयेद्गन्धवारिणा ।
आत्मसूक्तं जपित्वा तु देवदेवमनुस्मरन् ॥

श्रीसूक्तेनैव तां फेलामभिमृश्य समाहितः ।
फेलामर्धपदं तत्र महेन्द्रं मण्डलं बुधैः ॥

पार्थि(?)याक्षरसंयुक्तं संस्थाप्योपरि वारुणे ।
मकारान्तर्गतं तत्र आबीजं तु सुसंन्यसेत् ॥

प्रणवेन समावेष्ट्य देवदेवमनुस्मरन् ।
प्रणवं सुप्रसन्नात्मा अष्टोत्तरशतं जपेत् ॥

ततृत्रीण्येषेतिमन्त्रेण तत्र स्थाने मृदं क्षिपेत् ।
या जाता इति मन्त्रेण वसोः पवित्रमित्यपि ॥

तथैव मेदिनीदेवी शं नो देवीति चैव हि ।
आपः पुनन्तु पृथिवीम् इति मन्त्रमुदीरयन् ॥

क्षिपेत् पङ्कजादिं च तत्तत्स्थाने क्रमेण वै ।
ब्रह्मा देवानां पदवीः कवीनामिति मन्त्रतः ॥

तथैवेन्द्रं प्रणवन्तमग्निं दूतं तथैव हि ।
यमो दाधार नमस्ते वसवः प्रथमेति च ॥

- - - - - मन्त्रेण तथैवं मरुतः- - ।
सोमं राजानमिति च ईश ईशेति च क्रमात् ॥

निक्षिपेन्नवरत्नानि स्वे स्वे स्थाने विशेषतः ।
शं नो निधत्तां- - - - - - - - - - - . ॥

तथैव धाता धातॄणाम् इति सौम्येभ्य इत्यपि ।
विश्वेभ्यो देवेभ्यश्चेति विश्वेदेवस्य मन्त्रतः ॥

तथैव ब्रह्म यक्ता व(?) इति सिद्धेभ्य इत्यपि ।
इमां मूर्धेतिमन्त्रेण गन्धर्वेभ्य - - - - ॥

- - - - मिति मन्त्रेण अप्सरोभ्यश्च इति ।

यकोद्रवेका(यं काद्रवेया?)मिति नागेभ्यश्चेत्युदीरयन् ॥

तथैवार्यम्ण: त्रीति(कुम्भीति?) अर्यम्णेति विचक्षण: ।
तत्त्रीण्येषेति मन्त्रेण भूपेभ्य इति च क्रमात् ॥

निक्षिपेत् तु यथान्याय्यं श्रीवत्साद्यष्टमङ्गलान् ।
इदं विष्णुरित्युच्चार्य हिमवत्पूर्वकान् - - -(गिरीन्) ॥

स्वे स्वे स्थाने तु सर्वत्र पर्वतांश्च विनिक्षिपेत् ।
इमे बीजेति स्था(शा?)ल्यादीन् तत्तत्स्थाने विनिक्षिपेत् ॥

भूमाननोग्र इत्युक्त्वा चक्रादीनि विनिक्षिपेत् ।
तथा तन्मायशोग्रेति(?) शङ्खादीनि विनिक्षिपेत् ॥

गन्धद्वारेतिमन्त्रेण स्रुगादींस्तत्र निक्षिपेत् ।
क्रमेण ब्रह्मा देवानां इत्याद्यैर्नवभू: क्रमात् ॥

गैरिकादींस्तथा धातून् तत्तन्नाम्नेति निक्षिपेत् ।
तथा हिरण्यगर्भेति तत्पुरुषाय इत्यपि ॥

तथैवाभि त्वा शूरेति जपन् दत्त्वेति च क्रमात् ।
निक्षिपेत् तु सुवर्णादीन् स्वे स्वे स्थाने विचक्षण: ॥

इदं ब्रह्मेतिमन्त्रेण प्लक्षादीनां च निक्षिपेत् ।
तमेकनेमिमुच्चार्य गजादींस्तत्र निक्षिपेत् ॥

ये ते रातेत्युच्चार्य पुण्यतीर्थं च सेचयेत् ।

प्र. ४. २४,५

आलयात् प्रमुखे चैव मण्टपे समलङ्कृते ॥

गोमयेनोपलिप्यैव पुण्याहं वाचयेत् ततः ।
रक्तबीजानि धातूंश्च संन्यसेन्मन्त्रवित्तमः ॥

वि. १३.६१

सायाह्ने देवाभिमुखे धान्यराश्युपरि प्रागग्रं वस्त्रमास्तीर्य फेलां विन्यस्य तस्मिन् मृदादिद्रव्याणि संभृत्य आचार्यश्चोत्तराभिमुखो भूत्वा गायत्र्या प्रणवाद्यायतानि द्रव्याणि संप्रोक्ष्य मेदिनीति फेलामभिमृश्य ब्रह्मादिनवपदेषु तत्तद्देवत्यमन्त्रेण मृद्रत्नधातुबीजलोहान् क्रमेण संन्यस्य पञ्चायुधान् तत्तन्मन्त्रैर्मध्यमादिचतुर्दिक्षु विन्यस्य मध्ये ब्राह्मणादिवर्णचिह्नानि चतुर्दिक्षु हेमादिलोहान् पद्मादिकन्दानि तत्तद्दिगीशमन्त्रैः पृथक् पृथक् विन्यस्य गजगरुडकूर्मरूपाणि बाह्यपदे तत्तन्मन्त्रेण विन्यस्याष्टदिक्षु मङ्गलान् यथाक्रमेण तत्तद्दिगीशमन्त्रैः संन्यस्य उत्तराच्छादनेन आच्छाद्य- - - - - -

३.६.२१ —— —— भूमियज्ञ-

खि. ५. ५२-९

पूर्वस्मिन्नेव दिवसे रात्रौ होमं समाचरेत् ॥

यत्रैव स्थापयेद्गर्भं तत उत्तरपार्श्वतः ।
सूत्रोक्तेनैव मार्गेण भूमियज्ञं समाचरेत् ॥

पुण्याहं वाचयित्वा तु गर्भस्थाने विशेषतः ।
कुण्डमौपासनं कृत्वा गर्भस्थानस्य दक्षिणे ॥

आघारं विधिवत्कृत्वा अदितेऽन्वादिभिः क्रमात् ।
समिधां क्षेपणं कृत्वा पालाशीनां विशेषतः ॥

गव्यं घृतं समादाय विष्णुसूक्तेन होमयेत् ।
हुत्वा तु पौरुषं सूक्तम् अतो देवादि वैष्णवम् ।
ब्राह्मं रौद्रं च हुत्वा तु यद्देवाद्यैः समन्वितम् ॥

जयाद्यैरपि हुत्वा तु ऐन्द्रमाग्नेयसंयुतम् ।
याम्यं नैर्ऋतसंयुक्तं वारुणं वायुदैवतम् ॥

सौम्यमीशानदैवत्यं हुत्वा तत्र यथाक्रमम् ।
जुहुयाद्भूमिदैवत्यं पाञ्चभौतिकसंयुतम् ॥

व्याहृत्यन्तं तु हुत्वा तु तद्दैवत्यं पृथक् पृथक् ।

अ. ५

[अत्र 'भूमियज्ञं च कृत्वा तु' इत्येव निर्दिश्यत इति विशेषः ।]

य. ७.२४

[अत्र 'भूमियज्ञेन संशोध्य' इत्येव निर्दिश्यत इति विशेषः ।]

३.६.२२ ——— ——— फेलाधिवास-

नि. ७

मण्डपं वा प्रपां वाथ अलङ्कृत्य यथोचितम् ॥

चतुरङ्गुलमुत्सेधं चतुस्तालं तथायतम् ।
व्रीहिभिः स्थण्डिलं कृत्वा द्वितालेनैव मानतः ॥

वृत्ते भ्रमीकृते तत्र तण्डुलैश्च तिलैरपि ।
एकाङ्गुलसमुत्सेधं दलैः षोडशभिर्युतम् ॥

एवं कृत्वा तु तन्मध्ये कल्पयेत् पद्ममण्डलम् ।
दर्भैरुपरि विन्यस्य वस्त्रं तस्योपरि न्यसेत् ॥

पुष्पं तस्योपरि न्यस्य पश्चात् फेलां समाहरेत् ।
मण्डलात् पश्चिमे तत्र विष्टरं स्थापयेत् पुनः ॥

आलयस्योत्तरे पार्श्वे वास्तुहोमं सुहूयताम् ।
पुण्याहं वाचयित्वा तु स्तोत्रध्वनिसमन्वितम् ॥

तूर्यघोषसमायुक्तं फेलामादाय चात्वरः ।
हिरण्यगर्भमित्युक्त्वा स्थापयेत् पद्ममण्डले ॥

पूजयेद्देवदेवेशं ब्रह्माणं च समर्चयेत् ।
दिक्पालान् वासुकिं चैव गजनागान् समर्चयेत् ॥

स. १०. ३१-४

[अत्र फेलाच्छादनं फेलायाः वस्त्रेण वेष्टनं चाधिकमिति विशेषः ।]

अ. ५

[अत्र फेलायाः वस्त्रयुग्मेन वेष्टनं निर्दिश्यते इति विशेषः ।]

क्रि. ५. ३२,३

खि. ५. ६०-३

[अत्र वस्त्रेण वेष्टनमधिकमिति विशेषः ।]

य. ७. २०-६

[अत्र खिलाधिकारवत् ।]

वि. १३. ६१,२

[अत्र पूर्ववत् ।]

३.६.२३ ——— ——— होम-

स. १०. १२-७

ऋक्षाण्येवं परीक्ष्यैव पूर्वोक्तानि शुभानि वै ॥

पञ्चाग्नीन् कल्पयित्वैषामाघारं जुहुयात् तथा ।
एकत्राहवनीये वाप्याघारमिति केचन ॥

पूर्वेद्युरेव कर्तव्यं रात्रौ होमं विधानतः ।
जुहुयाद्वैष्णवं सूक्तमतो देवादिकं पुनः ॥

लोकपालेभ्य इत्युक्त्वा तथा नारायणाय च ।
बीजेभ्यः सर्वधातुभ्यः सर्वलोहेभ्य एव च ॥

नदीभ्यश्च ह्रदेभ्यश्च पातालेभ्यस्तथैव च ।
वृक्षेभ्यश्चैव नागेभ्यो दिग्गजेभ्यस्तथैव च ॥

व्याहृत्यन्तं यजेदेतैर्मन्त्रैः पञ्चसु चाग्निषु ।

अ. ५
नि. ७
य. ७. २६-९
वि. १३.६२

३.६.२४ ——— ——— गर्भन्यासस्थान-

स. १०. ३६-९
ब्राह्मणो यजमानश्चेन्न्यसेद्वै पट्टिकोपरि ॥

नृपश्चेत् तु निधातव्यमुपानादुपरि स्थिरम् ।
तस्मादेकाङ्गुलं न्यूनं वैश्यानां तु विधीयते ॥

ततश्चैकाङ्गुलं न्यूनं शूद्राणामभिधीयते ।
द्वारस्य दक्षिणे भागे भित्तिमध्ये त्रिभागतः ॥

धातुः समीपे न्यस्तव्यमिति शास्त्रस्य निश्चयः ।

क्रि. ५. ३०-२

ज्ञा. ३०.५८

द्वारस्य दक्षिणस्तम्भे कवाटार्गलयोगे गर्भागारे वा यमवरुणसोमदक्षिणांशेषु नृपवैश्यशूद्रविप्राणां वृद्ध्यै स्तम्भं(गर्भं?) स्थापयेत् ।

अ. ५

परिवारगोपुरे चैव मण्डपे पचनालये ।
परिवारे मध्यके न्यस्य स्थलान्तं गोपुरे न्यसेत् ॥

द्वारस्य दक्षिणे भागे पूर्ववद्विधिमाचरेत् ।
स्नपनालयस्य मध्ये तु पचनालयमध्यमे ॥

खि. ५. ४-६, ११-४

गर्भस्थानानि वै सप्त देवागारप्रकल्पने ।
भूमौ च पट्टिकायां च मस्तके च विशेषतः ॥

कूटकोष्ठान्तरे चैव प्राकारे गोपुरे तथा ।
पाकालये विधातव्यमथवा स्नपनालये ॥

नलिनकादिविमानेषु स्थानेष्वेषु निधापयेत् ।
- - - - - - - - - - - - - - - - - - - -॥

विमाने चैव यत्नेन गर्भं सम्यङ्निधापयेत् ।
भूमिभागे विधातव्यं भूमेः सम्बन्धमिच्छता ॥

ऋद्ध्यर्थं पट्टिकायां तु स्थित्यर्थं मस्तके न्यसेत् ।
द्वारे च दक्षिणे भागे भित्तिभागे तु भाजिते ॥

भागे चोत्तरतो गर्भंभित्तिमध्ये निधापयेत् ।
प्राकारे चैव चैन्द्रे तु गोपुरे दक्षिणे तले ॥

पाकालये तु मध्ये तु मध्ये वै स्नपनालये ।

नि. ७

उर्वान्तके(?) शिरस्के च बेरस्थाने तथैव च ।
मध्ये कर्मार्चनास्थाने गर्भं पञ्चसु विन्यसेत् ॥

आलयं देवतानां च शरीरं परिचक्षते ॥

प्र. ४. १५-८

त्रयः प्रासादमूले स्यात् पूर्वं तु प्रथमेष्टके ।
उपानोपरि मध्यं स्यात् प्रतेरुपरि चान्ततः ॥

भूगतं शूद्रजातीनाम् उपाने नृपवैश्ययोः ।
प्रतेरुपरि विप्राणाम् आनुलोम्येन कारयेत् ॥

सर्वेषां भूगतं कार्यं सर्वसिद्धिकरं शुभम् ।
ऐन्द्रपावकयोर्मध्ये प्राग्द्वारेषु प्रकल्पयेत् ॥

द्वारस्य दक्षिणे कुर्यात् पश्चिमेऽपि तथैव हि ।
कवाटार्गलयोगे वा न्यस्तव्यं गर्भभाजनम् ॥

य. ७. १-७,९,१०

अत ऊर्ध्वं प्रवक्ष्यामि गर्भन्यासविधिक्रमम् ।
आलयं देवतानां तच्छरीरं परिपठ्यते ॥

मसूरान्ते चरणान्ते प्रस्तरान्ते गलान्तरे ।
शिखरान्ते स्थूपिकाधस्तात् पञ्चगर्भः प्रशस्यते ॥

आस्थानमण्डपे वाथ तथा स्नपनमण्डपे ।
गोपुरे पचनागारे न्यसेदन्ये मनोरमे ॥

परिवारालये मध्ये गोपुरेऽगारदक्षिणे ।
निर्गमाद्दक्षिणे वापि प्रवेशाद्दक्षिणेऽपि वा ॥

सर्वेषां गोपुराणां च कुड्यस्याभ्यन्तरे बुधः ।

स्थानान्ते संन्यसेद्गर्भं मण्डपे स्नपनालये ॥

द्विजश्चेत्पट्टिकोर्ध्वे तु क्षत्रियः कुमुदोपरि ।
जगत्यूर्ध्वे तु वैश्यः स्यादुपानोपरि शूद्रकः ॥

विमाने तु विशेषेण सर्वेषां वा स्थलान्तरे ।
द्वाराभ्यन्तरयोरन्ये रात्रौ गर्भं निधापयेत् ॥

- - - - - - - - - - - - - -।
द्वारस्य दक्षिणे स्तम्भे भित्तिव्याससमं बुधः ॥

अष्टभागं विभज्याथ चतुर्भागं बहिर्न्यसेत् ।
त्रिभागमभ्यन्तरे नीत्वा स्थाने तस्मिन् समाचरेत् ॥

वि. २३.६३

३.६.२५ ——— ——— अवटकल्पन-

ज्ञा. ३०.५८

अधिष्ठानसनं श्वभ्रावगाढं कृत्वा पूर्ववत् गर्भं संस्थाप्य पश्चाच्छिल्पिभिः शिल्पशास्त्रविधानेनारभेतेति विज्ञायते ।

नि. ७

ललाटमात्रम् (उ?)रोर्मात्रं नाभिमात्रं तथावटम् ॥

तदर्धं विस्तृतायामं दारयेत् तद्विचक्षणः ।
रात्रौ गर्भं निधातव्यं सर्वसंपत्समृद्धये ॥

३.६.२६ ——— गर्भन्यासप्रकार-

स. १०. ३९-४४

अभ्यर्च्य मेदिनीं मुख्यां विष्णोर्देवीं वसुन्धराम् ॥

आत्मसूक्तं जपित्वैव जप्त्वा चैकाक्षरादिकम् ।
विष्णोर्वीर्यमिति ध्यात्वा न्यसेत् तद्भावभावितम् ॥

मेदिनी देवीत्युक्त्वैव गर्भं तत्रैव विन्यसेत् ।
एकाक्षरादिसूक्तं च ध्रुवसूक्तं जपेत् ततः ॥

वैष्णवं विष्णुसूक्तं च जपेद्गुरुरतन्द्रितः ।
आचार्यस्थापकादीनामृत्विजां दक्षिणां ददेत् ॥

अन्नाद्यं च यथाशक्ति दापयेत् सर्ववर्णिनाम् ।
एवं गर्भं तु विन्यस्य पादबन्धादि कारयेत् ॥

न्यसेदेवं विधानेन गर्भं ग्रामस्य वृद्धये ।

अ. ५

[अत्र शिल्पिपूजनं दैवज्ञपूजनं चाधिकम् इति विशेषः ।]

क्रि. ३.१९

नि. ७

[अत्र आचार्यस्थापकादिदक्षिणादानं ब्राह्मणभोजनं च अधिकमिति विशेषः ।]

प्र. ४.२६

[अत्र गर्भन्यासे विष्णुर्योनिमिति मन्त्रः पठनीय इत्युच्यते इति विशेषः ।]

वि. १३. ६२,३

अन्तः परिषेकं कृत्वा तद्रात्रौ सुमुहूर्ते प्राप्ते यजमानः आचार्यादीन् वस्त्रोत्तरीयाभरणैरलंकृत्य दक्षिणां दद्यात् । आचार्यास्तद्भाजनं शिरसा धारयन् वाद्यघोषसमायुक्तमालयं प्रदक्षिणीकृत्य- - - - - - - एवं स्थानं सङ्कल्प्य तस्मिन् मेदिनीमभ्यर्च्य आत्मसूक्तं जप्त्वा इदं विष्णोर्वीर्यमिति ध्यात्वा

मेदिनीदेवीं विष्णुर्योनिं ध्रुवसूक्तं च जप्त्वा तत्रैव गर्भं संस्थापयेत् । पश्चादग्निमासाद्य स्विष्टाकारं पूर्णाहुतिं च यजेत् । अग्निं विसृज्य शिल्पिनमाहूय दृढं कृत्वा तस्योपरि विधिना विमानं कारयेत् ।

य. ७. ११-३, ३०,१

खि. ५. ७७-८२

सायं सन्ध्यामुपास्यैव यजमानयुतो गुरुः ।
ततस्त्वग्निं समासाद्य पूर्ववद्धोममाचरेत् ॥

रात्रौ निधापयेद्गर्भं मुहूर्ते तु विचक्षणः ।
शिरसा धारयेत् फेलां स्थानं सम्यक् प्रवेशयेत् ॥

उभाभ्यां चैव हस्ताभ्यामादाय प्रयतः क्रमात् ।
ध्रुवसूक्तं जपित्वा तु विष्णुसूक्तमतः परम् ॥

देवेशं मनसा ध्यात्वा स्थापयेद्गर्भभाजनम् ।
- - - - - - - - - - - - - - - -॥

- - - - - - - - - - - - - - - - -।
सुधया पूरयित्वा तु शिल्पिना सुदृढं चरेत् ॥

पश्चादग्निं समासाद्य महाशान्तिं हुनेत् क्रमात् ।
स्विष्टाकारं च हुत्वा तु अन्तहोमं ततश्चरेत् ॥

३.६.२७ —— गर्भन्यास - फल-

खि. ५. १०१-३

धनधान्यसमृद्धिः स्याद्वेदानामपि बृंहणम् ।
सन्ततीनां कुलस्यापि यानवाहनभूमिभिः ॥

पत्नीभृत्यमनुष्याणां पशूनामृद्धिमादिशेत् ।
पुत्राभिवृद्धिदं चैव सस्यानामभिवृद्धिदम् ॥

क्षेत्रवृद्धिप्रदं चैव सस्यानामभिवृद्धिदम् ।
राष्ट्राभिवृद्धिदं चापि राज्ञां च बलवर्धनम् ।
यत्रैव स्थापितं गर्भं तत्स्थानस्य समृद्धिदम् ॥

प्र. ४.१४

७. विमानकल्पनम

३.७.१. आलयनिर्माण-विमानकल्पन-विमानपर्याय-

नि. ८

प्रासादमास्पदं सद्म गृहं धाम नु मातनम्(?) ।
विमानं निलयं धिष्ण्यं गेहं च वसतिस्तथा ॥

हर्म्यं निकेतसौधं च अथ वासं लयं क्षयम् ।
आलयं मन्दिरं चैव भवनं वासवाचकाः ॥

३.७.२.०. ——— ——— विमान-पञ्चविध-शान्तिकादिभेदेन

क्रि. ४.३

पञ्चधोत्सेधमुद्दिष्टं शान्तिकादिक्रमेण वै ।
शान्तिकं पौष्टिकं जय्यम् अद्भुतं सार्वकामिकम् ॥

नि. ८

[अत्र जय्यं सार्वकामिकमित्येतयोः स्थाने जयदं कामिकमिति दृश्यते इति विशेषः ।]

वि. ७.२८

[अत्र जय्यमित्यस्य स्थाने जयदमिति दृश्यते इति विशेषः ।]

३.७.२.१. —— ——— ——— शान्तिक-

वि. ७.२८

विमानविपुलस्य सप्तदशोत्सेधं शान्तिकम् ।

ज्ञा. ४.६

नलिनक-स्वस्तिक-पद्मक-पर्वताकृति- सर्वतोभद्र-पञ्चवासन्तिक-सोमच्छन्द-नन्द्यावर्त-श्रीप्रतिष्ठित-चतुरस्फुटादि प्राग्द्वारं द्वादशावरणयुतं † विमानम्।

३.७.२.२. ——— ——— ——— पौष्टिक-

वि. ७.२८

अर्धाधिकोत्सेधं* पौष्टिकम् ।

ज्ञा. १०.१६

विमानं श्रीवृत्तं फुल्लोत्पलं मुकुन्दानुकूलं कुम्भाकारं त्रिकूटं सोमार्धकं कर्णिकाकारं महाहंसमयूरकूर्मप्रलीनकाञ्चनाकारगरुडाकारस्वस्तिकवृक्षमदनाकारं हारवृहद्रथ-चतुःस्फुटमकुटाकारं महाशङ्खध्रुवाकारं महेन्द्रं प्रकीर्णं चेति (एतानि) । प्राग्दक्षिणपश्चिमद्वारमिष्टकादारुजं सुवर्णरजतताम्राच्छादितशिखरमष्टावरणं पञ्चावरणं त्र्यावरणं वा पौष्टिकं मृदारुमयं षड्हस्तं पञ्चहस्तम् ।

३.७.२.२. ——— ——— ——— जयद-

वि. ७.२८

पादोनद्विगुणं☆ जयदम् ।

---

† शान्तिकमिति प्रकरणाल्लभ्यते ।

* विमानविपुलस्येत्यनुवर्तते ।

☆ विमानविपुलस्य पादोनद्विगुणोत्सेधम् ।

३.७.२.४. —— —— —— अद्भुत-

वि. ७.२८☆
अद्भुतं पादाधिकम् ।

३.७.२.५. —— —— —— सार्वकामिक-

वि. ७.२८
(*)द्विगुणं सार्वकामिकं स्यात् ।

३.७.३. —— —— —— आभिचारिक-

ज्ञा. १०.१७
विमानमलक्षणं मृत्पक्वकल्पितं चर्मपांसुकपालतुषकेशास्थियुतम् ।❋

३.७.४.० —— —— —— त्रिविध - नागरादिभेदेन-

वि. ७.२९
नागरं द्राविडं वेसरमिति त्रिविधं हर्म्यरूपम् ।

प्र. ५.१७
य. ८.५५
वा. १

☆ विमानविपुलस्य पादाधिकोत्सेधम् ।
(*) विमानविपुलस्य द्विगुणोत्सेधम् ।
❋ आभिचारिकमिति प्रकरणाल्लभ्यते । ग्रन्थान्तरेषु आभिचारिकविमानस्य निर्देशो नास्तीत्यतः पञ्चधा विमानानीति निर्दिश्यते । द्र.. ३.७.२.०

३.७.४.१ —— —— —— नागर-

वि. ७.२९
खुरादिस्थूपिकान्तं चतुरश्रं नागरम् ।

प्र. ५.१८

य. ८.५५-७
जात्यश्रमायताश्रं यन्नागरं चेति कथ्यते ॥

वृत्तं वृत्तायतं प्रोक्तं द्व्यश्रवृत्तं च पण्डितैः ।
मध्यभद्रयुते ग्रीवादष्टाश्रं स्वस्तिबन्धनम् ॥

उपानात् स्थूपिपर्यन्तं वर्णाश्रं नागरं विदुः ।

३.७.४.२. —— —— —— द्राविड-

वि. ७.२९
तथैव* वस्वश्रशिखरग्रीवं द्राविडं स्यात् ।

प्र. ५.१८

य. ८.५७

३.७.४.३ —— —— —— वेसर-

वि. ७.२९

---

* खुरादिस्थूपिकान्तं चतुरश्रं ग्रीवाशिखरयोः अष्टाश्रं च विमानं द्राविडम् इति यावत् ।

तथैव* वृत्तं वेसरम् । अथवा प्रस्तरान्तं समचतुरश्रं तदुपरि वृत्तग्रीवाशिखरं च वेसरम् ।

प्र. ५.१९
कण्ठप्रभृति वृत्तं यद्वेसरं तत्प्रचक्षते ।

य. ८.५८

३.७.५. ——— ——— ——— श्रेष्ठ - उपादानद्रव्यानुरोधेन

वि. १३.६३
विमानमेकद्रव्यकृतं (चेत्) श्रेष्ठम् ।.....शिलया इष्टकया दारुणा वा पादुकादिस्थूप्यन्तं यत्कृतं तदेकद्रव्यकृतम् ।

य. ४.१९,२३
[अत्र श्रेष्ठम् इत्यस्य स्थाने उत्तममिति, एकया शिलया कृतं धाम उत्तममिति च निर्दिश्यते इति विशेषः ।]

३.७.६ ——— ——— ——— मध्यम- ———

वि. १३.६३
विमानं- - - - - - - - - द्विद्रव्यकृतं मध्यमम् ।- - - - - - -मसूरकान्तं प्रस्तरान्तं वा शिलयैव कृत्वा शिष्टमिष्टकया कल्पितं यत् तद्द्विद्रव्यकृतम् ।

---

*खुरादिस्थूपिकान्तम् ।

य. ४. १९,२०,३

[अत्र वृतेरुपरिष्टात् इष्टकाभिः कृतं, जातिद्वययुतशिलाभ्यां कृतं वा मध्यममिति निर्दिश्यते इति विशेषः ।]

३.७.७. ——— ——— ——— अधम- ———

वि. १३.६३

विमानं...........त्रिद्रव्यकृतमधमम् ।.........एतदेव* शिखरं लुपाविधानेन कृत्वोपरि लोष्टाच्छादनं यत्तत्रिद्रव्यकृतम् ।

य. ४.२०,३,४

[अत्र शिलेष्टकातरुभिः कृतं जातित्रययुतशिलाभिः इष्टकया सह कृतं वा कनिष्ठमिति निर्दिश्यते इति निशेषः ।]

३.७.८. ——— ——— ——— त्रिविध-स्थानकादिभेदेन

वा. ३

स्थानकं चासनं चैव शयन तत्★ त्रिभेदकम् ।

३.७.९. ——— ——— ——— ——— पुमादिभेदेन-

वा. ३

गुणत्रयप्रमाणस्य विभागावादि(?) कारयेत् ॥

देवस्य रूपयुक्तं तु पुं स्त्री चैव नपुंसकम् ।

---

* द्विद्रव्यकृतमेव ।

★ विमानम् ।

३.७.१० ——— ——— ——— ——— विष्ण्वादिभेदेन

वा. ३

एतस्य जातिभेदैस्तु विष्णुरुद्रप्रजापतीन् ॥

एवं तु तत्तद्देवस्य प्रासादस्य तु लक्षणम् ।

३.७.११. ——— ——— ——— अधमाधम-हस्तमानानुरोधेन

स. ७.१,२

अतःपरं प्रवक्ष्यामि विमानानां विधिं क्रमात् ।
पञ्चहस्तविमानं यद्विष्णोस्तदधमाधमम् ॥

त्रिहस्तमन्यदेवानामधमाधममुच्यते ।

खि. १५. २०५,६

[अत्र स्थानं विनाधिपादीनां मण्डपं वा विधीयते इत्यधिकम् इति विशेषः।]

३.७.१२. ——— ——— ——— अधममध्यम- ———

स. ७.२

सप्तहस्तविमानं यदधमान्मध्यमं स्मृतम् ॥

३.७.१३. ——— ——— ——— अधमोत्तम- ———

स. ७.३

नवहस्तकृतं यत्तदधमादुत्तमं भवेत् ।

३.७.१४ ——— ——— ——— मध्यमाधमादि- ———

स. ७.३,४
हस्तानेकादशारभ्य चैकविंशतिकादधः ॥
मध्यमादधमं मध्यमुत्तमं चाभिधीयते ।

३.७.१५ ——— ——— ——— उत्तमाधमादि- ———

स. ७.४,५
त्रयोविंशतिकादूर्ध्वं पञ्चाशद्धस्तकादधः ॥
उत्तमादधमं मध्यमुत्तमं च त्रिधा भवेत् ।

३.७.१६.० ——— ——— ——— द्विविध-कायानुकायभेदेन

प्र. ५.२५
कायं चाप्यनुकायं च कुर्यादुत्सेधमानतः ।

३.७.१६.१ ——— ——— ——— काय-

प्र. ५. २५-७
भागमेकमधिष्ठानम् उत्सेधो वसुधा भवेत् ॥
पादायामो द्विभागः स्यात् भागः प्रस्तार उच्यते ।
भागः कण्ठ इति प्रोक्तं द्विभागं शिखरं भवेत् ॥
भागः स्थूपिरिति ख्यातं एवमुत्सेध उच्यते ।
कायमेवं समाख्यातं- - - - - - - -॥

३.७.१६.२ ——— ——— ——— अनुकाय-

प्र. ५. २७-३१

- - - - - - - - -अनुकायमथोच्यते ॥

कुर्यात् प्रासादविस्तारं चतुर्विंशति*भागिकम् ।
एकभागं तु विस्तारं भागमेकं तलं तथा ॥

दशाङ्गुलं स्यात् द्वितले त्रितले द्वादशाङ्गुलम् ।
युगाङ्गुलविवृद्ध्या तु कर्तव्यं स्यात् तलं प्रति ॥

पादमस्य तु विष्कम्भम् अष्टभागं विहीनकम् ।
स्तम्भाग्रेणैव कर्तव्यम् अनुकायप्रमाणतः(?) ॥

उपानस्य तु विष्कम्भम् अग्रे पादद्वयं भवेत् ।

३.७.१७ ——— ——— ——— अधम-तलसंख्यानुरोधेन

स. ७.११

एकभूमिविमानं तदधमं परिचक्षते ॥

३.७.१८ ——— ——— ——— मध्यम- ———

स. ७.१२

द्वितलं मध्यमं प्रोक्तम् - - - - - - - - - -।

३.७.१९ ——— ——— ——— उत्तम- ———

स. ७.१२

---

* अत्रोक्तानां चतुर्विंशतिभागानामग्रिमेण संगतिः न दृश्यते ।

- - - - - - - - -उत्तमं त्रितलं भवेत् ।
अशक्तानामिदं ज्ञेयं शक्तानामधिकं विदुः ॥

३.७.२० —— —— —— उत्तमोत्तम- ——

स. ७. १३,४

तलैर्द्वादशभिर्युक्तमुत्तमोत्तममुच्यते ।
अशक्यं तन्मनुष्याणां देवानामभिधीयते ॥

ब्रह्मा नलिनकं विष्णोः तलैर्द्वादशभिर्युतम् ।
विमानं दृष्टवानब्धौ तत्रैवापूजयद्धरिम् ॥

३.७.२१ —— —— —— —— तलसंख्यानपेक्ष-

स. ७.१५

नलिनकं सप्ततलं पञ्चभूमियुतं तु वा ।
त्रितलं वा मनुष्याणामुत्तमोत्तममुच्यते ॥

३.७.२२. —— —— शान्तिकविमान-एकतल-अधिष्ठानाद्युत्सेधमान-

वि. ९.३३,४

शान्तिकोत्सेधं षडंशं कृत्वा एकांशमधिष्ठानं, द्व्यंशं पादतुङ्गं, द्व्यंशं शिखरम्, एकांशं 'स्थूपिकोदयमेवं चतुर्वर्गयुतम्, अथवा शिखरक्रियां लुपाविधानेन कारयेत्। शान्तिकोत्सेधमष्टभागं कृत्वा एकांशमधिष्ठानं, तद्द्विगुणं स्तम्भायामं, तदुपरि प्रस्तरमेकांशं, कण्ठमेकांशं, द्व्यंशं शिखरम्, एकांशं स्थूपिकोदयं स्यात् ।

- -

अथवा शान्तिकपौष्टिकजयदानाम् उत्सेधं क्रमेण सप्तषट्पञ्चभागं कृत्वा तत्तदेकांशं हित्वा समारोपयेत् इत्येके ।

क्रि. ४. ९,१०

शान्तिकेऽर्धाष्टभागं तु पूर्वोक्तं(?)गण्यमर्पयेत् ॥

मुनिभिस्तव देवोक्तं सर्वदेशिकमन्दिरम् ।

३.७.२३ —— —— पौष्टिकविमान- —— ——

वि. ९.३३,४

पौष्टिकोर्ध्वं नवभागं कृत्वा तदेकांशमधिष्ठानं, पादार्धाधिकं द्व्यंशं पादायामं प्रस्तरं पादार्धोनांशं, सपादांशं कण्ठं, पादोनं त्र्यंशं शिखरम्, एकांशा स्थूपिका स्यात् ।- - - - - - -- - - - - अथवा शान्तिकपौष्टिकजयदानाम् उत्सेधं क्रमेण सप्तषट्पञ्चभागं कृत्वा तत्तदेकांशं हित्वा समारोपयेत् इत्येके।

क्रि. ४.१०-२

नवांशे पौष्टिकोत्सेधे सार्धपादांशकं तलम् ॥

द्व्यंशकं चरणं सार्धपादांशं च चतुर्गुणम् ।
एकांशं गलमानं स्यात् द्व्यंशकं शिखरोदयम् ॥

एकांशं स्थूपिकोत्सेधमेवं पौष्टिककल्पनम् ।

३.७.२४ —— —— जयदविमान- —— ——

वि. ९.३४

जयदोत्सेधं दशांशं कृत्वा एकांशमधिष्ठानं, द्व्यर्धांशं पादतुङ्गम्, एकांशं प्रस्तरं, सार्धमेकांशं कण्ठं, त्र्यंशं शिखरम्, एकांशं स्थूपितुङ्गं स्यात् । ----------------अथवा शान्तिकपौष्टिकजयदानाम् उत्सेधं क्रमेण सप्तषट्पञ्चभागं कृत्वा तत्तदेकांशं हित्वा समारोपयेत् इत्येके ।

क्रि. ४. १२,३

दशांशे जयदोत्सेधे स्थूपिका प्रस्तरे तथा ॥

एकांशं सार्धनयनं चरणं शिखरोदयः ।
सार्धांशं तु गलोत्सेधम् एवं जयदमीरितम् ॥

(षण्मन्विपुरसार्केषु भागे षड्वर्गमेव वा) ।

३.७.२५ —— —— अद्भुतविमान- —— ——

वि. ९.३४

अद्भुतोत्सेधमेकादशांशं कृत्वा सपादांशमधिष्ठानं, तद्द्विगुणं स्तम्भायामं, तदुपरि प्रस्तरमेकांशं, सार्धांशं कण्ठं, त्र्यर्धांशं* शिखरं, सपादांशं स्थूपिकोदयं स्यात्।
- - - - - -अद्भुतोत्सेधमप्येवं योजयेदिति केचित् ।

क्रि. ४. १४,५

रुद्रांशे सदनोत्सेधे सपादांशं तलोदयम् ।
सार्धाक्षमङ्घ्रितुङ्गं स्यात् एकांशं प्रस्तरोदयम् ॥

ग्रीवोदयं च सार्धांशं सार्धांशं शिखरोदयम् ।
सपादं शिखरोत्सेधम् एवमद्भुतमीरितम् ॥

३.७.२६ —— —— सार्वकामिकविमान- —— ——

वि. ९.३४

सार्वकामिकोत्सेधं द्वादशांशं कृत्वा सपादांशमधिष्ठानं, द्विगुणं स्तम्भायामं, सपादांशं प्रस्तरं, सपादांशं कण्ठं, पादं (वा) तदुपरि प्रस्तरम् एकांशम्, एकांशं कण्ठं, पादोनत्र्यंशं शिखरम्, एकांशं स्थूपिकोदयं स्यात् ।

---

* सार्वकामिकोक्तवत् ।

क्रि. ४.१६,७

धात्वंशे हर्म्यतुङ्गे स्यात् तलं तद्द्विगुणांशकम् ।
त्र्यंशकं शिखरोत्सेधम् एकांशं स्थूपिकोदयम् ॥

सार्वकामिकमित्येतदेकभूमौ विशेषतः ।

३.७.२७ —— —— शान्तिकविमान-द्वितल- ——

क्रि. ४.१७-९

द्वितले शान्तिकोत्सेधे चतुःसप्तांशभाजिते ।
अधिष्ठानं त्रिभिर्भागं षड्भागं चक्रमग्निभिः ॥

पादोदयं तु पञ्चांशं द्व्यंशकं मञ्चमीरितम् ।
वितर्दिका शशी ग्रीवा द्विभागं शिखरोदयः ॥

अध्यर्धचतुरंशं स्यात् स्थूपिका सार्धमंशकम् ।

३.७.२८ —— —— पौष्टिकविमान- —— ——

क्रि. ४. २०-२

पौष्टिके द्वितलोत्सेधे चतुस्त्रिंशद्विभाजिते ।
सार्धांशकमधिष्ठानं द्विगुणं चरणोदयम् ॥

साग्र्यंशं प्रस्तरोत्सेधं षड्भागं चरणोदयम् ।
तदर्धं मञ्चतुङ्गं स्यात् वेदिकैकेन कल्प्यते ॥

सार्धाग्र्यंशं गलोत्सेधं शरांशं शिखरोदयम् ।
सार्धांशं स्थूपितुङ्गं स्यात् एतत्सर्वसुखावहम् ॥

३.७.२९ ——— ——— जयदविमान- ——— ———

क्रि. ४. २३,४

जयदस्य त्रयस्त्रिंशद्भागे सार्धानळं धरा ।
सप्ताङ्घ्रिस्तळमंशं स्यात् रसाङ्घ्रिर्मञ्चमग्निभिः ॥

वेदिकैकं गळं सार्धं दृक्छरांशं तु मूर्धनि ।
सार्धांशं स्थूपितुङ्गं स्यात् जयदाळयमीरितम् ॥

३.७.३० ——— ——— अद्भुतविमान- ——— ———

क्रि. ४. २५,६

पड्भागे त्वद्भुतोत्सेधे चतुरंशं तळोदयम् ।
(अष्टांशं चरणोत्सेधं सार्धाग्निः प्रस्तरोदयम् ॥)

सप्तांशं चरणोत्सेधं मञ्चोत्सेधं त्रियंशकम् ॥

वेदिकैकं गळं त्र्यंशं भूतांशं शिखरोदयम् ।
स्थूपिका सार्धपादं स्यात् एवमद्भुतमीरितम् ॥

३.७.३१ ——— ——— सार्वकामिकविमान- ——— ———

क्रि. ४. २७,८

चत्वारिंशद्भागिके हर्म्यतुङ्गे
वेदा भूमौ अष्टपादौ च मञ्चम् ।
पादेनार्धं सप्तभागं तळोऽग्निः ।
वेदिर्द्वाभ्यां वह्निभिः कन्धरोच्चम् ॥

सप्तांशं शिखरोत्सेधं सार्धांशं स्थूपिकोदयम् ।
अद्भुते शान्तिकं गण्यं योजयेत् सर्वदेशिकः ॥

३.७.३२ —— —— शान्तिकविमान - त्रितल- ——

क्रि. ४.२९-३२
त्रितले शान्तिकोत्सेधे चतुर्विंशतिभाजिते ।
अधिष्ठानं द्व्यंशकं स्यात् वेदभागं पदोदयम् ॥

अक्षांशं प्रस्तरोत्सेधं सत्रिपादाग्निरङ्घ्रयः ।
सार्धभागं तु मञ्चं स्यात् सार्धाग्निश्चरणोदयम् ॥

सपादांशं तु मञ्चोच्चं सत्रिभागं वितर्दिका ।
ग्रीवोत्सेधं शिवांशं स्यात् शिखरं सार्धवह्निभिः ॥

एकांशं स्थूपिकोत्सेधम् एवं त्रितलशान्तिकम् ।

३.७.३३ —— —— पौष्टिकविमान- —— ——

क्रि. ४.३२-५
पौष्टिके सदनोत्सेधे चतुर्विंशतिभाजिते ॥

अधिष्ठानं द्वियंशं स्यात् एकांशं चरणोदयम् ।
प्रस्तरोत्सेधमष्टांशं सत्रिपादाग्निरङ्घ्रयः ॥

मञ्चं सार्धांशकं पादं साग्निरध्यर्धकं तलम् ।
एकांशं वेदिकोत्सेधं ग्रीवामानं तथैव च ॥

त्रियंशं शिखरोत्सेधं पादोनांशं शिखोदयम् ।

३.७.३४ —— —— जयदविमान- —— ——

क्रि. ४.३५-८
जयदे हर्म्यतुङ्गे तु सप्तविंशतिभाजिते ॥

मुखोदयं द्व्यंशतलं द्व्यंशं च चरणोदयम् ।
द्वियंशं प्रस्तरोत्सेधं चतुर्भिश्चरणोदयम् ॥

पादहीनं द्विभागेन प्रस्तरोत्सेधमिष्यते ।
सार्धाग्न्यंशं तु पादोच्चम् अध्यर्धांशं तु मञ्चकम् ॥

सोमांशं वेदिकामानं गलमानं द्विभागतः ।
वेदांशं शिखरोत्सेधं सपादांशं शिखोदयम् ॥

३.७.३५ ——— ——— अद्भुतविमान- ——— ———

क्रि. ४.३९-४२

अद्भुते सदनोत्तुङ्गे द्विचत्वारिंशदंशके ।
सार्धाग्न्यंशमधिष्ठानं सप्तांशं चरणोदयम् ॥

अधिष्ठानसमं मञ्चं सार्धषट्चरणोदयम् ।
अग्न्यंशं प्रस्तरोत्सेधं पादमानं षडंशकम् ॥

प्रस्तरं सार्धमक्षांशं सोमांशं वेदिकोदयम् ।
ग्रीवामानं द्विभागेन पञ्चांशं शिखरोदयम् ॥

पक्षांशं स्थूपिमानं तु शालादीन् सर्वदेशिकः ।

३.७.३६ ——— ——— सार्वकामिकविमान- ——— ———

४. ४२-५

सार्वकामिकहर्म्योच्चे षडष्टांशविभाजिते ॥

पादांशं तु धरातुङ्गं पादस्यार्धाष्टकांशकः ।
अधिष्ठानसमं मञ्चम् अष्टांशं चरणं ततः ॥

मञ्चं पादोनवेदांशं पादपादाधिकाचलम् ।
अध्यर्धाग्र्यंशकर्णं च शिवांशा वेदिका भवेत् ॥

द्व्यंशं गलं शरांशं तु शिखरं स्थूपिकावनिः ।
गण्ये त्वन्योन्यसंकीर्णे ग्रामकर्तृविनाशनम् ॥

३.७.३७ —— —— शान्तिकादिविमान-ग्रीवाशिखरकूटभेदकल्पन-

स. ९.४

ग्रीवशिखरकूटेषु भेदं च परिकल्पयेत् ॥

३.७.३८ —— —— विमान - नलीनकादि-

अ. ६

अत ऊर्ध्वं विधानेन प्रासादविधिरुच्यते ।
नलीनकं तथाष्टाङ्गं नन्द्यावर्तं चतुष्फुटम् ॥

विष्णुच्छन्दं ब्रह्मवृत्तं सर्वतोभद्रमेव च ।
ऊर्जालपत्रकं चैव सोमच्छन्दं वसन्तकम् ॥

गजपादं सिंहपादं हस्तिपृष्ठं तथोच्यते ।
पर्वताकृतिकं चैव श्रीप्रतिष्ठितमेव च ॥

पद्माकारं श्रियावृत्तम् अष्टाङ्गादि च षोडश[✽] ।

नि. ८

नलीनकहृदादीनां मानानि कथितं पुरा ।
तथा विन्यासभेदं च ब्रह्मणा परमेष्ठिना ॥

[✽] अत्र प्रथमस्य नलीनकविमानस्य देवलोक एव कर्तुं शक्यत्वात् तद्विहाय अष्टाङ्गादिश्रियावृत्तपर्यन्तं षोडशविमानानीत्यवगन्तव्यम् ।

नलीनकविमानं तु प्रलीनकमतः परम् ।
अष्टाङ्गं स्वस्तिकं चैव श्रीप्रतिष्ठितमेव च ॥

पर्वताकृतिकं चैव नन्द्यावर्तं तथैव च ।
क्र (दिशा ?) स्वस्तिकविमानं च सर्वतोभद्रमेव च ॥

विष्णुच्छन्दविमानं च महापद्मं तथैव च ।
हस्तिपृष्ठं रुद्रच्छन्दं वृषभृङ्गे यथा तथा ॥

कालाकृतं(?) शतैर्योगं वृत्ताभं च चतुःस्फुटम् ।
मुखशुद्धस्तिक(?) पद्मं च(?) अ - - - - - - --॥

- - -विन्योत्पलपुटावुद्योगं पद्ममेव च ।
- - - - - - - - - - - - - - न्तकन्तकम् ॥

चतुःस्फुटं महाराजछन्दस्थ - लकं तथा ।
कुबेरमृ(वृ?)षभच्छन्दो सिंहवीवासमेव च ॥

चित्रकान्तं तथा स्वागं(?) कर्णशालाविमानकम् ।
मातृकाये ध्वजं चैव गणिकाशालमेव च ॥

- - - - - - - - - - - -छन्दं तथैव च ।
मितवाटिमं(?) श्रीभद्रं सर्वाङ्गललितं पुनः ॥

वासि(पी?)प्रासादकं तत्र कुरुनालं(?) मालवं गृहम् ।
कुचनन्दी च शाला च पृथिवी जयं - तथा ॥

अरार्णवक्तकोनं(?) च पद्मालि च गृहे तथा ।
मस्तत्यौपलवक्रं च(?) तथा सिंहविशालकम् ॥

कुमारकान्तं प्रत्यन्तं तथा पञ्चवसन्तकम् ।
अधच्छ(?)मेकलिङ्गं च तथा दारुविमानकम् ॥

गरुडकैलासच्छन्दो श्रीच्छन्दं रतिवर्धनम् ।
गोमुखं छन्दमेवं च एकपादं तथैव च ॥

तथा सिंहकुलानां च वसन्तविजयं(?) तथा ।
चन्द्रं न गृहशौचे व(?) छायकल्याणको गृहौ ॥

सर्वाङ्गसुन्दरं चैव योगकान्तं तथैव च ।
अश्वाननश्यनच्छन्दं गणिकापिण्डितं तथा ॥

तौ कूटपुटच्छन्द मुण्डप्रास इमे म (सादमेव?) च ।
उत्पलाङ्गविमानं च चतुष्पदिकमेव च ॥

क्रमान्नलिनकादीनां नामानि च विदुर्बुधाः ।

३.७.३९.० —— —— —— दशविध - श्रीवत्सादि-

प्र. ३.१-५

अथ विन्यासरूपाणि प्रवक्ष्यन्ते यथाक्रमम् ।
श्रीवत्सं प्रथमं प्रोक्तं नन्द्यावर्तं द्वितीयकम् ॥

तृतीयं स्वस्तिकं विद्यात् चतुर्थं भद्रकं स्मृतम् ।
दण्डकं पञ्चमं त्वाहुः वेदिकं षष्ठमुच्यते ॥

कुम्भकं सप्तमं विद्यात् अष्टमं पद्मकं तथा ।
नवमं स्याद्रथपदं दशमं तु प्रकीर्णकम् ॥

एतेषामाकृतिं वक्ष्ये यथावदनुपूर्वशः ।
अन्यत्र दण्डकात् सर्वं बहिर्वीथीसमन्वितम् ॥

तस्य चान्तर्गतैश्चिह्नैः श्रीवत्साद्यं विधीयते ।

३.७.३९.१. —— —— —— श्रीवत्स-

प्र. ३.५,६

एकप्राचीनवीथीकम् उदीचीनान्यवीथिकम् ॥

श्रीवत्समिति विज्ञेयं सर्वविद्यासमं मतम् ।

३.७.३९.२ ——— ——— ——— **नन्द्यावर्त-**

प्र. ३.६,७

मध्ये कोणं चतुर्द्वारं प्रागीशादि प्रदक्षिणम् ॥
तन्निर्गतोजवीथीकं नन्द्यावर्तमिति स्मृतम् ।

३.७.३९.३ ——— ——— ——— **स्वस्तिक-**

प्र. ३.७

स्वस्तिकं त्वोजवीथ्यन्तं- - - - - -॥

३.७.३९.४ ——— ——— ——— **भद्रक-**

प्र. ३.७

- - - - - - - - - -भद्रं मध्यप्रतोलिकम् ॥

३.७.३९.५ ——— ——— ——— **दण्डक-**

प्र. ३.८

एकप्राचीनकं दण्डं- - - - - - - - -।

३.७.३९.६ ——— ——— ——— **वेदिक-**

प्र. ३.८

- - - - - - - - - - चतुरश्रं तु वेदिकम् ।

३.७.३९.७ ——— ——— ——— **कुम्भक-**

प्र. ३.८
वृत्तं कुम्भकमुद्दिष्टं- - - - - - - - - - - - - -॥

३.७.३९.८ ——— ——— ——— **पद्मक-**

प्र. ३.८
- - - - - - - - - - - --पद्मकं स्याद्द्विवेदिकम् ॥

३.७.३९.९ ——— ——— ——— **रथपद-**

प्र. ३.९
ब्रह्मकोशाष्टकद्वारवीथी रथपदाकृतिः ।

३.७.३९.१० ——— ——— ——— **प्रकीर्णक-**

प्र. ३.९,१०
प्रागुदक्प्रवणं चैव प्रकीर्णकमुदाहृतम् ॥
द्विद्वारं वा चतुर्द्वारं मनस्तो युक्तितो भवेत् ।

३.७.४०.० ——— ——— देवयोग्यविमान - अष्टविध - नलीनकादि-

खि. ६.३,४
नलीनकं तु प्रथमं प्रलीनकमतः परम्॥
श्रियः स्थानं पृथङ्मानं दिशास्वास्तिकमेव च ॥
नन्द्यावर्तं च श्रीवृत्तं पर्वताकृतिकं तथा ।
अष्टौ महापद्ममिति देवानां परिकीर्तिताः ॥

ज्ञा. ३३.६३

[अत्र नलिनकसंज्ञकमेव देवयोग्यं विमानमिति निर्दिश्यत इति विशेषः ।]

३.७.४०.१ ——— ——— नलीनक-

खि. ६. ११-२४

अतः परं प्रवक्ष्यामि विमानानां तु लक्षणम् ।
प्रथमं नलीनकस्योक्तमलङ्कारं प्रवक्ष्यते ॥

मूलक्रिया सुविज्ञेया चतुरश्रा नलीनके ।
तस्मात् त्रयाणां भागानां मध्ये गर्भगृहं विदुः ॥

कर्तव्यालंकृतिस्तत्र वृत्तं च परिकीर्तितम् ।
अर्धं गर्भगृहस्यापि करपिण्डी त्रिपादके ॥

खण्डहर्म्यस्य विस्तारो गर्भविस्तार एव च ।
अर्धं सोपानविस्तारो गर्भार्धं परिकीर्तितम् ॥

अधस्तादूर्ध्वतः स्तम्भाः संस्थानानि पृथक् पृथक् ।
पूर्वाग्रं शैलचतुरमर्धस्तम्भं समाचरेत् ॥

तस्यैव पादबन्धं तु द्विविधं परिकीर्तितम् ।
उत्तरं तस्य कर्तव्यं पार्श्वे खण्डोत्तरं तथा ॥

अधस्तादूर्ध्वतस्तस्य सोपानानि पृथक् पृथक् ।
ज्ञेयं तु भित्तिसोपानं सखण्डार्धं ततस्ततः ॥

पार्श्वे च तस्य कर्तव्यौ भित्तिखण्डेन संयुतौ ।
सोपानानि षडेव स्युः तत्र हर्म्यं समाचरेत् ॥

दर्शनं पिण्डिपादं च ऊर्ध्वं तस्य समाचरेत् ।
द्विकर्णिकायाः कर्तव्या धराश्चाकारवत्तथा ॥

शिरसस्तस्य संस्थानमायामं वृत्तमिष्यते ।
शिरसोऽपि मुखे नासी गर्भार्धं तु प्रमाणतः ॥

निर्गमं तावदेवास्य मुखे तस्य विभूषितम् ।
विचित्रं हस्तिमुण्डं च धराग्रं परिकीर्तितम् ॥

वेदिका द्विविधा ज्ञेया जालका त्रिविधा भवेत् ।
पुष्टिका अपि सप्त स्युरष्टौ तु मुखपिण्डिकाः ॥

नासी मृणालिका चैव मुष्टिबन्धं तथैव च ।
वेदिका जालका चापि मल्लबन्धं पृथक् पृथक् ॥

अधस्तादूर्ध्वतश्चापि स्वे स्थाने संनिवेशयेत् ।
व्यालभूमिश्च कर्तव्या स्वस्थानेषु समन्ततः ।
धरास्तत्र तु कर्तव्या एका वा बहुशोऽपि वा ॥

नि. ९

स. ८.१६

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

ज्ञा. ३३.६३

[अत्र समूर्तार्चनाधिकरणवत् ।]

अ. ६.

नलीनकविमाने च तलं द्वादशमेव च ॥

शतं विंशतिहस्तं च न शक्यं मेदिनीकृतम् ।
स्वर्गे तस्य प्रकल्प्यैव दैविकं देवतालयम् ॥

अष्टाङ्गादिविमानानां हस्तालंकारभूषणम् ।
नलीनकं समारभ्य प्रोक्तं वासाधिकारके ॥

तथा चरेद्विमानानि प्राकारं च प्रवक्ष्यते ।

३.७.४०.२. ——— ——— ——— प्रलीनक-

खि. ६. २५-३७

द्वितीयं प्रलीनकं ज्ञेयं संस्थानं तस्य वक्ष्यते ।
मूलकर्म तु विज्ञेयं चतुरश्रं प्रलीनके ॥

अष्टानां तु विभागानां मध्ये गर्भगृहं भवेत् ।
तस्यापि चैव संस्थानं चतुरश्रं तु पूजितम् ॥

गर्भार्धं करपिण्डी स्यात् गर्भस्य परिवेष्टनम् ।
करपिण्डीप्रमाणेन जालपादं द्विपार्श्वयोः ॥

द्विपादं खण्डहर्म्यादिविस्तारात् परिकीर्तितम् ।
तस्य गर्भस्य विस्तारं हीनं वा परिकीर्तितम् ॥

प्रमाणशाला कर्तव्या एतदुक्तप्रमाणतः ।
भित्तिशाला तयोस्तावत् गर्भार्धं तु प्रकीर्तितम् ॥

तत्र सोपानविस्तारं तावन्मानं समाचरेत् ।
तस्यायामं तु विज्ञेयं तस्यैव द्विगुणं भवेत् ॥

- - - - चतुरश्रमग्रभूतलमिष्यते ।
पूर्वाग्रेश्चैव विज्ञेयमधःस्तम्भः प्रकीर्तितः ॥

उत्तरास्त्रिविधाः प्रोक्ताः तस्यैव तु समन्ततः ।
तस्यैव बन्धसोपानं सर्वतः परिकीर्तितम् ॥

प्रियदर्शनकर्णं च वृद्धिस्तम्भश्च ऊर्ध्वतः ।
पवित्रफलकामूलं हस्तिमण्डं तथैव च ॥

धरास्तस्य तु कर्तव्याः सर्वतः सुमनोरमाः ।
वेदिका द्विविधा ज्ञेया जालका हस्तिचक्षुषा ॥

हर्म्यमेकं तु कर्तव्यं सोपाने द्वे समाचरेत् ।
शिरसोऽपि मुखे नासीविस्तारः परिकीर्तितः ॥

गर्भस्य तु चतुर्भागस्तेषु चैको भवेत् ततः ।
पृष्ठमेकमपीडं च नासी तस्य प्रकीर्तिता ॥

हस्तिहस्तं तु कर्तव्यं नासीष्वेषु समन्ततः ।
वेदिका जालकाश्चापि स्वस्थानेषु निवेशयेत् ।
एका वा बहुशो वापि धरास्तस्य प्रकीर्तिता: ॥

नि. ९

३.७.४०.३ —— —— —— श्रियः स्थान-

खि. ६. ३८-५०

तृतीयं तु श्रियः स्थानमलङ्कारस्तु वक्ष्यते ।
श्रियः स्थानस्य मूलं तु चतुरश्रायतं भवेत् ॥

अष्टानामपि भागानां मध्ये गर्भगृहं भवेत् ।
अर्धं गर्भगृहस्यापि करपिण्डी त्रिपार्श्वतः ॥

तत्रैव जालपादं तु त्रिपादं कारयेत्ततः ।
ज्ञेयं तु गर्भसंस्थानं चतुरश्रं सुपूजितम् ॥

तस्यैव खण्डहर्म्याणि वेष्टितानि समन्ततः ।
खण्डहर्म्यस्य विस्तारमर्धं गर्भगृहस्य तु ॥

प्रमाणं हर्म्यसोपानं विस्तारस्तावदेव तु ।
तस्यैव शिरसो ज्ञेयं चतुरश्रं सुपूजितम् ॥

गर्भस्यापि मुखे नासीविस्तारः परिकीर्तितः ।
गर्भस्य चाष्टभागस्तु निर्गमस्तावदेव तु ॥

भद्रस्तम्भं प्रवक्ष्यामि तच्छृणुध्वं पृथक् पृथक् ।
अष्टाश्रचतुरश्रं च ऋजुतालमिहोच्यते ॥

चतुष्पादमिति ज्ञेयमधस्तस्य प्रमाणतः ।
तत्रैव त्रिविधाः प्रोक्ता उद्धाराः परिकीर्तिताः ॥

एवं तु बालसोपानं तस्य पृष्ठे समाचरेत् ।
प्रियदर्शनं स्निग्धवृत्तं हस्तिहस्तं च ऊर्ध्वतः ॥

धरागृहं तत्कर्तव्यं हस्तिमुण्डं समन्ततः ।
तस्यैव वेदिका ज्ञेया पुष्पखण्डमिहोच्यते ॥

तस्यैव जालकं ज्ञेयं हस्तिचक्षुः समन्ततः ।
अभितः करपिण्ड्यास्तु नासी द्वे तु समाचरेत् ॥

जालकास्तत्र कर्तव्याः स्वस्थानेषु पृथक् पृथक् ।
अधस्तादूर्ध्वतस्तस्य नास्य एकोनविंशतिः ॥

नासी कपोतशालास्तु वेदिका जालकं तथा ।

मृणालिकाश्च कर्तव्या अत ऊर्ध्वं समन्ततः ।
भूमिस्तु तत्र कर्तव्या एका वा बहुशोऽपि वा ॥

३.७.४०.४. —— —— —— दिशास्वस्तिक-

खि. ६. ५१-६३

दिशाश्रस्य* च संस्थानमलंकारश्च वक्ष्यते ।
दिशाश्रमूलकरणं चतुरश्रं प्रकीर्तितम् ॥

स्वभागेष्वष्टभागेषु मध्ये गर्भगृहं ततः ।
तस्य गर्भस्य संस्थानं वृत्तं तु परिकीर्तितम् ॥

अर्धं गर्भगृहस्यापि करपिण्डी समन्ततः ।
अर्धस्यार्धं तु कर्तव्यं जालपादं द्विपार्श्वयोः ॥

एतेनैव प्रमाणेन खण्डहर्म्याणि कारयेत् ।
अथ पृष्ठे च मूले च जालपादं प्रकीर्तितम् ॥

विस्तारस्तस्य विज्ञेयः गर्भार्धं तु प्रमाणतः ।
तत्र द्विपार्श्वजालं तु तावदेव प्रमाणतः ॥

सोपानं हर्म्यसोपानं विस्तारस्तावदेव तु ।
अत ऊर्ध्वं ततस्तस्य संस्थानानि पृथक् पृथक् ॥

अष्टाश्रं चतुरश्रं च ऋजुतालमिति स्मृतिः ।
प्रियदर्शनं पिण्डपादं स्निग्धं वृत्तं च ऊर्ध्वतः ॥

उत्तरास्त्रिविधास्तत्र समस्ताः परिकीर्तिताः ।
तस्य चैव तु कर्तव्यं वृत्तसोपानमेव च ॥

चतुर्विधाश्च कर्तव्या धराग्राश्च समन्ततः ।
वेदिका द्विविधा ज्ञेया जालकं त्रिविधं भवेत् ॥

शिरस्तस्य तु विज्ञेयं वृत्तं तु परिकीर्तितम् ।
तस्योपरि तु कर्तव्या नास्यश्चात्र चतुर्दश ॥

विस्तारस्तस्य कर्तव्यो गर्भार्धं तु प्रमाणतः ।
खण्डहर्म्यान्तरे तत्र सभां कोणेषु सर्वतः ॥

---

* अत्र दिशास्वस्तिकपर्यायतया दिशाश्रपदप्रयोगः ॥

अथवा तत्र कर्तव्या नास्य एकादश स्मृताः ।
- - - - - - - - - - - - - - - ॥

नास्यः कपोतशालाश्च स्वस्थाने संनिवेशयेत् ।
एका वा बहुशो वापि धरास्तस्य प्रकीर्तिताः ॥

३.७.४०.५ —— —— —— **नन्द्यावर्त·**

खि. ६. ६४-८२

शृणुध्वं पञ्चमस्यात्र नन्द्यावर्तस्य लक्षणम् ।
चतुरश्रं मूलकरणं नन्द्यावर्तस्य वक्ष्यते ॥

अष्टानामपि भागानामेको गर्भगृहस्य तु ।
तस्य गर्भस्य संस्थानं वृत्तं स्यात् परिकीर्तितम् ॥

अर्धं गर्भगृहस्यापि करपिण्डी समन्ततः ।
एतेनैव प्रमाणेन जालपादं भवेत् ततः ॥

चतुर्दिशं तु कर्तव्यं खण्डहर्म्यं ततस्तथा ।
विस्ताराद्गर्भविस्तारं भवेत् तस्य समन्ततः ॥

प्रमाणहर्म्याश्चत्वारः कर्तव्याः पार्श्वतस्ततः ।
तस्य पूर्वं च पृष्ठं च खण्डहर्म्यं महद्भवेत् ॥

विस्तारस्तस्य विज्ञेयो गर्भविस्तार एव च ।
विस्तारस्तस्य सोपानमेतस्यार्धप्रमाणतः ॥

धराः सोपानयोग्यास्तु अन्तरं तु प्रमाणतः ।
सोपानार्धं तु कर्तव्यं समन्तात् परिकीर्तितम् ॥

तत्र प्रमाणहर्म्यस्य निर्गमं तावदेव तु ।
तत्र शेषाश्च कर्तव्या खण्डहर्म्याश्च सर्वतः ॥

तस्य पूर्वं च पृष्ठं च खण्डहर्म्यं महद्भवेत् ।
सोपानं हर्म्यसोपानं द्वे द्वे तस्य समन्ततः ॥

अधस्तादूर्ध्वस्तस्य स्तम्भास्ते च पृथक् पृथक् ।
अष्टाश्रं चतुरश्रं वा पूर्वाश्चत्वार एव च ॥

उत्तरे तत्र कर्तव्यौ पार्श्वे खण्डोत्तरौ तथा ।
तत्र सोपानसंस्थानं हस्तिसोपानमुच्यते ॥

प्रियदर्शनं षोडशाश्रं शलाकापिण्डिरूर्ध्वतः ।
विचित्रमत्र खण्डं च हस्तितुण्डधरस्तथा ॥

वेदिका द्विविधा ज्ञेया जालकं त्रिविधं भवेत् ।
वृत्तं च तस्य कर्तव्यं शिरसश्च समन्ततः ॥

तत्र गर्भचतुर्भागं तेषु चैकप्रमाणतः ।
चतुर्दिशं तु कर्तव्या नास्यस्तस्योपरि स्मृताः ॥

करपिण्डी खण्डहर्म्यस्यान्तरे तु समन्ततः ।
गर्भविस्तारतः कुर्यादर्धाकारं चतुर्विधम् ॥

तत्र प्रदक्षिणं कुर्यात् तुण्डहर्म्याणि सर्वतः ।
कोणेषु तत्र कर्तव्याः सभा बाह्यान्तरेषु च ॥

जालपादास्तु कर्तव्याः स्वस्थानेषु समन्ततः ।
षट्पञ्चाशद्भवेन्नास्यः सर्वतः परिकीर्तिताः ॥

मृणाली मुष्टिबन्धश्च मल्लबन्धस्तथैव च ।
- - - - - - - - - - - - - - - - ॥

अधस्तादूर्ध्वतस्तस्य स्वे स्थाने संनिवेशयेत् ।
धरास्तस्य तु कर्तव्या एका वा बहुशोऽपि वा ॥

स. ७. २०-४

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

ज्ञा. ३३.६३

[अत्र समूर्तार्चनाधिकरणवत् ।]

अ. ६

[अत्र पूर्ववत् ।]

नि. ८

[अत्र पूर्ववत् ।]

३.७.४०.६. ——— ——— ——— श्रीवृत्त-

खि. ६. ८३-९३

श्रीवृत्तमूलकरणं मण्डलं तु प्रशस्यते ।
अष्टभागेषु मध्ये द्वौ कुर्याद्गर्भगृहं ततः ॥

तस्य गर्भगृहश्चापि संस्थानं वृत्तमेव च ।
करपिण्डी च कर्तव्या अर्धं गर्भगृहस्य तु ॥

हीनं तु गर्भविस्तारं खण्डहर्म्यं समन्ततः ।
चूडाहर्म्यस्य विस्तारो गर्भविस्तार एव च ॥

गर्भस्यैवाष्टभागे तु एकभागाधिकं भवेत् ।
आयामाच्चूडहर्म्याणि कोणाश्च परिकीर्तिताः ॥

सोपानं हर्म्यसोपानं शेषं तस्य समाचरेत् ।
अधस्तादूर्ध्वतस्तस्य स्तम्भाश्च परिकीर्तिताः ॥

एकान्तं हस्तिहस्तं च ऋजुतालमिति स्मृतम् ।
उद्धारास्त्रिविधाः प्रोक्ताः तस्यैव तु समन्ततः ॥

प्रियदर्शनं पिण्डपादं स्निग्धवृत्तं च ऊर्ध्वतः ।
सोपानं तत्र विज्ञेयं समखण्डमिति स्मृतम् ॥

विचित्रं मत्तखण्डं च हस्तितुण्डं कराग्रतः ।
जालकं हस्तिचक्षुश्च पुष्पखण्डं तु वेदिका ॥

शिरसश्चापि विज्ञेयं वृत्तं तस्य प्रशस्यते ।
कपोतं तस्य कर्तव्यं गर्भस्य परिवेष्टनम् ॥

अधः कोणेषु कर्तव्याश्चत्वारों मण्डलाकराः ।
- - - - - - - - - - - - - - - - - - ॥

अर्धाकाराश्चतुर्धाराः कपोतवृत्तैस्तथोत्तरे(?) ।

अष्टौ खरमुखाश्चात्र समन्तात् परिकीर्तिताः ॥

ज्ञा. ३३.६३

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४०.७ ——— ——— ——— पर्वताकृतिक-

खि. ६. ९४-१०४

सप्तमं पर्वताकाराः विभागस्तु प्रकीर्त्यते ।
पर्वताकृतिमूलं तु आयामं वृत्तमिष्यते ॥

अष्टानामपि भागानां मध्ये गर्भगृहं विदुः ।
तस्य गर्भगृहस्यापि संस्थानं वृत्तमेव च ॥

करपिण्ड्यास्तु विस्तारो हीनगर्भगृहं विदुः ।
विस्ताराच्चूडहर्म्यं तु करपिण्ड्यधिकं भवेत् ॥

प्रमाणं हर्म्यसोपानं शेषं तत्र समाचरेत् ।
अथ स्तम्भस्य संस्थानं शैलमष्टाश्रमेव च ॥

ज्ञेयं तु वृत्तसोपानं तस्यैव परिकीर्तितम् ।
धरास्तत्र तु कर्तव्याः त्रिविधाश्च भवन्ति ताः ॥

अत ऊर्ध्वं पिण्डिपादं-हस्तिहस्तमिति स्मृतम् ।
- - - - - - - - - - - - - - - - - -॥

चतुर्विधं तु कर्तव्यं धराग्रं तत्र सर्वतः ।
तत्रैव चायतं वृत्तं शिरसः परिकीर्तितम् ॥

चतुर्दिशं तु कर्तव्या नास्यस्तत्रोपरि स्थिताः ।
सोपानं हर्म्यशिरसस्तथा तत्र प्रकीर्तितम् ॥

अष्टधा तत्र कर्तव्याः स्वस्थानेषु समन्ततः ।
नासी मृणालिका चैव मुष्टिगण्डं तथैव च ॥

वेदिका जालकास्तत्र मल्लबन्धं पृथक् पृथक् ।
कपोतं सगलं चास्य पथेपारस्ततस्ततः ॥

अधस्तादूर्ध्वतस्तस्य स्वस्थाने संनिवेशयेत् ।
धरास्तस्य तु कर्तव्या एका वा बहुशोऽपि वा ॥

स. ७. १६,२१

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

ज्ञा. ३३.६३

[अत्र समूर्तार्चनाधिकरणवत् ।]

अ. ६

[अत्र पूर्ववत् ।]

नि. ८

[अत्र पूर्ववत् ।]

३.७.४०.८ ——— ——— ——— महापद्म-

खि. ६.१०५-१६

अष्टमं तत्र विज्ञेयं महापद्ममिहोच्यते ।
त्रयाणामपि भागानां मध्ये गर्भगृहं विदुः ॥

तत्र वा गर्भसंस्थानं समवृत्तं विशिष्यते ।
करपिण्डी च कर्तव्या अर्धं गर्भगृहस्य तु ॥

सोपानं चूडहर्म्यं च शेषांस्तत्र समाचरेत् ।
एकान्तं शैलचतुरश्रमृजुं तलमिहोच्यते(?) ॥

अथ स्तम्भस्य संस्थानमुत्तरं त्रिविधं भवेत् ।
समखण्डं च कर्तव्यं सोपानं तत्र कर्मतः ॥

स्निन्धेन कोणवृत्तं च हस्तिहस्तं च ऊर्ध्वतः ।
विचित्रमत्तखण्डं च धराग्रं परिकीर्तितम् ॥

वेदिका तत्र विज्ञेया [illegible] खण्डमिति स्मृता ।
जालका हस्तिचक्षुश्च शङ्खमण्डनमेव च ॥

तस्यैव शिरसो ज्ञेयमष्टांशं परिकीर्तितम् ।
तस्योपरि च कर्तव्या नास्यः षट् परिकीर्तिताः ॥

करपिण्ड्याश्च परितः नास्यो द्वादश कीर्तिताः ।
दक्षिणे पार्श्वतः कुर्यात् अर्धाकारं तु पूजितम् ॥

तस्य नास्यश्चतुर्विंशत्तत्रैव परिकीर्तिताः ।
नासी कपोतशालाः च वेदिका जालकं तथा ॥

स्वेषु स्थानेषु कर्तव्या अधस्तादूर्ध्वतस्ततः ।
जालरूपाश्च कर्तव्याः स्वस्थानेषु समन्ततः ॥

न कुर्याद्वास्तुबाह्ये च अप्पातं चास्य सर्वतः ।
- - - - - - - - - - - - - - - - - - -॥

भूमिरेतस्य कर्तव्या एका वा बहुशोऽपि वा ।
देवतानां तु सर्वेषां पूजितं तदशेषतः ॥

स. ७.१६,२४,३१

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

ज्ञा. ३३.६३

[अत्र समूर्तार्चनाधिकरणवत् ।]

नि. ८

[अत्र पूर्ववत् ।]

३.७.४१.० —— —— मानुषयोग्यविमान - चतुर्विंशतिविध-नन्दीविशालादि-

खि. ६.५-१०

नन्दीविशालं विज्ञेयं स्वस्तिकं च ततः परम् ।
पूर्वरङ्गविशालं च एकपादं तथैव च ॥

विमानं गणिकाशालं कुबेरच्छन्दमेव च ।
वापीप्रसादकं चैव ततः प्रकृतिरुच्यते ॥

तोयं विमानं विज्ञेयमुत्पलाकारमेव च ।
सिंहच्छन्दविमानं च सोमच्छन्दमतः परम् ॥

मेनाकारं तु विज्ञेयं शालीकरणमेव च ।
कर्णिकाकारमेवात्र श्रियोऽलंकारमेव च ॥

कुम्भाकारं ततश्चापि गोधामुखमतः परम् ।
पिच्छावतंसकं चैव चतुःस्फुटमिति स्मृतम् ॥

हस्तिपृष्ठविमानं च नागच्छन्दमतः परम् ।
देवानुद्दिश्य वर्णानां विमानान्युदितानि वै ॥

[वृषभच्छन्दकं चैव कूटाकारमतः परम्★ ।] ।

ज्ञा. ३३.६३

मानुष ब्रह्मवृत्त-स्वस्तिक-वापीप्रसाद-अर्धचन्द्र-शालीकरण - पूर्वरङ्ग - बहुचित्र - गोमुख - पर्वताकृति - महापद्म - नन्दीविशाल - अष्टाङ्ग-

---

★ एतत् श्लोकार्धमग्रिमग्रन्थानुरोधेनात्रापेक्षितमास्ते ।

सोमच्छन्द - चतुःस्फुट - श्रीवृत्त - नन्द्यावर्त - श्रीप्रतिष्ठितक-सर्वतोभद्राः अष्टादश विमानानि देवदेवस्य विष्णोः । तेष्वष्टावाद्या ब्राह्मणानां चत्वारः क्षत्रियाणां शेषा विट्छूद्रयोः ।

३.७.४१.१ ——— ——— ——— नन्दीविशाल-

खि. ६. ११७-२४

नन्दीविशालं नवमं तच्छृणुध्वं समाहिताः ।
नन्दीविशालमूलं तु चतुरश्रायतं भवेत् ॥

द्वौ भागावष्टभागेषु मध्ये गर्भगृहं ततः ।
संस्थानं तत्र कर्तव्यमायतं वृत्तमिष्यते ॥

तस्य गर्भस्य विस्तारं जालपादं समन्ततः ।
तस्य गर्भस्य विस्तारात् पश्चिमागारमुच्यते ॥

एतस्य चाष्टभागेन दक्षिणागारमुच्यते ।
तस्यैव चाष्टभागेन मुखबन्धं च इष्यते ॥

एतत्तु चाष्टभागोनं वेश्म प्राक् परिकीर्तितम् ।
समं प्रदक्षिणं कुर्याच्चतुर्थैं च समन्ततः ॥

बाह्यं चाभ्यन्तरं चैव सोपानं तस्य संचरेत् ।
तस्यैव चोत्तरं वेश्म वृत्तं संपरिकीर्तितम् ॥

अधस्तस्य धराः प्रोक्ता एकां द्वे वा समाचरेत् ।
- - - - - - - - - - - - - - - - - ॥

द्विजानां क्षत्रियाणां च विट्छूद्राणां च सर्वशः ।
नन्दीविशालं विज्ञेयं पूजितं तु विशेषतः ॥

स. ७. १९-२५

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

ज्ञा. ३३.६३

[अत्र समूर्तार्चनाधिकरणवत् ।]

३.७.४१.२ ——— ——— ——— स्वस्तिक-

खि. ६. १२५-३०

दशमं स्वस्तिकं प्रोक्तं तस्य लक्षणमुच्यते ।
स्वस्तिके मूलका(क?)रणं चतुरश्रायतं भवेत् ॥

अष्टानामपि भागानां मध्ये गर्भगृहं विदुः ।
अर्धं गर्भगृहस्यापि करपिण्डी समन्ततः ॥

अर्धहर्म्यस्य विस्तारो गर्भस्य द्विगुणो भवेत् ।
कूटाकारमपि द्वौ तु आयामात् परिकीर्तितौ ॥

गर्भस्य द्विगुणौ ज्ञेयौ विस्तारात् तावदेव तु(?) ।
तस्यैव भुक्तिलेखास्तु(?) एको द्वौ वा त्रयस्तथा ॥

पश्चिमागारविस्तारो गर्भादध्यर्धमिष्यते ।
भूमिः पादस्य कर्तव्या एका वा बहुशोऽपि वा ॥

स्वस्तिकं तु तथा ज्ञेयं विभागात् परिकीर्तितम् ।
एतदुक्तं भवेत् तत्र विशालं शूद्रपूजितम् ॥

नि. ९

स. ७.१७,२३,३३

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

ज्ञा. ३३.६३

[अत्र समूर्तार्चनाधिकरणवत् ।]

३.७.४१.३ —— —— —— पूर्वरङ्गविशाल-

खि. ६. १३१-५

एकादशं प्रवक्ष्यामि पूर्वरङ्गं विशालतः ।
पूर्वरङ्गविशालं च चतुरश्रं भवेत् ततः ॥

अष्टभागेषु मध्ये तु कुर्याद्गर्भगृहं ततः ।
तस्य गर्भगृहस्यार्धं करपिण्डी समन्ततः ॥

शेषाश्च तत्र कर्तव्याः सभाष्टौ द्विः समन्ततः(?) ।
अष्टाश्रं तत्र कर्तव्यं शिरसः परिकीर्तितम् ॥

अधस्तादूर्ध्वतस्तस्य अष्टसोपानमिष्यते ।
तत्र द्विसप्ततिं कुर्यान्नासीः क्षुद्राश्च सर्वशः ॥

धरा:सप्त तु कर्तव्या एका वा बहुशोऽपि वा ।
द्विजानां क्षत्रियाणां च पूजनीयं विशेषतः ॥

ज्ञा. ३३.६३

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४१.४ —— —— —— एकपाद-

खि. ६. १३६-४१

द्वादशं तत्र वक्ष्यामि एकपादं तु सर्वतः ।
त्रयाणामपि भागानां मध्ये गर्भगृहं विदुः ॥

तस्य गर्भगृहस्यार्धं करपिण्डी समन्ततः ।
खण्डहर्म्याच्च आकाराः(?) शेषास्तत्र समाचरेत् ॥

तस्यैव शिरसो ज्ञेयं मण्डपं तु प्रशस्यते ।
तस्य षोडश नास्यस्तु सर्वत्र परिकीर्तयेत् ॥

तस्यैव वेष्टसोपानं हस्तमेकं तु तस्य वै ।
अधस्तात् तस्य विस्तारो द्वादशाङ्गुलमिष्यते ॥

अधस्तत्र धराः प्रोक्ता एका वा द्वे समाचरेत् ।
- - - - - - - - - - - - - - - - - -॥

एकपादमिति प्रोक्तं विभागात् परिकीर्तितम् ।
द्विजानां क्षत्रियाणां च पूजनीयं विशेषतः ॥

नि. ८

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४१.५ —— —— —— गणिकाशाल-

खि. ६.१४२-९

त्रयोदशं तच्छृणुध्वं गणिकाशाललक्षणम् ।
गणिकाशालमूलं तु चतुरश्रायतं भवेत् ॥

अष्टानामपि भागानां मध्ये गर्भगृहं ततः ।
तस्य गर्भगृहस्यार्धं करपिण्डी समन्ततः ॥

अपि वा आयतं तत्र गर्भस्य द्विगुणं भवेत् ।
कर्तव्यं तस्य विस्तारं खण्डहर्म्यं समन्ततः ॥

सोपानमुखशालां च चूडाहर्म्याणि सर्वशः ।
एतानि तत्र कर्तव्यं शेषस्थानेषु सर्वतः ॥

तस्य गर्भस्य शिरसः शालास्तत्र प्रकीर्तिताः ।
तस्यैव मुखनासी च गर्भं च परिकीर्तितम् ॥

करपिण्डीमुखनासीनां प्रमाणं परिकीर्तितम् ।
गर्भस्य तु चतुर्भागं त्रिभागं तत्र चेष्यते ॥

हारं च मुखपट्टीं च स्वे स्थाने संनिवेशयेत् ।
एका वा बहुशो वापि धरास्तत्र प्रकीर्तिताः ॥

एतेनैव विभागेन कर्तव्यं प्रयतेन वै ।
एतच्चतुर्णां वर्णानां पूजनीयं विशेषतः ॥

नि. ८

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४१.६ ——— ——— ——— कुबेरच्छन्द-

खि. ६.१५०-५

चतुर्दशं भवेत् तत्र कुबेरच्छन्दसंज्ञितम् ।
कुबेरच्छन्दमूलं तु अधस्तादायतं भवेत् ॥

त्रयाणामपि भागानां मध्ये गर्भगृहं विदुः ।
अर्धं गर्भगृहस्यापि करपिण्डी समन्ततः ॥

चूलीहर्म्यं च हारं च शेषं तत्र समाचरेत् ।
अभ्यन्तरं वा सोपानमधस्ताद्विनिवेशयेत् ॥

ततस्तस्यैव शिरसः शालकाद्याः प्रकीर्तिताः ।
कोणाश्च तत्र कर्तव्याः समास्तत्र समन्ततः ।

तस्य नास्यश्चतुर्विंशत् ज्ञातव्यास्तु पृथक् पृथक् ।
- - - - - - - - - - - - - - - - - - - -

धरास्तस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
द्विजानां क्षत्रियाणां च पूजनीयं विशेषतः ॥

नि. ८

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४१.७ ——— ——— ——— वापीप्रसादक-

खि. ६. १५६-६१

पञ्चदशं भवेत् तत्र वापी* नाम ततः परम् ।
वापीप्रासादमूलं तु मण्डलं वै समन्ततः ॥

त्रयाणामपि भागानां मध्ये गर्भगृहं भवेत् ।
तस्य गर्भगृहस्यार्धं करपिण्डी समन्ततः ॥

सोपानं खण्डहर्म्यं च शेषांस्तत्र समाचरेत् ।
शिरसस्तत्र कर्तव्यं कर्म वः परिकीर्तितम् ॥

तत्रैव मुखपट्टीस्तु अष्टौ कुर्यात् समन्ततः ।
अल्पपट्टीस्तु कर्तव्याः कीर्तितास्तत्र षोडश ॥

ततस्तस्य तु कार्याणि सोपानानि चतुर्दिशम् ।
चतुर्दिशं तु कर्तव्यं चार्धाकारं विशेषतः ॥

भूमिरेतस्य कर्तव्या एका वा बहुशोऽपि वा ।
द्विजानां क्षत्रियाणां च पूजितं तद्विशेषतः ॥

---

* वापीप्रसादकपर्यायतया वापीपदप्रयोगः ।

३.७.४१.८ —— —— —— प्रकृति-

खि. ६. १६२-७
षोडशः प्रकृतिस्तत्र तच्छृणुध्वं समाहिताः ।
प्रकृतेर्मूलकरणं चतुरश्रायतं भवेत् ॥

द्वौ भागावष्टभागेषु मध्ये गर्भगृहं विदुः ।
खण्डहर्म्यस्य विस्तारः गर्भार्धं तु प्रमाणतः ॥

खण्डहर्म्यस्य गर्भस्य अन्तरं तु समन्ततः ।
सोपानं हर्म्यसोपानं तत्र शेषं समाचरेत् ॥

शिरसश्च भवेत् तस्य शालाः पञ्च प्रकीर्तिताः ।
तस्य मध्ये तु नासी स्याद्गर्भार्धं तु प्रमाणतः ॥

तस्य नास्यश्चतुर्विंशत् कुर्यात् तत्र पृथक् पृथक् ।
- - - - - - - - - - - - - - - - - ॥

भूमिरेतस्य कर्तव्या एका वा बहुशोऽपि वा ।
क्षत्रियस्य द्विजस्यापि पूजितं तद्विशेषतः ॥

३.७.४१.९ —— —— —— तोय-

खि. ६. १६८-७४
तोयं विमानं विज्ञेयं सप्तदशमिहोच्यते ।
तोयविमानमूलं तु मण्डलं वै समन्ततः ॥

द्वौ भागावष्टभागेषु मध्ये गर्भगृहं विदुः ।
अर्धं गर्भगृहस्यापि करपिण्डी समन्ततः ॥

तस्य बाह्ये तु कर्तव्यं जालपादं समन्ततः ।
सोपानं हर्म्यसोपानं तत्र शेषं समाचरेत् ॥

शिरसस्तस्य विज्ञेयं मण्डलं तु प्रशस्यते ।
तत्रैव कर्णनास्यौ द्वे पताकासदृशे ततः ॥

अन्तरेषु च कर्तव्याः क्षुद्रनास्यः समन्ततः।
पार्श्वयोः करपिण्डी च नास्यौ द्वौ तु समुन्नते ।

अष्टौ तथाल्पनास्यस्तु अधस्तादूर्ध्वतस्ततः ।
हाराः कपोतशालाश्च नास्यौ तस्योपरि स्थिते ॥

धरास्तस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
प्रशस्ताः क्षत्रियाणां च भवबन्धविशेषतः॥

३.७.४१.१० ——— ——— ——— उत्पलाकार-

खि. ६. १७५-८१

ज्ञेयमुत्पलपत्रं✻ तु अष्टादशमतः परम् ।
उत्पलपत्रमूलं तु चतुरश्रं भवेत् ततः ॥

अत ऊर्ध्वं तु वृत्तं स्यात् सर्वतः परिकीर्तितम् ।
अष्टानामपि भागानां मध्ये गर्भगृहं विदुः ॥

अस्य गर्भगृहस्यार्धं करपिण्डी समन्ततः ।
तस्य बाह्ये तु कर्तव्यं जालपातं(दं ?) समन्ततः ॥

अर्धहारं च हर्म्यं च सभा गर्भसमं भवेत् ।
शैलान्तरेषु कर्तव्या हारास्तत्र समन्ततः ॥

सोपानहर्म्ये द्वे स्यातां सोपानं तत्समं भवेत् ।
शिरसस्तस्य कर्तव्यं मण्डलं तु प्रशस्यते ॥

✻ उत्पलाकारपर्यायतया उत्पलपत्रपदप्रयोगः ।

कर्तव्या विंशतिर्नास्यः अधस्तादूर्ध्वतस्ततः ।
भूमिस्तु तत्र कर्तव्या एका वा बहुशोऽपि वा ॥

एवमुत्पलपत्रं तद्विभागाः परिकीर्तिताः ।
उत्पलं तु द्विजातीनां पूजितं तद्विशेषतः ॥

स. ७.३०

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४१.११ —— —— —— सिंहच्छन्द-

खि. ६. १८२-९

एकोनविंशतिकं चैव सिंहच्छन्दमिति स्मृतम् ।
सिंहच्छन्दस्य मूलं तु अन्तराश्रं(?) भवेत्ततः ॥

तस्योपरि च कर्तव्यं चतुरश्रायतं भवेत् ।
अष्टभागस्य मध्ये द्वौ कुर्याद्गर्भगृहं ततः ॥

अथ गर्भगृहस्यापि करपिण्डी तु पार्श्वतः ।
करपिण्ड्यास्तु विस्तारो गर्भविस्तार एव च ॥

पश्चिमाज्जालपातं(दं?)तु अर्धं गर्भगृहस्य च ।
तस्य हर्म्यं भवेद्देवा सोपानं च समाचरेत् ॥

शिरसस्तस्य विज्ञेयाः सभास्तत्र प्रकीर्तिताः ।
निर्गमं तत्र तावत् स्यात् समन्ताच्च विभूषितम् ॥

द्वौ कर्णौ तत्र कर्तव्यौ सभास्तत्र विशेषतः ।
त्रयाणामपि भागानां मध्ये गर्भगृहं विदुः ॥

उपाङ्गा द्वादश ज्ञेया -- तत्र प्रकीर्तिताः ।
एका वा बहुशो वापि धरास्तत्र प्रकीर्तिताः ॥

एवमुक्तप्रकारेण कर्तव्यं तद्विशेषतः ।
उत्तमं तु द्विजातीनां पूजनीयं विशेषतः ॥

नि. ८

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४१.१२ ——— ——— ——— सोमच्छन्द-

खि. ६. १९०-४

सोमच्छन्दस्य मूलं तु चतुरश्रं भवेत् ततः ।
अर्धं गर्भगृहस्यापि करपिण्डी समन्ततः ॥

खण्डहर्म्यस्य सोपानं शेषं तत्र समाचरेत् ।
शिरसस्तस्य विज्ञेयं मण्डलं तु प्रशस्यते ॥

तस्य मध्ये तु नासी स्याद्गर्भार्धं तु प्रमाणतः ।
निर्गमं तत्र तावत् स्यात् कर्तव्यं सर्वतः समम् ॥

तदर्धं कर्णनास्यौ द्वे विस्तारात् परिकीर्तिते ।
नास्यौ द्वे पूर्वतस्ते च पूर्वोक्तेन प्रमाणतः ॥

भूमिरेतस्य विज्ञेया एका वा बहुशोऽपि वा ।
देवतानां द्विजातीनां राज्ञां चैव सुपूजितम् ॥

स. ७.१८,३२

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।

ज्ञा. ३३.६३

[अत्र समूर्तार्चनाधिकरणवत् ।]

अ. ६.२

[अत्र पूर्ववत् ।]

नि. ८

[अत्र सोमच्छन्द इत्यस्य स्थाने चन्द्रच्छन्द इति नाममात्रनिर्देश इति विशेषः ।]

३.७.४१.१३ —— —— —— मेनाकार-

खि. ६. १९५-२००

एकविंशतिकं चैव मेनाकारं पृथक् स्मृतम् ।
मेनाकारस्य मूलं तु चतुरश्रायतं भवेत् ॥

विस्ताराद्द्विगुणस्तस्य त्वायामः परिकीर्तितः ।
त्रयाणामपि भागानां मध्ये गर्भगृहं विदुः ॥

तस्य गर्भगृहस्यार्धं करपिण्डी समन्ततः ।
समानं हर्म्यसोपानं शेषं पार्श्वं समाचरेत् ॥

मूले द्वे खण्डहर्म्ये तु पिण्ड्यश्चार्धप्रमाणतः ।
तेन चैव प्रमाणेन निर्गमं तत्समं चरेत् ॥

पिण्ड्या अर्धं तु कर्तव्या नासी पूर्वोक्तमानतः ।
- - - - - - - - - - - - - - - - - - ॥

धरास्तस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
क्षत्रियस्य द्विजस्यापि पूजनीयं विशेषतः ॥

३.७.४१.१४ —— —— —— शालीकरण-

खि. ६. २०१-५

द्वाविंशतिकं तु विज्ञेयं शालीकरणमन्दिरम् ।
शालीकरणमूलं तु चतुरश्रं सुपूजितम् ॥

द्वौ भागावष्टभागेषु मध्ये गर्भगृहं भवेत् ।
गर्भस्यार्धं तु विज्ञेया करपिण्डी समन्ततः ॥

एकदण्डप्रमाणेन पूर्वदण्डप्रमाणतः ।
सोपानं जालपादं च खण्डहर्म्याणि कारयेत् ॥

शिरसस्तस्य विज्ञेयाः सभास्तत्र प्रकीर्तिताः ।
- - - - - - - - - - - - - - - - - - ॥

एका वा बहुशो वापि धरास्तत्र प्रकीर्तिताः ।
उत्तमं तद् द्विजातीनां पूजितं तद्विशेषतः ॥

ज्ञा. ३३.६३

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४१.१५ ——— ——— ——— कर्णिकाकार-

खि. ६. २०६-९

त्रयोविंशतिकं चात्र कर्णिकाकारमुच्यते ।
कर्णिकाकारमूलं तु चतुरश्रं भवेत् ततः ॥

त्रयाणामपि भागानां मध्ये गर्भगृहं विदुः ।
ज्ञेयानि तत्र चत्वारि सोपानानि समन्ततः ॥

एकं तु बन्धनं कुर्यात् तस्यैव तु मुखे ततः ।
- - - - - - - - - - - - - - - - - -॥

भूमिरस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
द्विजानां क्षत्रियाणां च विशेषात् पूजितं भवेत् ॥

३.७.४१.१६ ——— ——— ——— श्रियोऽलंकार-

खि. ६. २१०-४

चतुर्विंशतिकं तत्र श्रियोऽलंकारमुच्यते ।
श्रियोऽलंकारमूलं तु चन्द्राकृतिरिति स्मृतम् ॥

अष्टभागेषु मध्ये तु एकं गर्भगृहं विदुः ।
अर्धं गर्भगृहस्यापि करपिण्डीं समाचरेत् ॥

तत्रैव कम्पदेशस्तु गर्भस्य द्विगुणो भवेत् ।
सोपानं खण्डहर्म्यं च शेषं तत्र समाचरेत् ॥

सभास्तस्य तु विज्ञेयाः शिरसः परिकीर्तिताः ।
चतस्रो बन्धनशाला अर्धागारं तथैव च ॥

धरास्तस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
द्विजानां क्षत्रियाणां च विशेषात् पूजितं भवेत् ॥

३.७.४१.१७ ——— ——— ——— कुम्भाकार-

खि. ६. २१५-२०

पञ्चविंशतिकं तत्र कुम्भाकारमिहोच्यते ।
करपिण्ड्यास्तु विस्तारं तत्समं तु समाचरेत् ॥

अभ्यन्तरं तु कर्तव्यं सोपानं तस्य सर्वतः ।
तत्र सर्वस्य शिरसो वृत्तं तु परिकीर्तितम् ॥

चतुर्दिशं तु कर्तव्या नास्यस्तस्य स्वलंकृताः ।
ज्ञेयस्तु नासीविस्तारो गर्भविस्तारभागशः ॥

चतुर्भागस्य भागं तु सर्वतः परिमाणतः ।
निर्गमं तावदेव स्यात् समानं वा विधीयते ॥

संस्थानं तस्य विज्ञेयं पूर्णकुम्भाकृतिस्ततः ।
- - - - - - - - - - - - - - -॥

धरास्तस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
चातुर्वर्ण्यस्य सामान्यमेतत् तु परिकीर्तितम् ॥

स. ७.३३

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४१.१८ —— —— —— गोधामुख-

खि. ६. २२१-६

षड्विंशकं तु विज्ञेयं गोधामुखनिकेतनम् ।
गोधामुखस्य मूलं तु चतुरश्रायतं भवेत् ॥

त्रयाणामपि भागानां मध्ये गर्भगृहं विदुः ।
तस्य गर्भगृहस्यार्धं करपिण्डी तु पार्श्वतः ॥

सोपानं हर्म्यसोपानं शेषं तत्र समाचरेत् ।
तस्य पृष्ठस्य शाला च गर्भस्य द्विगुणं भवेत् ॥

आयामार्धं तु विस्तारः तस्यैव परिकीर्तितः ।
गर्भशालान्तरं तत्र अर्धागारं सुपूजितम् ॥

शिरसस्तु भवेच्छाला सर्वतः परिकीर्तिता ।
तस्य मध्ये तु नासी स्याद्गर्भार्धं तु प्रमीयते ॥

धरास्तस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
एतद् द्विजानां विज्ञेयं सर्वतस्तु सुपूजितम् ॥

३.७.४१.१९ —— —— —— पिच्छावतंसक-

खि. ६. २२७-३२

पिच्छावतंसकं गेहं सप्तविंशतिकं भवेत् ।
पिच्छावतंसमूलं तु चतुरश्रं भवेत् ततः ॥

द्वौ भागावष्टभागे तु मध्ये गर्भगृहं विदुः ।
तस्य गर्भगृहस्यार्धं करपिण्डी समन्ततः ॥

तस्य गर्भस्य विस्तारं जालपादं समन्ततः ।
खण्डहर्म्यस्य विस्तारं तत्र शेषं समाचरेत् ॥

चतुर्भागं तु कर्तव्यं सोपानं वै विशेषतः ।
खण्डहर्म्यान्तरे तत्र सभाः कोणेषु योजयेत् ॥

तस्यैव चान्तरे ज्ञेयाः हाराः सर्वत्र शोभनाः ।
अष्टौ खरमुखाः पट्टीः कुर्यात् तत्र पृथक् पृथक् ॥

एका वा बहुशो वापि धरास्तत्र प्रकीर्तिताः ।
उत्तरत्र द्विजातीनां पूजितं तद्विशेषतः ॥

३.७.४१.२० —— —— —— चतुःस्फुट-

खि. ६. २३३-५

अष्टाविंशतिकं तत्र चतुःस्फुटमिति स्मृतम् ।
चतुरश्रं मूलकरणं चतुःस्फुटमि[illegible]े ॥

अष्टानामपि भागानां मध्ये गर्भगृ[illegible]ः ।
अर्धं गर्भगृहस्यापि करपिण्डी सम[illegible] ॥

करपिण्ड्यास्तु विस्तारः - - - - -।

स. ७.१८

[अत्र चतुःस्फुट इत्यस्य स्थाने चतुष्पुट इति नाममात्रनिर्देश इति विशेषः ।]

ज्ञा. ३३.६३

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

अ. ६

[अत्र काश्यपज्ञानकाण्डवत् ।]

नि. ८

[अत्र पूर्ववत् ।]

३.७.४१.२१ —— —— —— हस्तिपृष्ठ-

खि. ६. २३८-४२

*हस्त्याकारविमानं तु एकोनविंशतिकं भवेत् ।
हस्त्याकारविमानं तु चतुरश्रं समन्ततः ॥

अष्टभागेषु मध्ये द्वौ कुर्याद्गर्भगृहं ततः ।
ऊनं तु गर्भविस्तारात् करपिण्डी तु पार्श्वतः ॥

सोपानं जालपादं च शेषं तत्र समाचरेत् ।
विस्ताराद्गर्भविस्तारां शालां च पुरतस्ततः ॥

गर्भपृष्टं च विज्ञेयं वृत्तं तस्य समाचरेत् ।
शिरसस्तस्य विज्ञेयाः सभास्तत्र समन्ततः ॥

---

* हस्तिपृष्ठपर्यायतया हस्त्याकारपदप्रयोगः

धरास्तस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
नेतरत्र द्विजातीनां पूजितं तु विशेषतः ॥

३.७.४१.२२ —— —— —— नागच्छन्द-

खि. ६. २४३-७

त्रिंशकं तु भवेत् तत्र नागच्छन्दमतः परम् ।
नागच्छन्दस्य मूलं तु चतुरश्रं भवेत्ततः ॥

तदर्धं गर्भविस्तारं मध्ये कुर्यात् समन्ततः ।
गर्भस्य तु चतुर्भागं तेषु चैकेन योजयेत् ॥

विस्तारात् करपिण्डी स्याद्विशेषेण विधीयते ।
शेषास्तत्र तु कर्तव्या जालपादः प्रमाणतः ॥

प्रमाणं हर्म्यशिरसो विज्ञेयं चापि तत्त्वतः ।
- - - - - - - - - - - - - - - - - ---॥

धरास्तस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
देवतानां द्विजातीनां क्षत्रियाणां च पूजितम् ॥

३.७.४१.२३ —— —— —— वृषभच्छन्द-

खि. ६. २४८-५२

एकत्रिंशकमप्याहुः वृषभच्छन्दमुत्तमम् ।
वृषभच्छन्दमूलं तु चतुरश्रायतं भवेत् ॥

त्रयाणामपि भागानां मध्ये गर्भगृहं विदुः ।
अर्धं गर्भगृहस्यापि करपिण्डी समन्ततः ॥

गर्भस्य युक्त्या कुर्याद्वै बन्धशाला महागुणाः ।
प्रमाणं तस्य विज्ञेयं गर्भमात्रं प्रशस्यते ॥

विज्ञेयौ समहर्म्यौ द्वौ सोपानं तस्य पार्श्वयोः ।
शिरसस्तस्य विज्ञेयं मण्डनं परिकीर्तितम् ॥

धरास्तस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
उत्तरत्र द्विजातीनां पूजितं तु विशेषतः ॥

स. ७.२७

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

नि. ८

[अत्र समूर्तार्चनाधिकरणवत् ।]

३.७.४१.२४ —— —— —— कूटाकार-

खि. ६. २५३-६

द्वात्रिंशकं तु विज्ञेयं कूटाकारमिति स्मृतम् ।
कूटाकरस्य मूलं तु चतुरश्रायतं भवेत् ॥

त्रयाणामपि भागानां मध्ये गर्भगृहं विदुः ।
अस्य गर्भगृहस्यार्धं करपिण्डी समन्ततः ॥

सोपानं खण्डहर्म्यं च शेषेषु विहिते स्मृते ।
शिरसस्तस्य विज्ञेयाः समाः कूटसमन्विताः ॥

भूमिरस्य तु विज्ञेया एका वा बहुशोऽपि वा ।
उत्तरत्र द्विजातीनां पूजितं तद्विशेषतः ॥

स. ७. ३३

[अत्र विमानस्य नाममात्रनिर्देश इति विशेषः ।]

३.७.४२. ——— ——— ——— **अष्टाङ्गविमान-**

नि. ९

- - - - मष्टाङ्गालयविन्यासं तदनुक्रमात् ।
अधिष्ठानप्रभृत्योर्ध्वादाग्रीवाच्चतुरश्रकम् ॥

- -- (चतुः?)षष्टिपदे मध्ये गर्भगृहं चतुष्पदम् ।
पदैकोनावृतं तस्यात्(?) गृहपिण्डालिन्द्रमुच्यते ॥

आदित्यपादमेतद्वै तद्बाह्ये तु समन्ततः ।
तत्त्वांशेन वृतं चैव बाह्यालिन्द्रमथेष्यते ॥

पादन्यासं द्वयं चैव तत्तद्बाह्ये विशेषतः ।
पूर्वोक्तेन पदैकेन चाष्टाविंशतिकं तथा ॥

ब्रह्मद्वारमलीन्द्रं स्यात् पार्श्वयोर्मुखपृष्ठतः ।
शालायामं त्रिधा प्रोक्तं श्रेष्ठं मध्यं कनीयसम् ॥

गर्भगेहस्य विस्तारात् पादाधिकमथेष्यते ।
तत्पादार्धं च-वापि तदर्धं विस्तृतं भवेत् ॥

तस्यार्धं कर्णकूटं स्यात् शिरस्कं चतुरश्रकम् ।
अयनं वाधमं वापि शिरस्कं कूटकोष्ठयोः ॥

ब्रह्मद्वारानतं चैव प्रमाणं-महोन्नतम् ।
गर्भागारस्य वस्वंशो एकान्यूनं समन्ततः ॥

आरोहं कर्णशालां च तत्समं तु भवेत् ततः ।
कर्णपञ्जरशालासु मुखे पृष्ठे च पार्श्वयोः ॥

जालाकं तत्र कल्प्यैव नासां तत्र समन्वितम् ।
जालाकं तत्र हीने तु तोरणं तत्र योजयेत् ॥

नास्यर्धतोरणार्धं च महानास्यर्धमेव च ।
यत्रैव चैष - - -स्यात् तत्र तत्रैव भद्रयेत् ॥

महान्ता(?) नासिकानां च शूलं चोपरि विन्यसेत् ।
तस्यैव तु शिरःस्थाने अष्टाश्रं वृत्तमेव च ॥

लुपाच्छा-धनं वापि देव-न्याभरेव च ।
एवमष्टाङ्गविन्यासम् एकं वा बहुशोऽपि वा ॥

नतोनत्तुङ्ग(?) संयुक्तमारोहणसमन्वितम् ।
यथावनिसृगो(?) पेतं सुवृत्तं ग्रीवसंयुतम् ॥

- भूपारहिता वाथ गृहवीथ्यादिरञ्चितम् ।
अष्टाभिरेतैरहि स्त(त?)मष्टाङ्गमिति कथ्यते ॥

३.७.४३ ——— ——— विमान-ब्रह्मनिर्मित-पद्माकारादि-

स. ७.२१-२

पद्माकारं चित्रशिल्पं पर्वताकृतिकं तथा ॥

चतुर्मुखविमानं च ब्रह्मवृत्तं तथैव च ।
प्रनलीनविमानं च गरुडाकारमेव च ॥

ऊर्जालपत्रकं चाष्टौ ब्रह्मणा निर्मितानि वै ।

३.७.४४ ——— ——— ——— विष्णुनिर्मित-स्वस्तिकादि-

स. ७. २३-५

विमानं स्वस्तिकं चापि श्रीप्रतिष्ठितकं तथा ॥

श्रीस्वस्तिकविमानं च नन्द्यावर्तं तथैव च ।
श्रियावृत्तं महापद्मं तथा गान्धारपञ्चकम् ॥

तथैवोत्पलफुल्लं च विष्णुना निर्मितानि वै ।

३.७.४५ ——— ——— ——— रुद्रनिर्मित-नन्दीविशालादि-

स. ७.२५-८

नन्दीविशालमष्टाङ्गं वृषभाकारमेव च ॥

चतुष्पुटं तथा भद्रं वृत्तमस्तकसन्धिकम् ।
अङ्गनाकारमप्येवं पञ्जरामुखमेव च ॥

वृत्तसौभद्रकं चैव सर्वतोभद्रकं तथा ।
विमानं वृषभच्छन्दमुरगच्छन्दमेव च ॥

कोण्ड्यावृत्तविमानं च भूतवैहारमेव च ।
रुद्रेण निर्मितान्येतद्विमानानि तपोधनाः ॥

३.७.४६ ——— ——— ——— इन्द्रनिर्मित-अप्सरोमण्डपादि-

स. ७. २९-३१

अप्सरोमण्डपं शुद्धं द्विव्यं पञ्चवसन्तकम् ।
माहेन्द्रं स्वस्तिवृत्तं च मायाबहुविकारकम् ॥

उत्पलं पङ्कलग्नं च श्रीस्वस्तिकनिवेशनम् ।
वापी ब्रह्मसभा चैव तथैवोत्पलपत्रकम् ॥

महापद्मं महाच्छन्दं देववृत्तं तथैव च ।
इन्द्रेणैतद्विमानानि निर्मितानि सुखार्थिना ॥

३.७.४७ ——— ——— ——— शशिनिर्मित-सोमच्छन्दादि-

स. ७. ३२-४

सोमच्छन्दं सोमवृत्तं बहुपत्रं सुपौष्टिकम् ।
श्रीवत्साकृतिकं घोणं छन्दवृत्तं च वेदिकम् ॥

सिद्धयोगं चतुर्वक्रं कूटाकारं विलोकनम् ।
कुम्भाकारं च गान्धारं तिलकं स्वस्तिकं तथा ॥

शशिवृत्तं विशालं च तथा बालेन्दुकं पुनः ।
एतान्यपि विमानानि शशिना निर्मितानि वै ॥

३.७.४८ ——— ——— ——— सनकादिनिर्मित-वेदिकादि-

स. ७. ३५-४०

वेदिकं वेदिवृत्तं च सोमघोणं चतुर्मुखम् ।
उपाहिकं कीचकं यानमग्निच्छन्दोरगं तथा ॥

हस्तिपृष्ठं च नौवृत्तं प्रमदालम्बकं त्रिवृत् ।
ऋषभं मयूरवृत्तं त्रिकूटं शिल्पवृत्तकम् ॥

गोधाङ्गं मण्डुकं चापि परिभ्रामणमस्तकम् ।
पाशिकं पङ्कलग्नं न तथैव गगनेचरम् ॥

शाहिकं रसवृत्तं च निबृंहं परिबृंहितम् ।
गान्धर्वं गगनं चैव हरिच्छन्दमनन्तकम् ॥

वैनतेयं विमानं च भूताकारमिलावृतम् ।
एतानि सनकाद्यैस्तु मुनिभिर्निर्मितानि च ॥

षण्णवतिविमानानि कीर्तितानि पुरातनैः ।

३.७.४९ ——— ——— पद्माकारादिविमान-प्रत्येकं चतुर्विध-पद्मादिभेदेन

स. ७. ४०,१

पद्मं भद्रं तथा चूर्णं चूलिकं चेति तानि च ॥
चतुर्भेदानि सर्वाणि* विमानानि पृथक् पृथक् ।

३.७.५० ——— ——— विमान-नलिनकादि-प्रशस्तता-

स. ७. १६-२०

नलिनकं तथा श्रीमत्स्वस्तिकं च तथैव च ।
महापद्मविमानं च पर्वताकृतिकं तथा ॥

विमानं सर्वतोभद्रं तथा पञ्चवसन्तकम् ।
श्रीप्रतिष्ठितकं चापि विमानं स्वस्तिकं तथा ॥

सोमार्धमङ्गनाकारं तथा वै प्रनलीनकम् ।
पद्माकारं चित्रशिल्पं सोमच्छन्दं चतुष्पुटम् ॥

ऊर्जालपत्रकं वापि ब्रह्मवृत्तं चतुर्मुखम् ।
नन्दीविशालमष्टाङ्गं तथैवोत्पलफुल्लकम् ॥

नन्द्यावर्तं श्रियावृत्तं तथा गान्धारपञ्चकम् ।
विष्णोरेतानि शस्तानि विमानानि प्रचक्षते ॥

---

* पूर्वोक्तानि षण्णवतिविमानानि ।

३.७.५१ —— —— —— नलीनक-उत्तमोत्तमता-

स. ७.२१

नलीनकालयो विष्णोरुत्तमोत्तम एव तत् ।

३.७.५२ —— —— —— विष्णुप्रतिष्ठायोग्य-

स. २.३४

ऊर्जालपत्रकं वापि श्रीभद्रं स्वस्तिकं तु वा ॥*

३.७.५३ —— —— नन्दीविशालादिविमान-स्थान-

ज्ञा. ३३.६३

नन्दीविशालं दक्षिणे ग्रामादीनां पश्चिमे अष्टाङ्गमुत्तरे सोमच्छन्दं पूर्वे पर्वताकृतिं सर्वदिक्षु चतुःस्फुटं ग्रामबाह्योद्यानपर्वतनदीतीरेषु नन्दीविशालं सर्वतोभद्रं पर्वताकृतिं वा कारयेत् ।

३.७.५४ —— —— ब्रह्मवृत्तादिविमान-पञ्चमूर्तिविधानानुसरण-

ज्ञा. ३३.६३

ब्रह्मवृत्तं सर्वतोभद्रं श्रीप्रतिष्ठितकं वा ग्राममध्ये पञ्चमूर्तिविधानेन कारयेत्। अधस्तले चतुर्द्वाराः चत्वारो गर्भागाराः । तेषु स्थितानासीनान् वा पुरुषादीनुपरि विष्णुं तदुपरि शयानं सपरिवारं देवीभ्यामृषिभ्यां वा कारयेत्।

---

* विष्णुप्रतिष्ठायोग्यमिति प्रकरणाल्लभ्यते ।

३.७.५५ ——— ——— छन्दःशब्दान्तविमान-अवगमनोपाय-

स. ९.२

यानि यच्छन्दतो ह्यासन्नङ्गोपाङ्गयुतानि च ।
तानि तच्छन्दतो विद्याद्विमानानि विशेषतः ॥

३.७.५६ ——— ——— ब्रह्मच्छन्दविमान-

स. ९.३

ब्रह्मच्छन्दमिति प्रोक्तं चतुरश्रविमानकम् ।

३.७.५७ ——— ——— विष्णुच्छन्दविमान-

स. ९.३

विष्णुच्छन्दमिति प्रोक्तमष्टाश्रकविमानकम् ।

३.७.५८ ——— ——— ऐन्द्रविमान-

स. ९.४

षोडशाश्रं भवेदैन्द्रं - - - - - -।

३.७.५९ ——— ——— रौद्रविमान-

स. ९.४

- - - - - - -रुद्रवास्तु निरश्रकम् ।

३.७.६० —— —— उपादानद्रव्य-

स. ७.५,६

इष्टं शक्तिमपेक्ष्यैव यथाशक्ति समारभेत् ।
शिलाभिरिष्टकाभिर्वा विमानं तु विधीयते ॥

अ. ४

विमानं शैलजं कृत्वा इष्टकाच्छैलजं विना ।
सर्वत्र शैलजं श्रेष्ठम् ऐष्टकं मिश्रकापि वा ॥

३.७.६१ —— —— उपानदादि-द्रव्यद्वयनिषेध-

य. ४.३०

उपानादिषु गण्येषु द्विद्रव्येण न कारयेत् ।
कृतं चेदाभिचारं स्यान्मिश्रं तस्मान्न कारयेत् ॥

३.७.६२ —— —— उपादानद्रव्य-शिला-चतुर्विधा-श्वेतादि-

य. ४.२१

शिलाभेदं प्रवक्ष्यामि विमानार्थं द्विजोत्तमाः ।
श्वेतं कृष्णं च रक्तं च मिश्रं चैव चतुर्विधम् ॥

३.७.६३ —— —— —— —— त्रिविधा-भूगतादि-

य. ४.२२

भूगतं गिरिजं चैव वारिजं वाथ चाहरेत् ।

३.७.६४ ——— ——— ——— ——— उत्कर्षतारतम्य-

य. ४.२२

वारिजाद्गिरिजं श्रेष्ठं गिरिजाद्भूमिजं तथा ।

३.७.६५ ——— ——— शिलादिन्यासक्रम-

य. ४. २५-९

शिलायां परिकर्तव्या इष्टका इष्टकोपरि ।
नाचरेत् तच्छिलाभिस्तद्विपरीतं न कारयेत् ॥

श्वेतजोपरि कर्तव्यौ कृष्णजं रक्तमिश्रजौ ।
रक्तजोपरि मिश्रं वा श्वेतं वा कारयेद्बुधः ॥

कृष्णजोपरि श्वेतं स्याद्रक्तमिश्रौ च वर्जयेत् ।
नाचरेत् स्वप्रधानौ तौ रक्तमिश्रौ विचक्षणः ॥

प्रसिद्धभवने विष्णोः श्वेतजं कृष्णमेव वा ।
कृष्णजोपरि श्वेतं स्यादिष्टकोर्ध्वे शिलां विना ॥

आचरेद्भवनेऽन्ये तु प्रासादादिषु सर्वशः ।
वर्गान्तमेकद्रव्येण कारयेत् संकरं विना ॥

३.७.६६ ——— ——— खातकुड्यकल्पन-

वि. ७.२९

पूर्वापरायामं दक्षिणावान्तरं भवति । आयतचतुरश्रवृत्ते चायामेन शान्तिकोत्सेधग्रहणं कारयेत् । अर्पितमनर्पितमिति द्विविधं भवति । अर्पितमलिन्द्रविहीनम्, अनर्पितमलिन्द्रयुक्तमेवं कारयेत् ।

विमानस्य विस्तारं पादबाह्यम् उत्सेधमुपानदादिस्थूपिपर्यन्तं स्यात् । मानसूत्र विन्यस्य ऐशान्यां किञ्चिदधिकमाग्नेय्यां किञ्चिन्न्यूनम् एवं कारयेत् । अन्यथा चेत्, सर्वं नश्यति। मानसूत्राद्बहिर्हस्तमध्यर्धं द्विहस्तं वा अधिकविस्तारायामं जलान्तं शिलान्तं वा दृढप्रकृतिश्चेत् द्विहस्तं सार्धविस्तारमेकहस्तं वा खनित्वा तत्खातं चतुर्धा कृत्वा द्व्यंशं त्र्यंशं वा वालुकोपलशकलाद्यैर्जलेन संपूर्य मुसलैः हस्तिपादैः दारुतुण्डैर्बृहत्तरैर्वा दृढं कृत्वा शेषांशं पादमर्धं त्रिपादं हस्तं वा महद्विमानं चेत् अधिष्ठानद्विगुणम् अध्यर्धं समं वा खातकुड्यं प्रकल्पयेत् । तदूर्ध्वे दण्डप्रमाणेन होमं कृत्वा तदूर्ध्वे अधिष्ठानम् उपपीठं वा कुर्यात् ।

३.७.६७ —— —— विमान-षड्वर्ग-

स. ८. १-३

षड्वर्गसहितं नित्यं विमानं दोषवर्जितम् ।
तत्र रन्तुं मनीषा स्यात् देवतानां विशेषतः ॥

विमानानां च सर्वेषां सामान्यमिदमुच्यते ।
अधिष्ठानं पादवर्गः प्रस्तरग्रीवकावपि ॥

शिखरं स्थूपिका चेति षड्वर्गा इति कीर्तिताः ।

ज्ञा. ३१.५९

वि. ९.३३

[अत्र एकतलविमानम् अधिष्ठानादिषड्वर्गयुतं चतुर्वर्गयुतं वा भवति इति निर्दिश्यते इति विशेषः ।]

३.७.६८ —— —— अधिष्ठानादिषड्वर्ग-अवान्तरविभाग-

स. ८.३-८

अधिष्ठानादिवर्गेषु विभागः परिकीर्त्यते ॥

उपानं प्रथमं ज्ञेयं जगती कुमुदं तथा ।
वल्लिका चापि खण्डं च तथाप्यधरपट्टिका ॥

महापट्टी च विज्ञेया विज्ञेया चोर्ध्वपट्टिका ।
पादाश्चापि प्रमाणेन परिकल्प्या विशेषतः ॥

ताटी च तर्करी चैव कुम्भं च फलका तथा ।
बोधिका चोत्तरा चैव प्रतिपट्टी च मालिका ॥

लम्बेष्टका च खण्डं च वेदिका च तथैव च ।
शालाकूटं महानासी तथैव क्षुद्रनासिका ॥

ग्रीवा शिखरकुम्भं च स्थूपिका च क्रमेण च ।
इत्युद्देशक्रमेणैव विमानाङ्गं प्रचक्षते ॥

३.७.६९ —— —— —— उत्सेधमान-

स. ७.८-११

एकभूमिविमानस्य विस्ताराद्द्विगुणोच्छ्रयम् ।
ज्ञात्वा तदुच्छ्रयं तस्मादष्टभागं तु कारयेत् ॥

एकभागमधिष्ठानं द्विभागं पादवर्गकम् ।
प्रस्तरश्चैकभागः स्याद्ग्रीवा तस्यैकभागिका ॥

शिखरं तद्द्विभागं स्यात् स्थूपी चैकांशसंयुता ।
एवं षड्वर्गसंयुक्तं विमानं संप्रशस्यते ॥

शिल्पशास्त्रोक्तमार्गेण शिल्पिभिः कारयेत् क्रमात् ।

ज्ञा. ३१.५९

य. ८. ५,६

[अत्र अधिष्ठानपदस्थाने मसूरकपदं निर्दिश्यते इति विशेषः ।]

३.७.७० —— —— —— अधिष्ठान-पर्यायवाचक-

नि. ९

पादाधारमधिष्ठानमसूरं कुट्टिमं तलम् ॥

धरातलं ततोन्योगवत्वाधारस्य वाचकम् ।

३.७.७१.० —— —— —— —— नवविध-कुट्टिमादि-

नि. ९

कुट्टिमं पट्टिकाबन्धं पद्मबन्धं तथैव च ।

प्रतिप्रस्तारबन्धौ च प्रत्यङ्गं केसरं तथा ।
पुष्पाङ्गं वेदिकं चैव तद्भेदो* नवधा भवेत् ॥

३.७.७१.१ —— —— —— —— कुट्टिम-

नि. ९

स्थाणुदीर्घत्रिभागैकमर्धं वा कुट्टिमोच्छ्रयम् ।
सर्वप्राकारयोग्यं स्यात् अन्योत्सेधं न कारयेत् ॥

महापट्ट्यान्तरं कर्णमाधारं कुमुदं तथा ।
जगत्युपानमेवं स्यात् प्रत्यङ्गं समुदाहृतम् ॥

अजेन्येच्छेदनं(?) कुर्यात् तत् - स्सनाशयत्युत ।
छेद्यं स्यात् पट्टिकाबन्धं छेद्यङ्गं प्रतिबन्धकम् ॥

---

* अधिष्ठानभेदः ।

पुराणे द्वारमुद्दिश्य च्छेद्यधिष्ठानमुच्यते ।
मूलबेरमथालोक्य कल्पयेत् तन्त्रवित्तमः ॥

- - - - - - - - - - - - - - यष्टसमंजम्(?) ।
सुस्निग्धविस्तरं छित्त्वा तत् त्रिवस्वन्तसूत्रतः ॥

यत्पादमूलविष्कम्भं द्विगुणं भूमिनिर्गमम् ।
उपानं पादुकं जन्म होमपर्यायवाचकाः(?) ॥

पादमूलस्य विष्कम्भं तुल्य - - - - - - ।
- - - - - - - - - जन्मनिर्गमं संप्रवक्ष्यते ॥

तत्तदुक्तक्रमेणैव कल्पयेत् कुट्टिमं बुधः ।

३.७.७१.२ ———— ———— ———— ———— पट्टिकावन्ध-

नि. ९

अधिष्ठानोच्छ्रयं यावत् त्रिचत्वारिंशदंशकम् ॥

द्विभागं पादुकोत्सेधं जगत्यंशे त्रयोदश ।
रुद्रांशं कुमुदोत्सेधं - - - - - -द्व्यंशं च पट्टिकाम् ॥

अर्णवं कर्णमुत्सेधं गोलकं चोर्ध्वपट्टिकाम् ।
कर्णपादसमायुक्तं महापट्टश्रमाश्रयम् ॥

नेत्रं तस्योर्ध्वपट्यंशं सप्तधा जन्मनिर्गमम् ।
भूतांशैर्जगती चैव तत्समं कुमुदं तथा ॥

आश्रजं कल्पयेत् तत्र पादालंकारवद्बुधः ।
वस्तुनोसूतराच्छेद्य(?) निर्गमं तु त्रिभागिकम् ॥

तत्त्वं चाधारकम्पं स्यात् ऊर्ध्वकुम्भमथैव च ।
महापट्टित्रिभागं स्यान्नंत्वं(?) तस्योर्ध्वकम्पकम् ॥

एतल्लक्षणसंयुक्तं पट्टिकाबन्धमुच्यते ।

३.७.७१.३ —— —— —— —— पद्मवन्ध-

नि. ९

आधारस्योच्छ्रयं यावत् षड्विंशतिमंशकम् ॥

अश्विन्यंशमुपानं स्यात् वस्वंशं जगती भवेत् ।
पद्मवत् कल्पयेत् तत्र सर्वसौन्दर्यसंयुतम् ॥

अथ पद्मदलाग्रे तु कुम्भमर्धांशमिष्यते ।
तज्जलं जातवेदांशम् अर्धं तस्योर्ध्वकम्पकम् ॥

तत्त्व पद्मग(द?)लं तत्र चोर्ध्वकम्पार्धमिष्यते ।
द्व्यंशमूर्ध्वं ज(द?)लं विद्यात् अर्धांशं कम्पमुच्छ्रयम् ॥

भूतांशं कुमुदोत्सेधं नेत्रांशं चोर्ध्वकम्पकम् ।
आयुश्रमं कन्धरोत्सेधम् उत्तरं तत्समांशकम् ॥

वाजनं तत्त्वमंशं स्यात् सप्तधा जन्मनिर्गमम् ।
भूतांशं जगतीसूत्रमधोपद्मं ज(द?)लस्य तु ॥

द्विभागं तस्य कम्पं च सार्धैकं जलनिर्गमम् ।
ऊर्ध्वपद्मदलं वेदनिर्गमं वास्तुनं ततः(?) ॥

तत्समं कुमुदं वृत्तं निर्गमं चारुदर्शनम् ।
कन्धरं कन्यसं युक्तं तत्त्वं वा नेत्रमेव वा ॥

सार्धभागद्वयं वाथ निम्नं तत्तार्धकं बुधः ।
भूतांशं खण्डविस्तारं सार्धतत्त्वांशनिर्गमः ॥

वाजनं खण्डतुल्यं स्यात् निर्गमं समुदाहृतम् ।
सर्वालङ्कारसंयुक्तं पद्मबन्धमिदं विभुम् (दुः?) ॥

३.७.७१.४ —— —— —— —— प्रतिवन्ध-

नि. ९

अधिष्ठानोच्छ्रयं यावत् दशांशं संविभज्य च ।
एकांशं पादुकं विद्यात् कर्मांशं जगती बुधः ॥

आश्रमं कुमुदोत्सेधं तत्त्वं तस्योर्ध्वपट्टिकम् ।
अथैकं कण्ठसंयुक्तम् एकांशं समुदाहृतम् ॥

उत्तरं त्वेकभागं स्यात् एकांशं तस्य वाजनम् ।
ज(जन्म?)दुर्गमसप्तांशं वर्णं जगति निर्गमम् ॥

तत्समं कुमुदं विद्यात् वृत्तं चाश्रमजं तु वा ।
उत्तरे छेद्यसूत्रार्धं वस्तुनः खण्डनिर्गमम् ॥

तदर्धं वाजनं विद्यात् निम्नं पूर्ववदिष्यते ।
प्रतिबन्धमिदं ज्ञेयं सर्वालंकारसंयुतम् ॥

३.७.७१.५ —— —— —— —— प्रस्तरवन्ध-

नि. ९

कुट्टिमस्योच्छ्रयं यावत् अंशं पूर्ववदिष्यते ;
द्विभागं पादुकोत्सेधं कर्मांशं जगती भवेत् ॥

भूतांशं कुमुदोत्सेधम् अर्धांशं कम्पमुच्छ्रयम् ।
द्विभागं कन्धरं विद्यात् त्रिभागं तस्योत्तरं बुधः ॥

पादं वाजनमेवं स्यात् एकांशं तु तलोच्छ्रयम् ।
प्रस्तरं पादनेत्रांशं तस्यांशं पट्टिका भवेत् ॥

तत्समं कन्धरोत्सेधमुत्तरं गोलकांशकम् ।
एकांशं वाजनं तस्य व्यालसिंहोपशोभितम् ॥

जम्न(न्म?)निर्गमसप्तांशे वेदं जगति निर्गमम् ।
तत्समं कुमुदं तत्र तत्रांशं कम्पनिर्गमम् ॥

तदर्धं वस्तुजनकं पादनिर्गममिष्यते ।
उत्तरं कम्पतुल्यं स्यात् - -पादं तु वाजनम् ॥

अर्धांशं - तलस्यैव निवृतं पाद्मुदाहृतम् ।
खण्डनिर्गममर्धांशं तत्समं वाजनं बुधः ॥

पद्मबन्धवदुद्दिष्ट- - - - - - - - ।
एवं प्रस्तरमुद्दिष्टं सर्वालंकारशोभितम् ॥

३.७.७१.६ —— —— —— —— प्रत्यङ्ग-

नि. ९

आधारस्योच्छ्रयं यावत् षोडशांशं विभज्य च ।
जगती (त?)स्यार्ध वर्णांशं(?) तत्समं कुमुदं तथा ॥

अर्धं तस्योर्ध्वपट्टी स्यात् कन्धरं सो- - - - ।
- - - - - -युक्तमग्र्यंशं तूत्तरं बुधः ॥

वाजनं त्वथमेवं(?) स्यात् निर्गमं पद्मबन्धवत् ।
एतत् प्रत्यङ्गमेवं स्यात् उक्तभूमौ विधीयते ॥

३.७.७१.७ —— —— —— —— केसर-

नि. ९

मसूरस्योच्छ्रयं यावत् षोडशांशं विभज्य च ।
द्विभागं पादुकोत्सेधं - - -पद्मतलान्वितम् ॥

अधस्तात् कुंभमर्धांशम् एकांशं पद्ममुच्छ्रयम् ।
अर्धं तस्योर्ध्वकम्पं स्यात् जगतस्यार्धकम्पकम् ॥

तत्रैकांशमधःपद्मं कम्पमग्र्यंशमिष्यते ।
तत्त्वमूर्ध्वतलं विद्यात् जगत्यत्र विशेषतः ॥

अर्धांशं कुमुदं प्रोक्तं पादं कम्पमुदाहृतम् ।
विभागं पट्टिकोत्सेधं तत्त्वं कन्धरमिष्यते ॥

नेत्रं तु तालोत्सेधमर्धं तद्वाजनं बुधः ।
होमयानिर्गमं यावत् सप्तधांशं विभज्य च ॥

अथ पद्मदलस्योर्ध्वे कम्पभूतांशनिर्गमम् ।
आश्रमं जगती चैव तत्समं कुमुदं तथा ॥

तत्त्वांशं वस्तुनः कम्पं निर्गमं समुदाहृतम् ।
तत्समं खण्डमुद्दिष्टं बन्धं वाजननिर्गमम् ॥

एवं कन्धर[*]मुद्दिष्टं सर्वसौन्दर्यसंयुतम् ।

३.७.७१.८ —— —— —— —— पुष्पाङ्ग-

नि. ९

कुट्टिमस्योच्छ्रयं यावत् अष्टोत्तरदशांशकम् ॥

विभज्योपानद्व्यंशं स्यात् षडंशं जगती बुधः ।
पुत्रैवार्धदशात्यंशं(?) षडेकं पद्मपट्टिकम् ॥

नेत्रपङ्कजपात्राभं(?) मत्तलस्योर्ध्वपट्टिकाम् ।
तदूर्ध्वं चम्म(जन्म?) कृत्वा तु(?) जगत्यंशे विशेषतः ॥

---

[*] केसरपदस्थाने कन्धरपदप्रयोगः ।

अर्धं तत्कुसुमासारमाश्रमं कुमुदं भवेत् ।
तदूर्ध्वं कम्पमर्धांशं तत्त्वतोत्पट्टिकोच्छ्रयम् ॥

कन्धरं खण्डसंयुक्तं सार्धं तत्त्वांशमिष्यते ।
द्व्यंशं तस्योत्तरोत्सेधम् अर्धं तद्वाजनं बुधः ॥

जम्म(न्म?)निर्गमसप्तांशे षडंशं कम्पनिर्गमम् ।
सार्धं त्रिभागमूर्ध्वं स्यात् कम्पनिर्गममिष्यते ॥

आवर्जं तु त्रिभागं स्यात् कुंगदाधरद्व्यंशकम् ।
कुमुदं रज्जुसूत्रान्तं पद्मपुष्पोपशोभितम् ॥

शक्रवृत्तसमायुक्तम्(?) एकांशं चोर्ध्वकम्पकम् ।
खण्डनिर्गमनं तद्वद्धिधृण्वाजन्मनिर्गमम् (?)॥

निम्नं पूर्ववदुद्दिष्टम् एतत् पुष्पाङ्गमिष्यते ।

३.७.७१.९ ——— ——— ——— ——— वेदिक-

नि. ९

अधिष्ठानोच्छ्रयं यावत् षड्विंशतिशतांशकम् ॥

उपानं गोलकोत्सेधं सार्धकं पद्ममुच्छ्रयम् ।
अर्धांशमूर्ध्वकम्पं स्यात् वस्वंशं जगती बुधः ॥

तत्समं कुमुदोत्सेधं सुवृत्तं चारुदर्शनम् ।
तत्त्वांशमूर्ध्वपट्ट्यंशं कन्धरं सार्धनेत्रकम् ॥

उत्तरं सार्धमग्न्यंशं तत्त्वं वाजनमिष्यते ।
जम्म(न्म?)निर्गमनाय(?) मंशीकृतविचक्षणः ॥

तत्त्वनिर्गमनं षट् च भूतं तत्कम्पनिर्गमम् ।
आश्रमं जगती चैव तत्समं कुमुदं क्रमात् ॥

खण्डनिर्गमनं तद्वत् तत्समं वाजनं बुधः ।
सर्वसौन्दर्यसंयुक्तं वेदिकं समुदाहृतम् ॥

एवमेव क्रमेणैव कुर्याद्वृद्धिकरं शुभम् ।

३.७.७२.० ———— ———— ———— ———— -अष्टविध-पादवन्धादि-

वि. ८.३०

पादबन्धं पद्मबन्धं पुष्पबन्धं श्रीप्रियाम्बुजं प्रतिबन्धं प्रतिक्रमं कपोतबन्धं श्रीबन्धमित्यष्टावधिष्ठानानि भवन्ति ।

३.७.७२.१ ———— ———— ———— ———— पादबन्ध-

ज्ञा. ३१.५९

तत्र ललाटास्योरोनाभिजानुसमोत्सेधानि पञ्चाधिष्ठानानि । तत्त्रिधा कृत्वा - - - - -सार्धैकांशे पट्टिकां सार्धैकांशे कण्ठकशेषं वाजिनं पादबन्धमिति - - - - - - ।

प्र. ५.३१-३

अधिष्ठानं त्रिधा कृत्वा भागो वै जगती भवेत् ॥

कुमुदं तु द्वितीयेन भागेनैव तु कारयेत् ।
कृत्वा शेषं चतुर्भागम् एकांशेनैव पट्टिकाम् ॥

कुर्यात् सार्धेन कण्ठं तु शेषं वाजिनमुच्यते ।
पादबन्धमिति ख्यातं सर्वकार्येषु पूजितम् ॥

वि. ८.३०

तत्राधिष्ठानोत्सेधं त्रयोविंशतिभागं कृत्वा जन्मतलोपरि एकांशं खुरम् अष्टांशा जगती सप्तांशं त्रिपट्टकुमुदम् एकांशं कम्पं द्व्यंशं कण्ठम् एकांशं कम्पं

द्व्यंशा महापट्टी एकांशोर्ध्वपट्टिका च एतत् पादबन्धं स्यात् ।

३.७.७२.२ —— —— —— —— पद्मबन्ध-

वि. ८.३०

उत्सेधं* त्र्यष्टभागं कृत्वा एकांशोपानत् द्व्यंशं पद्मम् एकांशं कम्पं षडंशा जगती पञ्चांशं त्रिवर्गकुमुदम् एकांशं कम्पं द्व्यंशं कण्ठम् एकांशं कम्पं द्व्यंशा महापट्टिका एकांशं पद्मम् एकांशं पद्मम् एकांशं कम्पम् एतत् पद्मबन्धं स्यात् ।

३.७.७२.३ —— —— —— —— पुष्पबन्ध-

वि. ८.३१

उत्सेधं* षड्विंशति★भागं कृत्वा एकांशं खुरम् एकांशं पद्मम् एकांशं कम्पं पञ्चांशा जगती (च) एकांशं पद्मम् एकांशं धृक् एकांशं पद्मं चतुर(रश्रं?) वृत्तकुमुदं त्रिवर्गं वेति केचित् एकांशं पद्मम् एकांशं कम्पं द्व्यंशं कण्ठम् एकांशं कम्पम् एकांशं पद्मं द्व्यंर्धांशा महापट्टिका एकांशं पद्मम् एकांशं कम्पम् एतत् पुष्पबन्धं स्यात् ।

३.७.७२.४ —— —— —— —— श्रीप्रियाम्बुज-

वि. ८.३१

उत्सेधमेकविंशतिभागं* कृत्वा एकांशा पादुका पञ्चांशं पद्मम् एकांशं कण्ठम् एकांशं दलं त्र्यंशं वृत्तकुमुदम् एकांशं पद्मम् एकांशं कम्पं द्व्यंशं कण्ठम्

---

*अधिष्ठानस्येति शेषः ।

★ खुरादीनाम् अंशपरिगणने) षड्विंशतिभागा न भवन्ति ।

एकांशं कम्पम् एकांशं पद्मं द्व्यंशा महापट्टिका एकांशं पद्मम् एकांशोर्ध्वपट्टिका चेत्येतच्छ्रीप्रियाम्बुजम् ।

३.७.७२.५ ——— ——— ——— ——— **प्रतिबन्ध-**

वि. ८.३१

उत्सेधं*मष्टादशांशं कृत्वा एकांशं पादुकं षडंशा जगती षडंशं वृत्तकुमुदम् एकांशमालिङ्गम् एकांशमन्तरितं द्व्यंशं प्रतिमुखम् एकांशं वाजनम् एतत् प्रतिबन्धं स्यात् ।

३.७.७२.६ ——— ——— ——— ——— **प्रतिक्रम-**

वि. ८.३१

उत्सेध*मेकोनविंशतिभागं कृत्वा एकांशं पादुकं सप्तांशा जगती षडंशं वृत्तकुमुदम् एकांशमालिङ्गम् एकांशमन्तरितं द्व्यंशं प्रतिमुखम् एकांशं वाजनं नागवक्त्रसमं प्रत्यवसानम् एतत् प्रतिक्रमं स्यात् ।

ज्ञा. ३१.५९

तत्र ललाटास्योरोनाभिजानुसमोत्सेधानि पञ्चाधिष्ठानानि । तत् त्रिधा कृत्वा एकांशे जगतीं द्वितीये कुमुदम्, तृतीयं चतुर्धा विभज्य द्व्यंशे पट्टिकां परितो द्व्यंशं प्रतिमुखमेवं प्रतिक्रमम् ।

प्र. ५. ३४-६

प्रतिक्रमं वा कर्तव्यम् अधिष्ठानप्रमाणतः ।
जगतीं तद्वदेवाथ कुमुदं वृत्तमुच्यते ॥

भागेन पूर्ववत् कृत्वा चतुर्थं शेषमाचरेत् ।
पट्टिकेनैव कर्तव्यम् एकमन्तरितं तथा ॥

---

* अधिष्ठानस्येति शेषः ।

द्वाभ्यां प्रतिमुखं कुर्यात् प्रतिक्रममिदं भवेत् ।
अधिष्ठानमिति ख्यातम् - - - -- - - - ॥

३.७.७२.७ —— —— —— —— कपोतबन्ध-

वि. ८.३२

*उत्सेधं सप्तविंशतिभागं कृत्वा द्व्यंशं पादुकं षडंशं पद्मम् एकांशं कण्ठम् एकांशं दलं त्र्यंशं वृत्तकुमुदं त्रिवर्गं वेति केचित् एकांशं दलम् एकांशं कम्पं द्व्यंशं कण्ठम् एकांशं कम्पम् एकांशमुपरिदलं त्र्यंशं कपोतम् एकांशमालिङ्गम् एकांशमन्तरितं द्व्यंशं प्रतिमुखम् एकांशं वाजनम् एतत् कपोतबन्धं स्यात् ।

३.७.७२.८ —— —— —— —— श्रीबन्ध-

वि. ८.३२

*उत्सेधं द्वात्रिंशद्भागं विभज्य द्व्यंशमुपानत् एकांशं क्षुद्रोपानं (नत्) सप्तांशं पद्मम् एकांशं कण्ठम् एकांशं दलं चतुरंशं वृत्तकुमुदम् एकांशं दलम् एकांशं कम्पं त्र्यंशं कण्ठम् एकांशं कम्पम् एकांशं पद्मं चतुरंशं कपोतम् एकांशमालिङ्गम् एकांशमन्तरितं द्व्यंशं प्रतिमुखम् एकांशं वाजनम् एतत् श्रीबन्धं स्यात् ।

३.७.७३ —— —— —— —— उपानदाद्युत्सेधमान-

स. ८.९-११

निर्देशानपि वक्ष्यामि निबोधत पृथक् पृथक् ।
उपानमेकभागं स्यात् पञ्चांशा जगती तथा ॥

---

*अधिष्ठानस्येति शेषः ।

कुमुदं तु चतुर्भागमेकभागा तु वल्लिका ।
खण्डं द्विभागमुद्दिष्टमेका त्वधरपट्टिका ॥

- - - - - - - - - - - - - - - - -।
द्विभागा स्यान्महापट्टी तदर्धं चोर्ध्वपट्टिका ॥

क्रि. ४.५७-६०

अधिष्ठानोदये भूतभागषड्भागभाजिते ॥

सोमाक्ष्यग्निचतुर्बाणषट्सप्ताष्टांशकोच्छ्रितम् ।
साधारणे तु पूर्वार्धमत्रोपेतं ततः परम् ॥

उपपीठे तलाधस्ताज्जाङ्गले तत्र कल्पयेत् ।
(दण्डं सार्धद्विदण्डं वा त्रिदण्डं वास्य निर्गमम् ।
सरःसरित्समुद्रान्तपुलिनेष्वालयं यदि ॥

उपपीठं तलोत्तुङ्गं त्रिचतुःपञ्चषड्गुणम् ।
एकभक्तिं विनिष्क्रान्तं तलोर्ध्वं हर्म्यखण्डकम् ॥

एवं चूलीयुतं वापि परितः कल्पयेत् सुधीः ।
सान्तर्मण्डलकं चेत् तद्विभक्तसमनिर्गमम् ॥

तन्निर्गमतुरीयांशं भित्तिव्यासमुदाहृतम् ।
द्व्यंशकं मालिका पङ्क्तिः शेषं चर्यापदं भवेत् ॥)
पादमार्गे गलेऽधस्ताद्वेदिकां परिकल्पयेत् ॥

वेदिकारहितं केचित् पादवर्गं वदन्ति हि ।
ऋजुभित्तिमधिष्ठानं केचिदाहुः सपट्टिकम् ॥

य. ८. ८-१०

चतुर्विंशतिभागं तु कृत्वाधिष्ठानमुच्चयम् ।
नागांशं जगतीमानं धात्वंशं कुमुदस्य च ॥

अम्बरांशं च तत्कम्पमग्र्यंशं कण्ठमेव च ।
भागांशं चान्यकम्पं स्याद्वाजिनं च त्रिभागिकम् ॥

ऊर्ध्वपट्टं तथा धीमान् निर्गमं तत्तदंशकम् ।

३.७.७४ —— —— —— —— नासिकादियोजन-

वि. ८. ३२,३

⁂एतेषु नासिकाङ्घ्रीन् युक्त्या योजयेत् । पादबन्धे जन्मादिपञ्चवर्गेषु तत्तदङ्गावसाने द्वारस्थलं संकल्पयेत् । अन्येषु पट्टिकान्ते चैवं युक्त्या कारयेत् । प्रत्यङ्गेषु प्रतेरुपर्युपरि द्वारस्थलं संकल्पयेत् । प्रतिच्छेदं न कुर्यात् । कुर्याच्चेत् विनाशाय भवति । सर्वेषामङ्गानां प्रवेशनिर्गममेकदण्डादित्रिदण्डान्तं पाददण्डवृद्धया विमानविस्तारबाह्याङ्गनिर्गमं नवविधं स्यात् । एतेष्विष्टप्रमाणेनोपानद्विस्तारं तत्त्रिचतुःपञ्चषट्सप्ताष्टांशं कृत्वा एकांशं खुरनिर्गमं शेषं जगतीविस्तारं तत्समं कुमुदं तत्समं तद्बाह्यात् कण्ठप्रवेशं सर्वेषां पट्टिकाम्बुजकम्पादीनां तत्तदुत्सेधसमनिर्गमं वेत्राणामुत्सेधं त्रिचतुःपञ्चषडंशं कृत्वा एकांशं निर्गमम् एवं युक्त्या कारयेत् '

३.७.७५ —— —— —— पाद-आकृति-

प्र. ५.३७-४०

चतुरश्रमथाष्टाश्रं वृत्तं चैव त्रिधा भवेत् ।
कुम्भयुक्तं तथा केचित् केचित् कुम्भविहीनकम् ॥

केचिद्वै कुम्भमण्वीभ्यां युक्तं पादं स्मरन्ति हि ।
विस्तारेण समं वापि द्विगुणं वापि मूलतः ॥

⁂ पादबन्धादिषु ।

चतुरश्रमथो हित्वा वृत्तमष्टाश्रमेव वा ।
कर्तव्यं तु यथायुक्तम् अथवा षोडशाश्रकम् ॥

पादानामाकृतिः प्रोक्ता- - - - - - ।

३.७.७६ ——— ——— ——— ——— विस्तर-

स. ८. २०,१

अष्टादशद्वादशाष्टौ वाङ्गुल्यः पादविस्तरः ॥

उत्तमान्तरहीनानां विमानानां प्रकल्पिताः ।

खि. ७.२८

[अत्र 'पुरस्ताद्द्विगुणं प्रोक्तं पादं युक्त्या प्रकल्पयेत्' इति निर्दिश्यते इति विशेषः ।]

३.७.७७ ——— ——— ——— ——— अवयवकल्पन-

स. ८. १२,३, २१-४

सर्वेषां* च प्रमाणेन द्विगुणं गात्रमुच्यते ।
पादबन्धं शिखण्डं च प्रतिखण्डं तथैव च ॥

न च छिद्याद्*विमानेषु तत्कर्ता तु विनश्यति ।
- - - - - - - - - - - - - - - - - - - ।
कुम्भं ताटी पृथक्कार्या फलका च प्रमाणतः ॥

अन्योन्यं कण्ठमात्रेण भवेयुरविशेषतः ।
प्रत्युत्तरं च माला च लम्बवेदी तथैव च ॥

---

* पादानाम्

* एतैरवयवैर्विना विमानेषु पादं न कुर्यादित्यर्थः ।

पादविस्तारमात्रेण भवेदेतच्चतुष्टयम् ।
हंसमाला कवेरुक्ता भूतमाला हरस्य तु ॥

विद्याधराणां माला स्याद्धरेर्नारायणस्य तु ।

प्र. ५.४०-५१

- - - - - - - - -कुम्भलक्षणमुच्यते ।
पादाधिकमथाध्यर्धं पादोनं द्विगुणं तु वा ॥

द्विगुणं तु समुत्सेधं पादविष्कम्भमानतः ।
श्रीकरं चन्द्रकान्तं च सौमुख्यं प्रियदर्शनम् ॥

यथाक्रमेण नामानि कर्तव्यानि विशेषतः ।
श्रीकरं वृत्तपादानां कलाश्राणां तथैव च ॥

चन्द्रकान्तमथाष्टाश्रं सोमखण्डमिति स्मृतम् ।
अतिभारेषु स्तम्भेषु प्रियदर्शनमुच्यते ॥

कृत्वा नवांशकं कुम्भं भागमेकं हृदुच्यते ।
कुम्भं चतुर्भिरंशैस्तु कण्ठभागमुदाहृतम् ॥

आस्यमेकांशमित्युक्तं शेषं कुर्याद्द्विदण्डकम् ।
एकेन पद्मकेनैव वृत्तमेकेन वा तथा ॥

विस्तृतौ स्तम्भविस्तारौ द्विगुणौ कुम्भमुच्यते ।
अध्यर्धमास्यविस्तारं हारो धामूलपादवत्(?) ॥

विस्तारमेवमुक्तं स्यात् मण्डलैर्लक्षणमुच्यते ।
मण्डैस्त्रिपादमुत्सेधं विस्तारं तु चतुर्गुणम् ॥

विभागैकं भवेत् पद्मं वेत्रमेकं तथैव च ।
भागा वा फलकारामा वेत्रा वा पादरूपवत् ॥

पादाग्रकर्ममानेन स्कन्धं कुर्याद्विधानतः ।
स्तम्भाग्रसमविस्तारं वीरकाण्डं त्रिपादतः ॥

तदूर्ध्वे पादतां कुर्यात् विस्तारं पादविस्तृतम् ।
समं त्रिपादमर्धं वा बोधिकोत्सेध उच्यते ॥

त्रिदण्डमधमायामं चतुर्दण्डं तु मध्यमम् ।
उत्तमं पञ्चदण्डं स्यात् बोधिकोत्सेध उच्यते ॥

य. ८. १०-२७

उपानोदयमादौ तु जात्यङ्गुलिसमुच्छ्रयम् ॥

दण्डं वाध्यर्धदण्डं वा चरणस्याथ निर्गमम् ।
तत्तदंशं तदन्येषां युक्त्या शोभा यथा तथा ॥

वारिमार्गमुदीच्यां वा प्रतीच्यां वा यथार्हकम् ।
जगत्यादौ कुर्याद्धीमान् तद्वर्गच्छेदनीयकम् ॥

प्रासादस्य तु विस्तारं चतुर्विंशतिभागिकम् ।
पञ्चविंशतिभागं वा षड्विंशतिभिरेव वा ॥

भित्तिस्तम्भस्यार्धभागं भागमेकं त्रिधा मतम् ।
वह्निर्वेदं च षण्मात्रं पादविष्कम्भमेव वा ॥

निर्गमं पादमर्धं वा त्रिपादं कुड्यपादयोः ।
अश्रं नागाश्रवृत्तं वा मिश्रं वामिश्रमेव वा ॥

धर्मनन्दाष्टभागेन मूलादग्रविशालता ।
विद्वद्भिरग्रपादान्तमुक्तं तन्मानदण्डकम् ॥

तस्य पादोदयं धीमान् षट्सप्तवसुभागकम् ।
कृत्वैव वेदिकोत्सेधं षड्भागान्तं पुनश्चरेत् ॥

अग्र्यंशं कण्ठमेकांशं कम्पं पद्मं तथोपरि ।
भागांशमूर्ध्वकम्पं स्याच्छ्रेष्ठं तद्युग्मभित्तिकम् ॥

अयुग्मं विषमं नेष्टं शालाकूटेषु भित्तिषु ।
अवसाने च कुर्यात् तद्भागस्थानं विधीयते ॥

कुड्यस्तम्भस्य विस्ताराच्चतुर्भागोनविस्तरम् ।
तोरणस्तम्भविस्तारं सर्वेषां समुदीरितम् ॥

वीरकाण्डोपरि न्यस्तमुत्तरं वाजनाङ्गकम् ।
क्षेपणं निम्नकम्पस्तु तदूर्ध्वे वल्लिकान्तकम् ॥

विचित्रैर्नानापत्रैस्तु कारयेच्छुभदर्शनम् ।
स्तम्भं चैवास्य चाग्रे तु बोधिका वीरकाण्डकौ ॥

फलकोपरि चैकैकं दण्डोत्सेधं प्रशस्यते ।
पादोनोच्चं तु कुम्भं स्यान्नासीतुङ्गं तदर्धकम् ॥

कण्ठयोः पाददण्डं स्याद्वल्लीदण्डेन कारयेत् ।
क्षुद्रदण्डं तथा नाम पादमेव प्रशस्यते ॥

तत्पादस्य च कण्ठे च नासि(सी?) चोर्ध्वस्य चायतम् ।
नाभिकुम्भस्य कण्ठेन कुम्भकण्ठस्य पालिका ॥

बोधिका फलका तुल्यं फलकां विभजेत् त्रिधा ।
एकं वेत्रं ततो हस्ताच्छेषं पद्मं च कारयेत् ॥

तथापि तोरणैः स्नानफलकाद्या विशेषतः ।

३.७.७८ ——— ——— ——— ——— षोडशविध-समवृत्तादि-

स. ८. १६-९

समवृत्तं❊ तथैकान्तं गोकर्णं कोमलं तथा ।
नागहस्तं स्फुटवृत्तं तालवृन्तक एव च ॥

एते सप्तपदाः प्रोक्ताः वृत्ता लोकपरिश्रुताः ।
चतुरङ्गमवच्छन्दं वज्रं चतुरवेदिकम् ॥

तथा वायुपरीतं च षष्ठं च प्रियदर्शनम् ।
पिण्डिपादं षोडशाश्रं शलाकापिण्डिकं तथा ॥

एते च नव संप्रोक्ताः पादाः षोडशभेदकाः ।

३.७.७९ ——— ——— ——— ——— सिंहादिकल्पन-

स. ८. १४,५

पादाश्च विविधाः प्रोक्ताः समाश्रयनिराश्रयाः ।
सिंहहंसगजव्यालाः पादानामाश्रयाः शुभाः ॥

हंसमाला कवेरुक्ता हरेः सिंहाश्रयाः शुभाः ।
गजाश्रयाः समाख्याता देवसेनापतेस्तथा ॥

ज्ञा. ३२.६२

सिंहव्यालगजवृषहंसशुकचक्रवाकमुक्तादामकदलीक्रमुकसोमरूपलतारूपमकरवेदिकादण्डयक्षगन्धर्वसिद्धकिंनरनागेन्द्रादीन् क्रीडारससंयुक्तान् पादान्तरेष्वर्पयित्वा - - - - - - ।

❊ पादस्य समवृत्तादिसंज्ञा एव निर्दिश्यन्ते, न पुनर्लक्षणादीनि ।

३.७.८० ——— ——— ——— ——— अलंकारकल्पन-

स. ८.१९,२०

मुक्ताप्रलम्बपुष्पैर्वा वल्लीपत्रैर्विशेषतः ॥

पादानां कल्पयेद्भूषां परिमाणेन तत्त्ववित् ।

ज्ञा. ३२.६२

३.७.८१ ——— ——— ——— प्रस्तर-

वि. ९.४०

प्रस्तरोत्सेधमेकविंशतिभागं कृत्वा त्र्यंशमुत्तरम् एकांशं वाजनं त्र्यंशं वलभिः वाजनमेकांशं सप्तांशं कपोतम् आलिङ्गान्तरितावेकैकांशौ । प्रत्युत्सेधमेकांशं वाजनं स्यात् । उत्तरोच्चार्धं त्रिचतुर्भागं वा निर्गमं वसन्तकस्य तत्समं पादोनमर्धं वा कपोतस्य समत्रिपादमर्धं वा दण्डं सार्धदण्डं द्विदण्डं वा निर्गमम् अर्धदण्डेन लम्बनं वेति केचित् । प्रत्यालिङ्गयोर्मानसूत्रसमवेतान्तरितं वाजनयोरुत्सेधं समाननिर्गमं स्यात् । दण्डं सार्धदण्डं कपोतोत्सेधं वा नासिकातुङ्गतारं तत्त्रिभागैकेन नावगाढयुतं तुङ्गार्धं वाजनान्तं वा शिखरोत्सेधं सिंहवक्त्रवत् कारयेत् ।

य. ८. ३२-६

प्र. ५. ६४-९

- - - - - - - -प्रस्तरं चोत्तरादिकम् ।
विष्कम्भं पादविस्तारम् उत्सेधं त्रिविधं भवेत् ॥

उत्तमं तु समोत्सेधं त्रिपादं मध्यमं भवेत् ।
अधमं चार्धमुत्सेधम् उत्तमं स्याद्विधानतः ॥

स्तम्भाग्रैकत्रिभागैकं तस्योर्ध्वे पट्टिका भवेत् ।
तत्समं निर्गमं प्रोक्तं पट्टिकालक्षणं त्विदम् ॥

द्विभागेन तदूर्ध्वे तु कर्तव्यं पद्मपट्टिकम् ।
द्विदण्डं तु कपोतं स्यात् उपानसमनिर्गमम् ॥

शेषं प्रस्तारमानं तु कर्तव्यं पञ्चभागिकम् ।
एकेन पट्टिकां कुर्यात् कण्ठमेकेन कारयेत् ॥

द्वाभ्यां तदूर्ध्वे कर्तव्यम् एकांशेन तु पट्टिकाम् ।
एवं प्रस्तारमाख्यातं- - - - - - - - - ॥

३.७.८२ ——— ——— ——— ग्रीवा-

वि. ९. ४०,१

तदुत्सेधं त्रिचतुष्पञ्चभागं कृत्वैकांशं वेदिको(दयं)त्सेधं ग्रीवारूपवशेन चतुरश्रामष्टाश्रां वृत्तां वा पूर्ववद्वेदिकां कारयेत् । वृत्तग्रीवायामप्यष्टाश्रां वेति केचित् । कण्ठार्धेन कोणेषु व्यतीत्य येन मान(?) मानयित्वा तयोर्मध्यं मध्यवर्गं स्यात् । एवं समचतुरश्रेऽप्यष्टाश्रा कर्तव्या गलोदये वेद्यशेषितांशं द्वादशभागम् अष्टांशं ग्रीवातुङ्गं सार्धांशमुत्तरार्धांशं वाजनं सार्धांशं हंसं वाजनमर्धांशं स्यात् ।

अथवा षोडशभागं कृत्वा अष्टांशं गलोदयं शेषांशैरुत्तरादीन् कुर्यात् । तेषां निर्गमं पूर्ववत् । एताः शिखरे संयोजयेदिति केचित् । मानसूत्रात् षट्सप्तांशैरहीनं वेदिविस्तारं तस्मात्तथैव कण्ठ(र्ण)विस्तारम् अथवा तयोर्वेद्युत्सेधमानेन प्रवेशं कारयेत् ।

य. ८. ३६,७

वृतेस्तताष्टभागं च एकोनं वेदिकोदयम् ॥

तं वेदभागं कृत्वां तु ग्रीवाविस्तारमुच्यते ।
स्कन्धकोच्चं त्रिभागैकं वेदिकोदयमिष्यते ॥

प्र. ९. १०,८१

[अत्र शिखरोर्ध्वे कण्ठं कुर्यादित्येव निर्दिश्यते इति विशेषः ।]

३.७.८३ ——— ——— ——— शिखर-

वि. ९.४१,२

हंसवाजनात् बहिरर्धदण्डं दण्डं सार्धदण्डं द्विदण्डं वा शिखरस्यौष्ठविपुलं हंसवाजनषोडशांशैकहीनं मध्यविपुलं हंसवाजनसदृशमुदरविपुलं तथैवेति केचित्। अथवा वेदिविस्तारसदृशमोष्ठविपुलं तदष्टांशैकहीनं मध्यविपुलं तच्चतुर्विंशतिभागैकहीनमुदरविपुलं स्यात् । तत्पञ्चभागा(त्) त्र्यंशं बलिकस्याधारपट्टिका तत्पञ्चांशाद्युगांशमूर्ध्वपट्टिका तस्मात्तथैव पद्मतारं तच्चतुर्भागैकं कण्ठिकातारं शिखरोत्सेधार्धमुदरं तस्मात् कर्णि(ण्ठि)कान्तं क्रमात् संक्षिप्य(प्तं) त्र्यङ्गुलं चतुरङ्गुलं वा बलिकमण्डलविस्तारं तदर्धमुत्सेधम् अर्धदण्डं त्रिपाददण्डं पद्मतुङ्गम् अर्धदण्डं कण्ठिकोत्सेधम् अथवा पद्मादूर्ध्वं स्थूप्या संयोजयेत् इति केचित्। शिखरोत्सेधमष्टभागं कृत्वा तच्चतुष्पञ्चषडंशावसाने मूर्धेष्टकां स्थापयेत् नासिकाग्रे नासिकण्ठे(कर्णे) वा कारयेदिति केचित् ।

ज्ञा. ३१.६०,१

तासां[*] पावकवर्णस्वराग्निनयनमाहरेत् । त्रयोदशदशाष्टपञ्चलोकोदधिपङ्क्तिवसवः आनुपूर्व्यात् स्तम्भविष्कम्भोत्सेधात् षोडशांशः ललाटे जघने पादार्धे पादाङ्घ्रिजानुनी कर्णांशे द्व्यंशं कुर्यात् । वा (?) ललाटकुठारिजातावच्छित्तिः-ध्वजावदेवं(?) तद्युक्त्या कारयेदिति विज्ञायते ।

---

[*] चतुरश्रादिशिखरक्रियाणाम् ।

प्र. ५. ७८,९

ततः कण्ठार्धमानेन शिखरं वर्धयेत् ततः ।
कण्ठात् द्विदण्डमित्युक्तं शिखरस्य तु निर्गमम् ॥

निर्गमाद्वर्तनाद्बाह्ये वर्धनं तु तदर्धकम् ।

य. ८. ३८-४५

अश्रमष्टाश्रकं वाथ मिश्रं वा कर्तुरिच्छया ।
विशालं शिखरोच्चस्य वेदिविस्तारतुल्यकम् ॥

अष्टांशोनं तु तन्मध्यं तदूर्ध्वविपुलं क्रमात् ।
षोडशांशैकहीनं तद्वेदिविस्तारमानतः ॥

क्रमात्कृशं यथाशोभं कारयेच्छिखरं बुधः ।
ओष्ठस्य पञ्चभागान्तं त्र्यंशं वा पालिकायतम् ॥

पालिका पञ्चभागात्तद्विकाशं पद्मविस्तृतम् ।
दलाष्टकसमायुक्तं दण्डमग्रे दलोच्छ्रयम् ॥

शिखरस्य करणं तुङ्गं शेषं युक्त्याथ कारयेत् ।
शिखरस्य त्रिभागैकं महानासी विशालता (तः) ॥

समं त्रिपादमर्धं वा नासिकानिर्गमं बुधाः ।
व्यासात् तत्र चतुर्भागं स्कन्धान्तं तुङ्गमेव च ॥

शक्तिध्वजं तदुच्चोर्ध्वं त्रिपादं वाथ कारयेत् ।
शक्तिध्वजस्य पृष्ठे तु चक्रं कृत्वाऽयसेन च ॥

स्थापयेत् सुदृढं धीमान् सर्वमङ्गलकारणात् ।

३.७.८४ —— —— —— —— चतुर्विध-अष्टाश्रादि-

स. ९. ५,६

अतःपरं प्रवक्ष्यामि शिखराणां क्रियाविधिम् ।
शिरश्चतुर्विधं प्रोक्तं ब्रह्मणा परमेष्ठिना ॥

अष्टाश्रं चतुरश्रं च शाला मण्डलमेव च ।

ज्ञा. ३१.६०

[अत्र शालामण्डलयोः स्थाने समवृत्तायामयोः निर्देश इति विशेषः ।]

३.७.८५ —— —— —— —— मण्डल-द्विविध-छत्रोपमानादि·

स. ९.६

मण्डलं द्विविधं ज्ञेयं छत्रबिन्दूपमानतः ॥

३.७.८६ —— —— —— —— कूटशाला-

प्र. ५. ७६,७

कूटस्य लक्षणं प्रोक्तं कूटशालं विधीयते ।
कृत्वा प्रासादषड्भागम् एकभागं विधीयते ॥

भागेन कूटशालं स्यात् भागार्धं पञ्चमं भवेत् ।
चतुर्गुणं भवेत् कूटं शाला स्याद्गोपुराकृतिः ॥

३.७.८७ —— —— —— —— फलका-

प्र. ५.८१

- - - - - - - - - -फलका च तदूर्ध्वतः* ॥

३.७.८८ —— —— —— —— नासिकाकल्पन-

वि. ९.४२

---

* कण्ठोर्ध्वतः ।

शिखरव्यासात् त्रिचतुःपञ्चभागैकं नासिकाविस्तारं तत्समं त्रिपादं त्रिपादाद्द्विभागं वायामं ग्रीवानासिक(कायाम)निर्गमं दण्डं सार्धदण्डं द्विदण्डं वा गाढप्रवेशविस्तारस्य त्रिचतुष्पञ्चभागैकहीनं ग्रीवोपरि नासिकोत्सेधं तत्त्रिभागैकहीनं दण्डं हीनदण्डवशयुतं गाढशेषं नानाविचित्रितवक्रपट्टियुतं तदर्धं त्रिपादं वा शिखरोच्चं तत्त्रिभागैकं कण्ठद्व्यंशेन सिंहवन्मुखं कुर्यात्।

प्र. ५.७३-५,८

- - - - - - - नासिकायास्तु लक्षणम् ।
वक्ष्यते तु प्रमाणेन यथाशास्त्रविनिश्चितम् ॥

गर्भगेहार्धविस्तारं महानासीति कीर्त्यते ।
निर्गमं तु तदर्धं स्यात् त्रिपादं सममेव वा ॥

शिखरेषु चतुर्दिक्षु कुर्यादेकां तु नासिकाम् ।
विस्तारं तु तदर्धं स्यात् कपोतेष्वष्टनासिकाः ॥
- - - - - - - - - - - - - - - - - ॥

शालाविस्तारमानेन पार्श्वयोर्नासिका भवेत् ।
एकनासिकया युक्तं पञ्जरं समुदाहृतम् ॥

३.७.८९ ——— ——— ——— ——— **महानासीकल्पनं-**

ज्ञा. ३२.६२

महानासीशिखाग्रेषु ताम्रेण आयसेन वा त्रिशूलान् कृत्वा स्थापयेत् । तासु पद्मदलानि लतावृतानि च कृत्वा तन्मध्ये कोणे च स्तम्बकर्कादीनि नीव्रे व्यालरूपं गन्धर्वोद्वहनं, इन्द्रनीलादिकूटेषु नासिकास्वन्तःपादं बहिःपादं कूटपीठमहानीव्रे भूतान् हंसान् विद्याधरान् क्रीडारससमन्वितान् नानाविभ्रमसंयुक्तान् प्रादक्षिण्यवशेन कारयेत् । जातरूपरूप्यशुल्वान्यतमेन शिखराणि सर्वरत्नोज्ज्वलरूपाणि कारयेदिति केचिदृषयो वदन्ति ।

३.७.९० ——— ——— ——— स्थूपि-

वि. ९.४२,३

पद्मस्य त्रिभागैकं कुम्भतारं त्रिभागैकं नालं तत्त्रिगुणं पालिः तत्त्रिभागैकं मुकुलं स्यात् । अथवा द्वाविंशतिभागं कृत्वा चतुरंशं पद्मम् एकांशं कण्ठि(र्णि)कोत्सेधं पञ्चांशं कुम्भोत्तुङ्गं सप्तांशं नालं सार्धांशा पाली त्र्यर्धांशं मुकुलं स्यात् । - - - - - - - - - - - - - - - - -

तेषां विमाननिर्देशाङ्गुलिना पादाङ्गुलमर्धाङ्गुलं त्रिपादाङ्गुलमेकाङ्गुलमर्धाधिकाङ्गुलं द्व्यङ्गुलं त्र्यङ्गुलं वा दण्डेनैकं त्रिपादं वाङ्गं प्रति हीनाधिक्यं न दोषाय भवति । विस्तारोत्सेधायामहस्तेषु पादमर्धं त्रिपादं हस्तं वा वृद्धिं हानिं यथोचितमाहरेत् ।

अ. ७

अङ्कुरार्पणकादूर्ध्वं द्रव्याण्यपि समाहरेत् ।
पूर्वं खादिरमाहृत्य सारयुक्तमनिन्दितम् ॥

विष्कम्भस्यार्धमायामं त्रिपादं सममेव वा ।
विमानस्य तथा राजार्हमर्हं सुसंहरेत् ॥

आयामात् तु चतुर्भागं नाहं मूले प्रकीर्तितम् ।
तस्या नाहं चतुर्भागं नाहमग्रे प्रकीर्तितम् ॥

मूलादग्रं क्रमान्न्यूनं निम्नं सुषिरवर्जितम् ।
यथासौन्दर्यकं कृत्वा यथाविधि यथाशुभम् ॥

स्थूपिमेवं च संगृह्य - - - - - - - -।

प्र. ५. ८०-१

स्थूपिं कुम्भसमायुक्तं कुर्याद्दण्डं विधानतः ॥

विस्तारं तत्प्रमाणेन शिखरं तत्र चोच्यते ।

य. ८. ४५-८

पद्मस्य च त्रिभागैकं कुम्भतारः प्रशस्यते ॥

कुम्भतारत्रिभागैकं कुम्भोपरि सकन्दरम् ।
त्रिगुणं पालिका तत्र रेणुकं मुकुलं तथा ॥

स्थूपितुङ्गं पुनर्धीमान् मनुभागं विभज्य च ।
एकांशं तद्दलग्नं स्यात् तुर्यांशं कुम्भमेव च ॥

भूतांशं कन्धरं प्रोक्तमेकांशं पालिका बुधः ।
त्रियंशमुकुलं प्रोक्तं कारयेद्धाटकादिना ॥

३.७.९१ ——— ——— ——— ——— उपादानद्रव्य-

वि. ९.४२; १३.६४

एवं स्वर्णेन रजतेन ताम्रेण वा कृत्वा संयोजयेत्* । अशक्तश्चेत् सुधया कृत्वा अग्रे चायसा सूचिं संयोजयेत् । सर्वेषां स्थूपिं लोहभाजनमेव कारयेत् इत्येके ।

अ.७

[अत्र खदिरवृक्षः स्थूप्युपादानद्रव्यत्वेन निर्दिश्यते इति विशेषः ।]

३.७.९२ ——— ——— ——— ——— स्थूपिकीलकल्पन-

वि. १३.६४

शिखराग्रे नासिकापृष्ठे नासिकाग्रान्ते वा ताम्रजं खादिरं बेरोक्तवृक्षजं वाहृत्य एकतलप्रासादे बहुतले वा मूलतले वा पादविष्कम्भाद् द्वादशाष्टसप्त-

---

* उत्तमादीनां त्रयाणामपि विमानानाम् ।

षड्गुणं वा कीलदैर्घ्यं तत्पादविष्कम्भात् त्रिभागैकभागमर्धं वा विस्तारं तत्षडंशैकांशं स्थूपिकाग्रविस्तारं तस्यायामं सप्तधा कृत्वा त्रिभागमूले चतुरश्रं शेषं सुवृत्तं शिखराकारं वा कारयेत् । अथवा तदूर्ध्वतलपादयामसदृशं तत्पादविष्कम्भविस्तारम् अग्रमेकाङ्गुलमालये तन्मध्ये सुषिरं समचतुरश्रं कृत्वा कीलादधस्तात् सशिखं युक्तितः कारयेत् ।

३.७.९३ —— —— —— —— स्थूपिकीलप्रतिष्ठा-

वि. १३.६५

तन्मध्ये* रत्नं सुवर्णं वा यथाशक्ति विन्यस्य सुधामालिप्य मेदिनीमन्त्रेण मयूराङ्घ्रिं विन्यस्य तस्योर्ध्वे सुषिरे विष्णुसूक्तेन स्थूपिकीलं प्रतिष्ठापयेत्। पश्चाच्छिल्पिनमाहूय सुदृढं कृत्वा शिखरं समाप्य तस्मिन् प्रागादिचतुर्दिक्षु न्यक्षादीनावाह्याभ्यर्च्य शेषांशं विधिना कारयित्वा शक्तश्चेत् ताम्रजं राजतं सौवर्णं वा कृत्वा तस्याधस्तात् सुधावर्णानुलेपं च कारयेत् ।

३.७.९४ —— —— —— —— दिग्देवतादिकल्पन-

ज्ञा. ३२.६१,२

स्थूपिशूलं ताम्रेण दारुणा वा कल्पयित्वा प्रोक्षणैः प्रोक्ष्य सुदृढं संस्थाप्य कनिष्ठाग्रप्रमाणं स्थूप्यग्रं पद्ममुकुलाकारमधस्तात् पद्मपुष्पाभं तदुपरि कुम्भरूपं वृत्तं चतुरश्रमष्टाश्रं षोडशाश्रं वा कृत्वा तस्योपरि इलाकृत्यूर्ध्वदीपशिलारूपशिखायुक्तं महानासिकातः किंपुरुषमुखसंयुक्तं दिशासु दिग्देवताः इन्द्रं रुद्रं महाविष्णुं ब्रह्माणं वा सुधया कारयेत् ।

३.७.९५ —— —— विमानाच्छादनद्रव्य-

वि. १३.६३,५

---

* मूर्धेष्टकामध्य ।

शक्तश्चेत् [*]तदेव ताम्ररजतरुक्मैराच्छादयेत् एतदुत्तमं भवति ।

३.७.९६ —— —— विमान-मानुष-तलसंख्यन-

नि. ९

अथातः संप्रवक्ष्यामि तलविन्यासलक्षणम् ।
एकभूमिं समारभ्य आद्याद्वादशके तले ॥

यथाक्रमेण यत्प्रोक्तं तस्मिन्नेव विशेषतः ।
द्वादशं तलमुद्दिश्य यदुक्तं तलमानुषम् ॥

अशक्तौ भूतले कर्तुः देवसर्गे विधीयते ।
आसप्ततलकादूर्ध्वं भूतले नात्र संशयः ॥

द्विरकाल(?) मशक्यत्वा यष्टापं चैव यत्नतः ।
युगं युगान्तरं ज्ञात्वा बालालयमवेक्ष्य च ॥

३.७.९७ —— —— —— तलभेदेन मानभेद-

वि. ७.२८

नलिनकादिषण्णवतिभेदैस्त्रिचतुर्हस्तादिरुद्रार्ककरान्तमेकभूमिं पञ्चषड्ढस्तादि त्रयोदशचर्तुर्दशकरान्तं द्विभूमिं सप्ताष्टकरादि पक्षषोडशकरान्तं त्रितलं सप्तदशहस्तादि षट्शतकरान्तं चतुर्भूम्यादिद्वादशतलान्तं युग्मायुग्महस्तैर्युतं संयोजयेत् । एवं तलं प्रति मानं दशधा भवति ।

३.७.९८ —— —— —— संकीर्ण-मानानुरोधेन

वि. ७.२८

---

[*] शिखरमेव !

*एतेषु इष्टहस्तैर्व्यासायामं समं चतुरश्रं वृत्तं विस्तारात् पादाधिकमर्धाधिकं पादोनद्विगुणं द्विगुणं वा आयतम् आयतचतुरश्रवृत्तं तेषु ग्रीवोपरि भिन्नाङ्गं संकीर्णं स्यात् ।

३.७.९९ —— —— मुखमण्डप-सोपानकल्पन-

खि. ७. ३०-२

मुखमण्डपपूर्वे तु सोपानानि च कारयेत् ।
आयामं पुरतश्चैव चतुर्भागं विभज्य च ॥

एकभागं तु सोपानमुन्नतं हस्तमुच्यते ।
पादांश्च चतुरः कुर्याद्दक्षिणोत्तरयोः क्रमात् ॥

पञ्चभिर्वा चतुर्भिर्वा त्रिभिर्वापि पदं चरेत् ।
सिंहपादेन संयुक्तं सोपानं सम्यगाचरेत् ॥

स. ९.१४

पश्चिमाद् द्विगुणं प्राच्या मुखमण्डपपूर्वतः ।
प्रमुखे तत्र सोपानमालयार्धमिति स्मृतम् ॥

ज्ञा. ३१.६०

बालवृद्धसुखारोहणार्थं समखण्डानि शयनानि पादार्धत्रिपादसमस्थितानि सोपानानि भवन्ति ।

क्रि. ४.८५

सोपानं प्रथमे कुर्यात् मण्डपार्धप्रमाणतः ।

---

* तलमानेषु ।

३.७.१०० ——— ——— ——— **मान-**

स. ७.६

❁तस्यार्धं पादहीनं वा समं वा मुखमण्डपम् ॥

खि. ७.२९

य. ८.४९

प्र. ५. २१,२

अग्रतो मण्डपं कुर्यात् प्रासादसमविस्तृतम् ॥

प्रासादस्य समायामं दशांशं मुखमण्डपम् ।

३.७.१०१ ——— ——— **मुखमण्डपकल्पन-**

य. ८. ४९-५४

मण्डपं समसूत्रं चेदन्तरालं तु वेश्मकम् ॥

अन्तरालस्य विस्तारं सार्धहस्तं द्विहस्तकम् ।
त्रिहस्तं वापि कर्तव्यं सर्वस्मिन् धाम्नि कीर्तितम् ॥

दण्डं वा सार्धदण्डं वा द्विदण्डं वा त्रिदण्डकम् ।
हर्म्यमण्डपयोरन्तर्वेश्म स्यात् तद्विचक्षणः ॥

अन्तरालस्य मध्ये तु कुड्यकुम्भलतान्वितम् ।
स्तम्भतोरणकं वापि स्तम्भपञ्जरमेव वा ॥

स्तम्भसौष्ठिकमेवं वा तोरणं वाभिधीयते ।
विमानं मध्यमार्गं चेन्मानसूत्राद्बहिर्बुधः ॥

दण्डं वा सार्धदण्डं वा त्रिदण्डं वाथ निर्गमम् ।

❁ विमानस्य।

३.७.१०२ ——— ——— मुखमण्डप-उत्तमादि-विस्तारानुरोधेन

क्रि. ३. ४४-६

विमानसमविस्तारमग्रमण्डपमुत्तमम् ॥

तदर्धं मध्यमं प्रोक्तं द्व्यन्तरेऽष्टांशभाजिते ।
एकैकांशाधिकं चैव नवधा मुखमण्डपम् ॥

त्रयाणामुत्तमादीनामन्तरालं प्रकल्पयेत् ।
मण्डपं तत्र वर्गाढ्यं कल्पयित्वा यथाविधि ॥

३.७.१०३ ——— ——— ——— देवताकल्पन-

वि. ९. ४४

मुखमण्डपदक्षिणे बाह्ये विघ्नेशम् उत्तरे विन्ध्यवासिनीम् आग्नेयादिकोणेषु प्रस्तरोपरि गलस्थाने वाहनं मृगेशं खगेशं वा अन्यस्मिन् सर्वत्र देवस्य विजयक्रीडनादीन्येव कारयेदित्याह मरीचिः ।

३.७.१०४ ——— ——— मुखमण्डपभित्तिः ———

प्र. ६.१९

वक्रतुण्डं च दुर्गां चाप्यग्रमण्डप*भित्तिषु ।
स्थितमेवं सुसंस्थाप्य यथालाभं समर्चयेत् ॥

३.७.१०५ ——— ——— अर्धमण्डपकल्पन-

वि. ९.३५

---

* अग्रमण्डपपदं मुखमण्डपपरम् ।

अथवा मुखमण्टपं कृत्वा तत्प्रमुखे तदायामेन पादाधिकमर्धाधिकं त्रिपादाधिकं द्विगुणं वा विस्तारं विमानात् पादार्धत्रिपादाधिकविस्तारायामयुतमर्धमण्डपं कुर्यात् । एतन्मध्ये भद्रतोरणाद्यैर्युक्तमयुक्तं वा त्रिवर्गाढ्यं कुर्यात् ।

३.७.१०६ —— —— स्नपनमण्डपकल्पन-

क्रि. ४.९०

चतुःसोपानसंयुक्तं कुर्यात् स्नपनमण्डपम् ।
प्राक्सोपाने कुम्भपूजां विदध्यात्
याम्ये होमं वारुणे तैलकर्म ।
कृत्वोदीच्यां तैलमोक्षं विधिज्ञः
श्वभ्रे मध्ये स्थापयेत् स्नापयेच्च ॥

३.७.१०७ —— —— गर्भगृहकल्पन-पदकल्पनपूर्वक-

प्र. ५. १४-६

प्राङ्मुखोदङ्मुखैः सूत्रैः पदं कुर्यात् तु षोडशम् ॥

गर्भगेहः समाख्यातः मध्यमं तु चतुष्पदम् ।
बाह्यतो द्वादशपदं भित्त्यर्थमुपकल्पयेत् ॥

षड्भिः षड्भिस्तथा सूत्रैः पदानां पञ्चविंशतिः ।
नवगर्भगृहं मध्ये भित्त्यर्थं शेषमुच्यते ॥

३.७.१०८ —— —— गर्भगृहमान-

स. ७.७

चतुर्भागैकभागं वा पञ्चभागैकमेव वा ।
भित्तिमूलघनं प्रोक्तं मध्ये गर्भालयं विदुः ॥

क्रि. ४.१२

पञ्चहस्तादिभेदैस्तु बालगेहस्वरूपकम् ।
विमानं परिकल्प्यैव सर्वालंकारमर्पयेत् ॥

सप्तांशेष्वंशिते तारे रसबाणयुगाधिकम् ।
द्विगुणं द्विगुणादूर्ध्वे वसुबाणक्रमेण च ॥

(सप्तषट्पञ्चवेदाग्निभागे त्वंशाधिकं तु वा ।)

प्र. ५.२०

पीठस्य त्रिगुणं गर्भं - - - -।

य. ८.४

चतुर्भागं(गे?) द्विभागं वा पञ्चभागं(गे?) त्रिभागकम् ।
गर्भगेहस्य विस्तारं द्विविधं मानमुच्यते ॥

३.७.१०९ —— —— गर्भगृहभित्तिमान-

प्र. ५. २०,१

- - - - - - - - - -गर्भार्धं भित्तिरुच्यते ॥

गर्भगेहत्रिभागैकं भित्तिं वा तत्र कारयेत् ।

३.७.११० —— —— एकतलविमान-गर्भगृहमान-

क्रि. ४.४६-८

विस्तारं पादबाह्यं स्यात् खुरा स्थूप्यन्तमुन्नतम् ।
अग्निभागैकभागं वा भूतभागेऽग्निभागकम् ॥

युगांशं ऋषिभागे तु पञ्चांशं वा नवांशके ।
ऋत्वंशं रुद्रभागे तु वस्वंशं षोडशांशके ॥

नवांशं सप्तपङ्क्त्यंशे व्यासार्धं गर्भगेहकम् ।
शेषं कुड्यविशालं स्यात् एकभूमिविमानके ॥

३.७.१११ —— —— द्वितलविमान- ——

क्रि. ४.४९-५१

नवांशे धामविस्तारे हारं चैकांशकेन तु ।
हारान्तरं तथैकांशम् एकांशं भित्तिविस्तरः ॥

त्र्यंशकं गर्भगेहं स्यात् मन्दिरेषु द्विभूमिके ।
विस्तारे रसभागे तु सोमांशं कूटविस्तरम् ॥

शालान्तरं तु द्व्यंशं स्यात् शेषं पञ्जरहारके ।
एवं द्वितलविन्यासम् - - - - - - - -॥

३.७.११२ —— —— त्रितलविमान- ——

क्रि. ४. ५१-७

- - - - - -त्रितलं शृणु तत् पृथक् ॥

रुद्रभागेंशकं हारं तारहारान्तरं तथा ।
कुड्यस्य सममेकांशं शेषं गर्भगृहं भवेत् ॥

आदिभूमिघनं केचिदिच्छन्ति मुनिसत्तमाः ।
तारेऽष्टांशे कर्णकूटं शिवांशं शालमुच्यते ॥

सपञ्जरं सार्धभागं शेषं हारं तथैव च ।
तदूर्ध्वं नासिकोष्ठं च नीडं वा पञ्जरस्य च ॥

ऊर्ध्वभूमौ रसांशे तु कूटमेकांशकं भवेत् ।
द्व्यंशं कोष्ठं शिवं नीडं शेषं हारान्तरं भवेत् ॥

ऊर्ध्वभूम्यग्निभागे तु मध्ये भद्रं शिवांशकम् ।
एवं त्रितलविन्यासम् उक्तमुद्देशमानतः ॥

वासाधिकारे यत्प्रोक्तमनुक्तं शिल्पशास्त्रतः ।

३.७.११३ ——— ——— एकतलविमान-गर्भगृहकल्पन-

वि. ९.३४-८

विमानविस्तारं त्रिचतुःपञ्चसप्तनवैकादशभागं कृत्वा यथाक्रमेण एकद्वित्रिचतुःपञ्चषडंशं गर्भगृहविस्तारं स्यात् । विमानविस्ताररसमं त्रिपादमर्धं वा मुखमण्टपं तद्व्यन्तरं त्रयोदशभागं कृत्वा तदेकां(केकां)शाधिके(ना)यामं सप्तविंशतिभेदं स्यात् । त्रित्रिसंख्याभिश्चोत्तममध्यमाधमभेदैर्नवधा भवति । उत्तमानां विपुलं विमानविस्तररसमं सान्तरालं तस्य वेशनं द्विदण्डं दण्डार्धं दण्डमर्धं पादं वा तदायामं हस्तेन पादमर्धं त्रिपादमेकहस्तादिसपादपञ्चहस्तान्तं सभित्तिकं द्वारं जालकं वा कुर्यात् । मध्ये नीचानामन्तरालं विनैकदण्डान्तं पाददण्डविवृद्ध्या नवभेदैः प्रवेशं कारयेत् । अन्येषां सर्वेषामन्तरा विना एतैः निर्गमं कारयेत् । -

एतद्विमानस्य प्रमुखं विना पार्श्वत्रय(ये) मध्यभद्रविमानविपुला त्रिभागैकं चतुर्भागं पञ्चभागं त्रिभागं वा तन्निर्गमदण्डमध्यर्धं द्विदण्डं वा (मध्यं द्विदण्डमध्यर्धद्विदण्डत्रिदण्डं वा) पादं तस्यावसाने कुर्यात् । तोरणानामुत्सेधं स्थलादुपरि उत्तराधस्तात् द्विचतुर्भागात् त्रिभागं त्रिभागात् द्विभागं वा तोरणपादोत्सेधमर्धं त्रिभागैकम् अथवा दण्डेन त्रिचतुष्पञ्चदण्डविस्तारं तस्य पादबाह्यं तत्पादवशेन तदङ्गानि मानयेत् । तोरणान्तरगाढप्रवेशनं दण्डं त्रिपादमर्धं पादं वा शेषं झषोत्सेधमुत्तरान्तं पञ्चवक्रैर्युक्तं पार्श्वयोर्मकरस्य मध्ये पूरितं गाढयुक्तं नानालतापत्रजातिविचित्रितं सर्वालङ्कारैर्यथाशोभं युक्त्या

कारयेत् । विमानस्याधिष्ठानादुपर्युत्तरान्तं पादतुङ्गं तत्र रसमुनिवसुनवदशभागं कृत्वा तदेकांशवेदिकोत्सेधं तत्तुङ्गं चतुर्धा कृत्वा अर्धांशं कम्पं द्व्यंशं कण्ठं कर्णम् अर्धांशं कम्पं पद्ममर्धांशं कम्पमेवम् एव प्रत्यङ्गेषु योजयेत् ।

अथवा रसांशं कृत्वा एकांशं कम्पं द्व्यंशं कण्ठं (कर्णं) शेषमुपरिबन्धं स्यात् । पट्टिकांशेषु तुङ्गार्धं गलं शेषं त्रिधा कृत्वा उपरिबन्धं पूर्ववत् कारयेत् । अथवा चतुर्धा कृत्वा एकांशेन गलादधस्तात् कम्पं कारयेदिति केचित् । पादोत्सेधं सप्ताष्टनवदशभागं कृत्वा एकांशं पादविपुलम् अथवा अधिष्ठानोच्चं त्रिचतुष्पञ्चभागं कृत्वा एकांशं विमाननिर्देशहस्ताङ्गुलिभिः (र्वा) पादविष्कम्भं स्यात् चतुष्पञ्चषडंशं कृत्वा एकांशहीनं भित्तिपादविपुलं तत्र रसमुनिवसुनन्द(या)धा विभज्य एकांशोनमग्रविस्तारं तद्दण्डसंज्ञं तेन सर्वाङ्गप्रमाणनिर्णयकारणं स्यात् । पादाश्चतुरश्रा अष्टाश्रा षोडशाश्रा वृत्ता इति मिश्रममिश्रं वा कारयेत् । समयुग्मं श्रेष्ठं विषमयुग्मं निषिद्धम् । एकत्रिपञ्चसप्तनन्दभक्तिवशेन संयोजयति । पादमूले अर्धदण्डेन पद्मं तदुपरि (कर्णे) कण्ठे(न) चतुरश्रं शेषमष्टाश्रं षोडशाश्रं वृत्तं वा भित्तिपादम् पादात्पादान्तरं भित्तिप्रवेशं पाददण्डं स्यात् । दारुशिलास्तम्भेषु मूलेऽर्धदण्डेन पद्मम् तदुपरि कण्ठे(कर्णे)न चतुरश्रं शेषमष्टाश्रं षोडशाश्रं वृत्तं वा भित्तिपादं पादात् पादान्तरं भित्तिप्रवेशं पाददण्डं स्यात् । दारुशिलास्तम्भेषु मूलमध्याग्रेषु चतुरश्रम् अष्टाश्रं षोडशाश्रं. वृत्तं वा सर्वत्र सर्वैः समानं नयेत् । पद्मोपरि सिंहेभव्यालभूतनागादि कल्पयेदिति केचित् ।

पादाग्रे बोधिकावीरकाण्डफलकानामेकैकदण्डमुत्सेधं त्रिपाददण्डं वा फलकायाः पादोनं कुम्भोच्चं तत्समं बोधिकोच्चं वेति केचित् । फलकोत्सेधार्धं तादितुङ्गं ध्वजोत्तुङ्गं तदर्धं पाददण्डं वा । ताद्यधस्तात् एकदण्डेन मालास्थानं वीरकाण्डानां विपुलं पादविपुलमेव पादस्य क(र्णे)ण्ठेन पादात् क्रमेण ताद्यूर्ध्वभागं विस्तारं तत्कर्णेन कुम्भविस्तारं तत्कण्ठेन फलकाविस्तारं तत्समं पादाधिकं वा बोधिकाविस्तारं नानाचित्रितरङ्गादीनि कारयेत् । फलकोत्सेधं त्रिचतुर्भागं कृत्वा एकांशेन वेत्रं अधस्तात् पद्मं शेषं युक्त्या

कारयेत् । अथवा फलककुम्भताटीनामुत्सेधं तत्तद्विस्तारत्रिभागैकभागेन कारयेदित्येके ।

३.७.११४ ——— ——— विमानविस्तार-

ज्ञा. ३१.५९

द्वात्रिंशत् पञ्चविंशोत्सेधं(धात्?) वा द्वादशैकादशदशनवाष्टसप्तांशं वा विस्तारम् ।

क्रि. ३.१६

पञ्चहस्तादहीनं तु विमानं परिकल्पयेत् ॥

३.७.११५ ——— ——— एकतलविमानविस्तार-

य. ८. १,२

अत ऊर्ध्वं विमानानि विश्वानि कथितानि च ।
वासाधिकारे चाद्यापि एकभूमिः प्रवक्ष्यते ॥

अग्निहस्तं समारभ्य द्विद्विहस्तविवर्धनात् ।
चतुर्धा नवहस्तान्तमेकभूमिर्विशेषतः ॥

३.७.११६ ——— ——— नलिनकादिविमानविस्तार-

खि. ४.४५,६

नलिनकादिविमानेषु यजमानेच्छया गुरुः ॥

पञ्चहस्तं समारभ्य यथाशक्ति समाचरेत् ।
द्वितलं त्रितलं वापि कारयेत् तु विधानतः ॥

३.७.११७ ——— ——— आद्वादशतलविमानविस्तार-

प्र. ५. ९-१२

त्रिहस्तादि समारभ्य नवहस्तान्तमेव च ॥

अयुग्मैरथ हस्तैस्तु कुर्यादेकतलं बुधः ।
द्वितलं तु ततः कुर्यात् स[illegible]ोदशहस्तकैः ॥

पञ्चाधिकदशैर्हस्तैः प्रासादः स्यात् त्रिभूमिकः ।
तलं प्रत्यधिकं कुर्यात् षड्ढस्तं तु विशेषतः ॥

आद्वादशतलादेवं कुर्यात् विस्तारमानकम् ।

३.७.११८ ——— ——— अष्टादशतलपर्यन्तविमानविस्तार-

निं. ८

अग्निहस्तादिमारभ्य हस्तं पञ्चदशान्तकम् ।
वर्धयेदश्विहस्तेन सप्तधा चाल्पमुच्यते ॥

अग्निभूतान्तवद्धर्मकरमेकतलं विदुः ।
भूताब्धिनन्दरुद्रं च त्रयोदशक्रमं बुधाः ॥

द्वितलं कल्पयेत् तत्र त्रितलं दशहस्तके ।
नन्दहस्तमथारभ्य नवत्रिंशत्करान्तकम् ॥

वर्धयेत् पूर्ववद्विद्वान् अन्तरः षोडशः स्मृतः ।
द्वितलं तु समारभ्य षट्तलं तु क्रमात् पुनः ॥

एकविंशत् समारभ्य नवत्रिंशत्करान्तकम् ।
द्वौ द्वौ भूमौ क्रमेणैव सप्ताष्टनवकं दशम् ॥

अष्टादशतलं तत्र योजयेदन्तरं बुधः ।
हस्तं पञ्चदश प्रोक्तम् एकविंशतिकं तथा ॥

सप्तविंशत् त्रयस्त्रिंशत् नवत्रिंशत् तथैव च ।
पञ्चोत्तरं चत्वारिंशत् एकपञ्चाशदेव च ॥

सप्तोत्तरं तु पञ्चाशत् त्रिषष्टिर्विस्तृतायतम् ।
एकोनब्धि(?) नियोक्तारं चत्वारिंशत् क्रमादथ ॥

त्रिभूतत्युत्तरं(?) पञ्चपञ्चाशत् क्रमशो बुधः ।
ततोत्तरं चतुःषष्टि विस्तारायाममुच्यते ॥

३.७.११९ ——— ——— विमान-उच्छ्रायकल्पन-

ज्ञा. ३१.५९

हस्तशतं षण्णवतिः नवतिः चतुरशीतिः अशीतिः पञ्चसप्ततिः चतुःषष्टिः षष्टिः षट्पञ्चाशदित्युच्छ्राया विमानानां क्रमेण नवधा भवन्ति ।

क्रि. ३. १७,८

विस्तारद्विगुणोत्सेधं कल्पयेत् तु विधानवित् ।
एकांशकं तदष्टांशं दशमं च गलान्तकाः ॥

अंशकौ पादशिखरौ कल्पयेत् शिल्पिनालयम् ।
गण्यालंकारभेदादि वासाधिकरणोक्तवत् ॥

३.७.१२० ——— ——— आद्वादशतलविमान-उत्तमादि-उच्छ्रायानुरोधेन

प्र. ५. १२-४

विस्तारद्विगुणोत्सेधमुत्तमं तु प्रचक्षते ॥

विस्तारं सप्तधा कृत्वा द्वादशांशस्तु मध्यमम् ।
एकादशांशमधमं विस्तारे सप्तधा कृते ॥

आद्वादशतलादेवमुत्सेधं तु विधीयते ।

३.७.१२१ ——— ——— पौष्टिकादिविमान-उत्सेधमान-

य. ८.३

त्रिधोदयं तदध्यर्धं पादोनं द्विगुणं तथा ।
त्रिगुणं चेति नाम्ना च पौष्टिकं जयमद्भुतम् ॥

३.७.१२२ ——— ——— विमानमान-मूलबेरानुगुण-

प्र. ५.१९

बेरः पूर्वं स्थितो यत्र तत्र बेरवशात् भवेत् ।

३.७.१२३ ——- ——— मूलबेरपीठविस्तार-

प्र. ५.१९

यावद्बेरं त्रिभागैकं विस्तारं पीठमेव हि ॥

३.७.१२४ ——— ——— द्वार-उत्सेधादि-

स.(*) ८.११

पादेनैव समं द्वारं तदर्धं द्वारविस्तरम् ।

प्र. ५.२२,३

प्रासादस्यग्रतो द्वारं प्रकुर्याल्लक्षणान्वितम् ॥

(*) विमानपादेनैव ।

प्रतेरुपरि सीमान्तं द्वारस्योत्सेध उच्यते ।

३.७.१२५ ——— ——— विमानद्वार-उत्तमादि-विस्तारानुरोधेन

प्र. ५.२३,४

उत्तमं द्वारविस्नारं उत्सेधार्ह(र्ध?)मुदाहृतम् ॥

उत्सेधार्धदशांशेन हीनं मध्यममुच्यते ।
विंशत्या परिहीनं स्यात् विस्तारमधमं भवेत् ॥

३.७.१२६ ——— ——— ——— भुवङ्गाद्यवयवकल्पन-

वि. ९. ३७,८

पादायामद्वारोत्सेधं तदर्धविस्तारं विस्ताराधिकमानं विमाननिर्देशाङ्गुलेन एकाद्यष्टाङ्गुलान्तं नवधा भवति । अथवा दण्डेन पाददण्डादि पादाधिकं द्विदण्डान्तं पाददण्डवृद्ध्या नवविधं स्यात् । हस्तेन पादं सार्धपादमर्धं भित्तिविस्तारं समं वा बहलद्वारविपुलपादोत्सेधं सप्ताष्टन(न्द)वदशभागं कृत्वा षट्सप्ताष्टनवभागं शुद्धद्वारं शेषांशं द्विधा कृत्वा एकांशं भुवङ्गम् एकांशं पतङ्गम् अथवा भुवङ्गमानं त्रिभागैकं शेषं पतङ्गमानं स्यात् । तत्समं दक्षिणोत्तरस्तम्भनिर्गमं तद्बहुलात्पादाधिकमर्धाधिकं पादोनद्विगुणं द्विगुणं तेषां विपुलबहलसमां नानापुष्पवल्लिकां कारयेत् ।

अथवा तन्महद्वारं चेत् षोडशांशं कृत्वा त्रयोदशांशं शुद्धद्वारोत्सेधं सप्तांशमष्टांशं वा द्वारविस्तारं षोडशांशं द्विधा कृत्वा एकांशं भुवङ्गमेकांशं पतङ्गं स्यात् । अन्यत् सर्वं पूर्ववत् कारयेत् ।

य. ८. २७-३१

बहुलं द्वारविपुलं भित्तिविस्तारमेव वा ॥

पादहस्ताधिकं प्रोक्तं पादायामार्धमेव वा ।
धात्वष्टनन्दपङ्क्त्यंशं कृत्वा पादोदयं पुनः ॥

षण्मानाष्टनवभागं शुद्धद्वारोदयं स्मृतम् ।
भुवङ्गार्धं पतङ्गार्धं शिष्टभागं द्विधा चरेत् ॥

तदेकैकं तयोरंशं तत्समं स्तम्भनिर्गमम् ।
बहुलात् पादाधिकं प्रोक्तमर्धाधिकमथापि वा ॥

पादोनद्विगुणं प्रोक्तं द्विगुणं पादयोस्ततः ।

स. ९. ७-१२
पञ्चभागं द्विभागं वा सप्तभागं त्रयोऽथवा ।
नवभाग चतुर्भागमेकादशसु पञ्चकम् ॥

त्रयोदशसु षड्भागमेकादशसु सप्तकम् ।
सप्तदशाष्टभागं वा विस्तारार्धमिति स्मृतम् ॥

स्थानाभिवृद्धिकामश्चेन्नवरत्नं विनिक्षिपेत् ।
कुम्भादधस्ताद्रत्नानां स्थानं प्रोक्तं महर्षिभिः ॥

विमानप्रकृतेरूर्ध्वमुत्तरार्धं च यद्भवेत् ।
विमानस्य महाद्वारं दशभागं च कारयेत् ॥

अथवा तन्महाद्वारमष्टभागं समाचरेत् ।
अधश्चैकं भुवङ्गः स्यात् पतङ्गोऽप्येकमूर्ध्वतः ॥

शुद्धद्वारं तु तन्मध्ये ध्रुवबेरं तु तत्समम् ।

३.७.१२७ ——— ——— गर्भगृहद्वार-कवाटकल्पन-

वि. ९. ३८-४०

कवाटविस्तारायामं द्वारसमं तयोर्बाहुल्यं द्वारस्तम्भबहुलार्धं तत्पादाधिकं पादहीनं वा तयोरूर्ध्वाधः शिखायुक्तं शेषं युक्त्यैव कारयेत् ।

द्वारपट्टिकायामं शुद्धद्वारसमं तस्य विस्तारं द्वारविस्तारादष्टांशं तस्यार्धं पादं वा बाहुल्यं वामकवाटान्वितं नानाचित्रैर्विचित्रितं तद्दण्डं पार्श्वपट्टिकाग्रं द्वित्रयोपेतपञ्चसप्तनवाद्ययुग्मयष्टिसमायुक्तं कारयेत् । शक्तश्चेत् पट्टिकायष्टीः लोहजा एव कारयेत् । आयसैः पुष्पमुकुलशङ्कुभिर्दृढं कृत्वा आयसैः पट्टैश्चन्द्राद्यैस्त्रुट्याकारैर्वज्राकारैर्मुकुलाकारैश्च शोभनार्थं रक्षार्थं संयोज्य तयोरूर्ध्वाधःस्तान्मध्ये वलयैर्भुवङ्गपतङ्गयोर्मध्ये वलयद्वयं पुलकोपेतं कारयेत् । द्वारषडंशस्थानक्रमं भुवङ्गस्थानक्रमं भुवङ्गं दक्षिणशीर्षम् उत्तरपादम् ऊर्ध्वाननं द्वितीयं दक्षिणस्तम्भमुत्तराभिमुखं तृतीयमुत्तरस्तम्भं दक्षिणाभिमुखं चतुर्थं पतङ्गमुत्तरशीर्षं दक्षिणपादमधोमुखं संस्थाप्य पश्चात् पञ्चमं दक्षिणकवाटम् उत्तराभिमुखं षष्ठमुत्तरकवाटं दक्षिणाभिमुखं तक्ष्णा संस्थाप्य पश्चात् धातृविधातृभुवङ्गपतङ्गपतिरवरुणान् तत्तन्मन्त्रेणाचार्यः स्थापयेत् ।

द्वारस्तम्भकवाटार्थं शिरीषपुन्नागनिम्बवकुलार्जुनमधूकपनसासनान् अन्यान् शुभान् पुंवृक्षान् वा विधिनाहृत्य दारु द्विधा कृत्वा दक्षिणांशं दक्षिणस्तम्भकवाटं वामांशमुत्तरस्तम्भमुत्तरकवाटं च तच्चोर्ध्वभागमूर्ध्वपट्टिकां च कारयेत् । एवमेव वृक्षालाभे चैकजातीयशिलाभिः स्तम्भं कवाटं कारयेत् । कवाटपृष्ठे बन्धनार्थं दारुणा यन्त्रं यन्त्रिकाश्च कृत्वा बाह्यपार्श्वे चायसा रक्षाबन्धनपरं यन्त्रं यन्त्रिकाम् आयतवलयोपेतामयसा काञ्चनेन वा वल्मीकां कृत्वार्पयेत् ।

य. ८.३१,२; १४.३१,२

कवाटं कारयेत् तत्र निरुक्तोक्तं च बुद्धिमान् ॥

उक्तवृक्षेण संश्लिष्टं ताम्रपट्टेन बन्धितम् ।
- - - - - - - - - - - - - - - - - - -॥

दैवज्ञं शिल्पिनं चैव तथाभ्यर्च्य गुरुं पुनः ।
कवाटं विधिवत् कृत्वा समाप्ते योजयेत् क्रमात् ॥

कवाटयोश्च संस्कारं कारयेदेवमेव च ।
अन्यथा चेद्विनाशः स्यात् तस्मादेवं समाचरेत् ॥

३.७.१२८ ——— ——— ——— तोरणकल्पन-

प्र. ५. ६९-७२

- - - - - - - - - - - तोरणं वक्ष्यतेऽधुना ॥

पार्श्वयोः पृष्ठतश्चापि कर्तव्यं तोरणं तथा ।
प्रतेरुत्तरसीमान्ते तोरणस्याश्रयो भवेत् ॥

विस्तारं तु तदर्धं स्यात् विस्तारं पञ्चभागिकम् ।
मकरांशं त्रियंशेन शेषं पादमिति स्मृतम् ॥

पादान्तराग्रमथवा विस्तारं तोरणस्य तु ।
पूर्वोक्तमेव कर्तव्यं मकरांशप्रमाणतः ॥

३.७.१२९ ——— ——— नालीकल्पन-

प्र. ५. ५२-७

जगत्यन्ते कुमुदान्ते पट्टिकान्तेऽथवा पुनः ।
जलनिर्याणमार्गं च नालनिर्गमनं क्रियात् ॥

हंसपादं त्रिपादं वा वितस्तिर्वा विशेषतः ।
प्रतेर्बाह्यविनिष्क्रान्त्या नालीं शैलमयीं तथा ॥

गजोष्ठसदृशाकारां सिंहाकृतिमुखोत्तराम् ।
भूतसिंहोपमामूर्ध्वसा:रवाराधिकारयेत्(?) ॥

द्विदण्डं च त्रिदण्डं वा गर्भगेहे तु वेश्मनः ।
बेरोदयसमं वाथ द्विगुणं वाध्यर्धमेव वा ॥

प्रणालमूलविस्तारं त्रिभागैकाग्रविस्तरम् ।
व्यासत्रिभागं भागोनं बहुलं तु त्रिभागभाक् ॥

वारिसंचारगम्भीरतारं झर्झरलक्षणम् ।
अनिम्नोन्नतमाभित्तेः तदात्यश्रं क्रमान्नतम् ॥

य. ८.१२

३.७.१३० —— —— **नालीस्थापन-**

प्र. ५. ५८-६४

सर्ववाद्यसमायुक्तं तदा मङ्गलवाचकैः ।
वास्तुहोमं ततः कृत्वा आचार्यं पूजयेत् ततः ॥

शिल्पिनं पूजयेत् पश्चात् सुमुहूर्ते सुलग्नके ।
आचार्यः सुप्रसन्नात्मा वारुणं सूक्तमुच्चरेत् ॥

तक्षकः स्थापयेन्नालीं सुस्निग्धां सुदृढां क्रमात् ।
बेरप्रासादगर्भस्य यावत्तालस्य चावधि ॥

धारां तु केवलं कुर्यात् भित्तौ तालस्य धीमतः(?) ।
श्रेष्ठमध्यकनिष्ठानि बेरस्य स्थापनं त्रिधा ॥

धारादलसमाप्तौ तु स्थापनं चोत्तमं भवेत् ।
द्वारबन्धस्य पूर्वे तु स्थापनं मध्यमं भवेत् ॥

मूर्धोपलस्य पूर्वे तु स्थापनं स्यात् कनीयसम् ।
यः करोत्यन्यथा चास्मात् अभिचाराय चैव हि ॥

एवं नालं च संस्थाप्य - - - - - - - - - -।

३.७.१३१ ——— ——— आयादिपरीक्षण-

वि. ९.४३

उत्सेधहस्ते अष्टगुणिते भानुत्रिघनैरपहृते शेषमायं नक्षत्रं स्यात् व्यासे नवगुणिते अष्टापहृते शेषं योनिः व्ययं भवति प्रणाहे नवगुणिते सप्तत्रिंशदपहृते शेषं वारं तिथिर्भवति । एवं विमानगोपुरादिकरणहस्तैर्मण्डपावरणग्रहादीनां व्यासायामसमूहकरैः प्रतिमानामुत्सेधाङ्गुलिभी रथादीनां व्यासायामसमूहमात्रै - रायादीनि परीक्षयेत्। एतेषु अल्पदोषं गुणाधिकमपि ग्रहीतव्यम् । सार्धहस्तच्छेदे पादमर्धं त्रिपादं वा संयोज्य गणयेत् । तच्छेषं हीनाधिक्यं (युक्त्या) कुर्यात् । अङ्गुलिच्छेदयवैः (युक्त्या) तथैव कारयेत् । अत्रानुक्तं सर्वं शिल्पिशास्त्रोक्तविधिना कुर्यात् ।

३.७.१३२ ——— ——— शिखरादि-इन्द्रादिविम्बकल्पन-

अ. ७

चतुरश्रे तथाष्टाश्रे वृत्ते चैव विमानयोः ॥

शिखरस्य महानास्या अधस्तात् स्थापयेत् क्रमात् ।
प्राच्यां शचीपतिं चैव हयग्रीवं च दक्षिणे ॥

पश्चिमे च महाविष्णुं वरुणं च प्रजापतिम् ।
इन्द्रं सत्यं महाविष्णुं ब्रह्माणं च तथापि वा ॥

स्थापयेदथवा तत्र विमलामलसुन्दरान् ।
कमलां च क्रमाद्दिक्षु स्त्रियश्चैव सुमङ्गलाः ॥

दिशास्वष्टासु संस्थाप्य अष्टताश्रयदिक्षु च ।
न्यक्षादीन् विमलाद्यान् वा वेदरूपाणि चाचरेत् ॥

गरुडं तथाग्न्यादिभक्तान् वापि विशेषतः ।
प्रतिकोणेषु गरुडं हृदयेऽञ्जलिना युतम् ॥

सुमुखं च सुखासीनं गमनासन्नमेव वा ।
यथारुचि यथाकर्तुः गरुडस्थापनमुत्तमम् ॥

कोणमध्ये तु गरुडं तस्यैवोभयपार्श्वतः ।
सिंहावभिमुखौ कल्प्य विदिशासु चतुर्दिशम् ॥

अन्यत्र कूटशालादौ तथा रूपाणि कल्पयेत् ।

ज्ञा. ३२.६२

भित्तिभागेषु सर्वत्र देवांशावतरणक्रीडाभावविधानेन अप्सरोयक्षगन्धर्वनागमुख्यैः समन्वितं चक्षुराह्लादकरं रम्यं मनोहरं यत्नतः कारयेत् ।

क्रि. ५.४२-८,५४,५

पादवर्गे गले चैव विमाने परितः क्रमात् ॥

प्रागादि पुरुषादींस्तान् पादवर्गे प्रकल्पयेत् ।
उपानार्धांशमात्रेण विमानेशान् प्रकल्पयेत् ॥

इन्द्रं च दक्षिणामूर्तिं नारसिंहं पितामहम् ।
प्रागादिकल्पयेदेतान् गले लक्षणसंयुतान् ॥

अथवा पुरुषादींस्तु वाराहं नारसिंहकम् ।
सुखासीनं हयग्रीवं कल्पयेदथवा गले ॥

ध्रुवबेरसमं वापि पादहीनमथापि वा ।
अर्धं त्रिभागादेकं वा तेषामुत्सेध उच्यते ॥

तथा कोणेषु गरुडं प्रस्तरोपरि कल्पयेत् ।
आलयेष्वन्यदेवानां वाहनानि प्रकल्पयेत् ॥

मृगेन्द्रमथवा कुर्यात् सर्वदेवालयेषु च ।
- - - - - - - - - - - - - - - -॥

गले विमाने तान् देवान् कल्पयित्वा समर्चयेत् ।
अथवा नरसिंहं वा दुर्गां वापि सुदर्शनम् ॥

कल्पयित्वा समावाह्य नित्यं पूर्ववदर्चयेत् ।

प्र. ६. १५-८

प्राच्यां विष्णुं प्रकुर्वीत यस्य गर्भगृहे स्थितिः ॥

दक्षिणे सत्यमूर्तेस्तु पश्चिमे चाच्युतस्य च ।
उत्तरे चानिरुद्धस्य स्थितिमेवं प्रकल्पयेत् ॥

गले पुरुषमूर्तिस्तु दक्षिणे नारसिंहकः ।
पश्चिमे तु वराहश्च हयग्रीवस्तथोत्तरे ॥

सुखासनसमायुक्तं सर्वालंकारसंयुतम् ।
व्यालोर्ध्वकोणकं चैव वीशं वाथ मृगेश्वरम् ॥

य. ८. ५८-६४

अलंकारविधानं च निरुक्तोक्तवदाचरेत् ।
पूर्वादिषु विमानेषु महास्यां वेदिकोपरि ॥

पुरुषादीन् कारयित्वा कालादीन् कारयेत् तु वा ।
द्वितले तु प्रतेरूर्ध्वे चन्द्रादींस्तु प्रकल्पयेत् ॥

त्रितलादितलेष्वेवं कल्पयेच्च यथाक्रमम् ।
प्रतेरुपरि कोणेषु गलस्थाने विशेषतः ॥

सुपर्णं कारयेद्विद्वान् मृगेन्द्रं वाथ केचन ।
एकजानुसमासीनः ब्रह्मासनमथापि वा ॥

गमनासनवद्युक्त्या विशेषात् कारयेद्बुधः ।
अधिष्ठानसमं वाथ स्तम्भार्धं पादमेव वा ॥

त्रिपादं वाथ देवानां मानं स्यात् पुरुषादिषु ।
पञ्चविंशच्च मात्रादि द्विद्व्यङ्गुलविवर्धनात् ॥

षोढाभूतोत्तरत्रिंशन्मानान्तं वोदयं तथा ।

वि. ९. ४३,४

वलभौ विद्याधरहंसभूतनागादीनि कुर्यात् । द्वारेषु द्वारपालान् । शिखरे महानास्यन्तरे पूर्वे पुरुषं दक्षिणे नृसिंहं पश्चिमे अच्युतम् उत्तरेऽनिरुद्धं पूर्वे चक्रं दक्षिणे दक्षिणामूर्तिं पश्चिमे नृसिंहम् उत्तरे पितामहं च कल्पयेदिति केचित् । पादवर्गे तोरणस्यान्तरे दक्षिणे सत्यं पश्चिमे अच्युतम् उत्तरे अनिरुद्धं प्राग्द्वारदक्षिणे पुरुषं च दक्षिणे नृसिंहं पश्चिमे अच्युतम् उत्तरे वाराहं वेति केचित् । दक्षिणादिदिग्द्वारे तद्दिङ्मूर्तीः तद्द्वारदक्षिणभागे चान्यान् यथाक्रमेण स्थितानासीनान् वा कल्पयेत् ।

३.७.१३३ —— —— —— जुगुत्साकरविम्बकल्पननिपेध-

ज्ञा. ३२.६२

क्लिष्टरूपकबन्धपिशाचब्रह्मराक्षसान् पाषण्डसभ्येतररोगार्तादिरूपोद्वेगजनकान् क्वचिदपि न कारयेत् ।

३.७.१३४ —— —— सुधालेपन-

ज्ञा. ३२.६२

भित्तिभागेषु सर्वत्र द्वियवत्रियवयवाहीनं वृतेः तलनिम्नमुन्नतं वा सुधया लेपयेत् । इष्टकापादविस्तारं पञ्चधा सप्तधा षोढा वा विभज्य एकं स्तम्भनिम्नं तदष्टभागं पादाग्रमिष्टकापादविस्तारं तरु(?)पादानां तन्मूलविस्तारम्

उत्तरस्योत्तरस्य त्रिभागैकमुत्तराबन्धविस्तारम् उत्सेधमुत्तराणामेवं योगबन्धं युक्त्या सुधया सर्वत्र कारयेत् । करालमुद्गकुल्माषकर्ककीचिक्कणैः पञ्चविधचूर्णैः चतुर्भागिकं भस्म संयम्य चूर्णद्विगुणशर्करायुतं शणवालुकायुक्तं जलकषायत्रिफलोदकक्षीरमाषयूषबन्धोदकैः त्रिभिः मर्दयित्वा माषयूषक्षीरसहितं शुद्धोदकेन शुद्धं कृत्वा गन्धोदकेनालिप्य सुधया नानारूपक्रियां कारयेत् ।

वि. ९.४३

[अत्र 'प्रतिव्यालसिंहेभाद्यैर्भूषयेत्' इत्यधिकम् इति विशेषः ।]

३.७.१३५ ——— ——— द्वितलविमानकल्पन-

वि. १०. ४४-६

तद्❋व्यासायामं नवधा भवति । अत्र त्र्यंशं गर्भविस्तारं परितो गृहपिण्ड्यलिन्द्रहा(रा)कैकांशेन समावृता भवन्ति । बाह्यभित्तिं षड्भागं विभज्य द्व्यंशं कोष्ठम् एकांशं कूटम् एकांशं हारान्तरम् । अथवा तमष्टधा विभज्य तदेकांशं कूटतारं मध्ये द्व्यंशां शालां तयोर्मध्ये चैकैकांशं पञ्जरविशालं शेषार्धांशैर्हारान्तरं कारयेत् । अथवा मानसूत्रात् बहिः कूटकोष्ठपञ्जराणां निर्गमं पादार्धं त्रिपादं दण्डं सपादं सार्धं सत्रिपादं द्विदण्डं समसूत्रे अन्यस्मिन् कूटाद्बहिस्तथैव कोष्ठनिर्गमं कारयेत् । अलिन्द्रं वालुकाभिरापूर्य घनं सावकाशं संछादितं वा परिकल्प्य ऊर्ध्वे अलिन्द्रं त्यक्त्वा अभ्यन्तरभित्तावुपरि भूमिं कारयेत् ।

उत्सेधमेकोनविंशत्यंशं कृत्वा अधिष्ठानं द्व्यंशं चतुरंशं पादं पादोनद्व्यंशं प्रस्ता(स्त)रं त्र्यर्धांशं पादं सार्धांशं मञ्चम् अर्धांशा वेदिका एकांशं कण्ठं(र्णं) सपादाग्र्यंशं शिखरं पादोनद्व्यंशा स्थूपिकेत्येवं शान्तिकम् ।

❋ तत्पदेन द्वितलविमानस्य परामर्शः ।

पौष्टिकाद्युत्सेधानां पूर्वोक्तांशेषु पञ्चांशं संयोज्य पादे शिरसि चैकैकां स्थूपिं विनान्येष्वर्धांशं संयोज्य कुर्यात् । एवं सर्वमूर्ध्न्येव कुर्यात् ।

उपरितलपादोत्सेधमष्टधा विभज्य एकांशं वेदिकोदयं द्व्यर्धांशं कण्ठं (र्णं) त्र्यंशं शिखरं सार्धांशा स्थूपिकेति ।

अन्तरप्रस्तारं चैकान्तरदशभागं विभज्य एकांशं वेदिकोदयं द्व्यर्धांशं कण्ठं(र्णं) त्र्यंशं शिखरं सार्धांशा स्थूपिकेति ।

अन्तरप्रस्तरप्रस्तरं चेदेकादशभागं विभज्य एकांशं वेदिकोत्सेधं त्र्यंशं पादं सार्धांशं मञ्चम् अर्धांशा वेदिः सपादांशं कण्ठं(र्णं) पादोनत्र्यंशं शिखरम् एकांशा स्थूपिकेत्येवं सर्वत्र कूटकोष्ठादीनि कारयेत् ।

प्रवेशनिर्गमदण्डेन यथाशोभं यथाजालं नयेत् । मुखमण्डपं दक्षिणवामयोरूर्ध्वाधिरोहणार्थं सोपानं च युक्त्या कारयेत् ।

३.७.१३६ —— —— त्रितलविमानकल्पन-

वि. १०.४६

व्यासायामं त्रयोदशभागं कृत्वा त्र्यंशं गर्भगृहं परितो गृहपिण्ड्यलिन्द्रहारास्तद्बहिश्चालीन्द्रहारे संकल्प्य अभ्यन्तरालीन्द्रं वालुकाभिरापूर्य घनमेव बाह्यालीन्द्रं सावकाशं संछादितं वा कारयेत् । बाह्यभित्तेः परितः कूटशालादीनि पूर्ववत्* कृत्वा अलीन्द्रं त्यक्त्वा तदभ्यन्तरभित्तौ मध्ये तलं सालिन्द्रं संछादितं तस्मिंश्च कूटशालादीनि पूर्ववत् कुर्यात् । अलीन्द्रं त्यक्त्वा गृहपिण्डादुपरि भूमिं कारयेत् । मुखमण्डपं च कुर्यात् । सोपानं युक्त्या च कल्पयति ।

---

* द्वितलविमानवत्

उत्सेधं चतुर्विंशतिभागं कृत्वा अधिष्ठानं द्व्यंशं पादं चतुरंशं प्रस्तरं पादोनद्व्यंशं पादं पादोनचतुरंशं सार्धांशं मञ्चं पादं त्र्यर्धांशं सपादांशं प्रस्तरम् अर्धांशा वेदिः सार्धांशं कण्ठं(र्णं) त्र्यंशं शिखरं (स)पादांशा स्थूपिकेत्येवं शान्तिकम् ।

पौष्टिकाद्युत्सेधानां पूर्वोक्तांशेषु सप्तांशं संयोज्य पादेषु शिरसि चैकांशमन्येष्वर्धांशं संयोज्य युक्त्या सर्वमूह्यैव कुर्यात् । एतेषां विन्यासविशेषं मूर्तिभेदं च उत्तरतो वक्ष्यामः ।

३.७.१३७ ——— ——— चतुस्तलविमानकल्पन-

वि. १०. ४७,८

व्यासयामं सप्तदशभागं कृत्वा त्र्यंशं गर्भगृहं तत्परितश्चैकांशे गृहपिण्ड्यलीन्द्रहारादीन् कल्पयति । तत्तत्तलावसाने कूटशालाद्यैस्तत्तद्भित्तिं समापयेत् । अधस्तलं सर्वत्र घनमेव कृत्वा तस्योर्ध्वे परितोऽलिन्द्रं त्यक्त्वा तदभ्यन्तरे परितोऽलिन्द्रत्रये प्रागादिचतुर्दिक्षु मुखमण्डपसंयुक्तं गर्भगृहं संकल्प्य पुरुषादीन् संस्थापयेत् । आग्नेयादिकोणेषु प्राङ्मुखं पश्चिमाभिमुखं तथैव कृत्वा कपिलादीन् संस्थापयेत् । तदूर्ध्वे परितोऽलिन्द्रं त्यक्त्वा मध्ये विष्णुमूर्तेर्गर्भागारं मुखमण्डपसंयुक्तं दक्षिणे नरनारायणयोः पश्चिमे नृसिंहस्य उत्तरे नरनारायणस्य(?) गर्भागारं कृत्वा तदूर्ध्वे परितोऽलिन्द्रं त्यक्त्वा मध्ये प्राङ्मुखशयनस्य गर्भागारं मुखमण्डपं च कृत्वा परितस्तलं प्रति चर्यासोपानं प्रदक्षिणवशेन युक्तितः कुर्यात् ।

उत्सेधं पञ्चत्रिंशदंशं कृत्वाधिष्ठानं त्र्यंशं षडंशं पादं द्व्यर्धांशं प्रस्तरं पञ्चांशं पादं द्व्यंशं मञ्चं चतुरंशं चरणं सार्धांशं कपोतं त्र्यंशं पादं सपादांशं मञ्चम् अर्धांशा वेदिका एकांशा ग्रीवा त्र्यर्धांशं शिखरं पादोनद्व्यंशा स्थूपिकेत्येतत् शान्तिकम् । पौष्टिकाद्युत्सेधानां पूर्वोक्तांशेष्वष्टांशं संयोज्य पादेषु शिरसि चैकैकांशं संयोज्य शेषं समूह्यैव कुर्यात् । शिखरे पादांशं हित्वा स्थूप्या सह संयोजयेत् इत्येके ।

३.७.१३८ ——— ——— पञ्चतलविमानकल्पन-

वि. १०.४८

★पूर्वोक्तांशेषु तारे चतुरंशं संयोज्य परितोऽलिन्द्रं हारे संकल्प्याधस्तलं घनमेव कृत्वा उपरितलेऽष्टदिक्षु गर्भगृहं संकल्प्य प्रागादि नृसिंहादीन् संस्थापयेत् । तस्योपरि चतुस्तलोक्तप्रकारैरेव कुर्यात् । उत्सेधेषु पूर्वोक्तांशेषु षोडशांशं संयोज्य अधस्तलस्याधिष्ठानं चतुरंशम् अष्टांशं स्तम्भं चतुरंशं प्रस्तारं (ए)ष(?) विशेषोऽन्यत्सर्वं पूर्ववत् । तस्मिन् पौष्टिकाद्युत्सेधानामधस्तस्य पादे चैकांशं अन्ययोश्चैकांशं पूर्वोक्तांशेषु योजयित्वा शेषं सर्वं समूह्यैव कुर्यात् ।

३.७.१३९ ——— ——— षट्तलविमानकल्पन-

वि. १०.४८

एवं षट्तलादिद्वादशतलानां तारे चतुरंशं तुङ्गे कालांशं संयोज्य उत्सेधभेदार्थं द्व्यंशाधिकविभक्तैर्विनैव तलं प्रति युक्त्या संयोज्य कुर्यात्। सर्वेषां तलानामधस्तलं घनमेव कृत्वा षट्तलस्य द्वितीयतले प्राच्यां मध्ये पञ्चवीरान् दक्षिणे राघवम् उत्तरे कृष्णं च दक्षिणे मध्ये नृसिंहं तत्पूर्वे वामनं पश्चिमे त्रिविक्रमं पश्चिमे मध्ये वराहं दक्षिणे परशुरामम् उत्तरे बलभद्रं च उत्तरमध्ये कल्किं(कर्किणं) पश्चिमे कूर्मरूपं पूर्वे मत्स्यात्मकं च गर्भगृहे संस्थापयेत् । तदुपरि पञ्चतलोक्तवत् ।

३.७.१४० ——— ——— सप्ततलविमानकल्पन-

वि. १०.४९

★ चतुस्तलोक्तांशेषु ।

सप्ततलस्य द्वितीयतले देवस्य विजयक्रीडारूपाणि प्रागादिदिक्षु विदिक्षु अन्तरालेषु पूर्ववद्[★]गर्भगृहं कृत्वा स्थापयेत् ।

३.७.१४१ —— —— अष्टतलविमानकल्पन-

वि. १०.४९

अष्टतलस्य द्वितीयतले प्राच्यां दक्षिणाद्युत्तरान्तं सनकं सुभद्रं मित्रं सनातनं च प्राङ्मुखं दाक्षेणे पश्चिमादिप्रागन्तं सुखावहं हयात्मकम् अत्रिं सर्वं च दक्षिणामुखान् पश्चिमे दक्षिणाद्युत्तरान्तं सनन्दनं रामदेवं शिवं सनत्कुमारं च पश्चिमाभिमुखान् उत्तरे पश्चिमादिप्रागन्तं संवहं पुण्यं विश्वं सुवहं चोत्तराभिमुखान् गर्भगृहं कृत्वा स्थापयेत् अन्यत्सर्वं पूर्ववत्[❁] ।

३.७.१४२ —— —— नवतलविमानकल्पन-

वि. १०. ४९

नवतलस्य द्वितीयतले प्रागादिदिक्पालान् आदित्यांश्च वसून् रुद्रान् मरुतो विश्वान् सप्तऋषीन् सप्तरोहिणीः मातृगणानपि गर्भगृहं कृत्वा स्थापयेदन्यत्सर्वं पूर्ववत्[☆] । सर्वस्मिन् यथेष्टस्थाने गर्भगृहं कृत्वा सर्वान् देवान् कल्पयेत् ।

३.७.१४३ —— —— दशतलादिद्वादशतलान्तविमानकल्पन-

वि. १०. ४९, ५०

दशतलाद्युक्ततलान्तं तलं प्रति यथाक्रमेण पीताभं महाविष्णुं रुक्माभं सदाविष्णुं स्फटिकाभं नारायणं चतुर्भुजं देवीभूषणायुधैः सह स्थानकासनशयन-

---

◆ षट्तलविमानवत् ।

❁ सप्ततलविमानवत् । ✱ अष्टतलविमानवत् ।

मार्गेष्वेतेष्विष्टमार्गेण संस्थापयेत् । अथवा द्वितलादि द्वादशतलान्तं क्रमेण विस्तारं त्रिभागादि त्रयोदशभागान्तं विभज्य एकांशं गर्भगृहं शेषांशैर्गृहपिण्ड्यलिन्द्रभागादीन् कूटशालादींश्च व्यासोपानसंयुक्तं वेणुरन्ध्रवत् गर्भोपरि गर्भगृहं मुखमण्डपं च परिकल्प्य आदितलं घनमेव कृत्वा उपरितलत्रये महाविष्णुं सदाविष्णुं नारायणम् अन्येष्वधस्तात् स्थानकासनशयनभेदेन विष्णुमूर्तिं पूर्ववत् संस्थापयेत् । अष्टतलादूर्ध्वं मूर्तिस्थापनं नाचरेदित्येके । सर्वेषु विमानेषु विस्तारात् त्रिभागैकविशालमेकदण्डाद्यर्कदण्डान्तं द्वादशभेदैर्निर्गमयुतं मध्यभद्रं कुर्यात् । महद्विमानं चेत् द्वयोः पार्श्वयोश्च कूटशालादीन् कल्पयेदित्याह मरीचिः ।

३.७.१४४ ——— ——— विमान-उत्तमोत्तम-

वि. २.९

प्राग्द्वारमुत्तमोत्तमम् ।

३.७.१४५ ——— ——— ——— उत्तम-

स. २.४७

प्राग्द्वारमुत्तमं विष्णोः- - - - -॥

खि. २.६८

[अत्र प्राग्द्वारं तु प्रशस्तमिति निर्दिश्यते इति विशेषः ।]

वि. २.९

[अत्र पश्चिमद्वारमुत्तममिति निर्दिश्यते इति विशेषः ।]

३.७.१४६ ——— ——— ——— मध्यम-

स. २.४७

- - - - - - -मध्यमं पश्चिमामुखम् ॥

खि. २.६९

वि. २.९
[अत्र दक्षिणद्वारं मध्यममिति निर्दिश्यते इति विशेषः ।]

३.७.१४७ ——— ——— ——— अधम-

स. २.४८
अधमं चोत्तरं द्वारं दक्षिणाभिमुखं तथा ।

खि. २.६९

वि. २.९
[अत्र उत्तरद्वारमधममिति निर्दिश्यते इति विशेषः ।]

३.७.१४८ ——— ——— प्राग्द्वारादिविमान-फल-

वि. १९.९२
प्राग्द्वारं सर्वसंपत्करं पश्चिमद्वारं कीर्तिदं दक्षिणद्वारं जयदम् उत्तरद्वारं ज्ञानदम्।

प्राकारकल्पनम्

३.८.१. आलयनिर्माण - प्राकारकल्पन - उद्देश-

वि. ११.५०

रक्षार्थं मङ्गलार्थं शोभार्थं- - - - -तृतीयावरणादिसप्तप्राकारान्तं कारयेत्।

क्रि. ४.६७

[अत्र मङ्गलार्थम् इत्यस्य स्थाने परिवाराणां स्थापनार्थम् इति निर्दिश्यते आवरणसंख्या तु न निर्दिश्यते इति च विशेषः ।]

३.८.२ ——— ——— प्राकार-अन्तर्मण्डलादि-

प्र. ६. २९-३२

- - - - - - - - - प्राकारमधुनोच्यते ॥

प्राकारं परितः कुर्यात् प्रासादस्य प्रमाणतः ।
प्राकारस्य तु विस्तारं तस्य दण्डमिहोच्यते ॥

अन्तर्मण्डलमित्याहुः अध्यर्धं दण्डमानतः ।
अन्तर्हारमिति प्रोक्तं मध्यहारं द्विदण्डतः ॥

चतुर्दण्डप्रमाणेन युक्ता मर्यादभित्तिका ।
महामर्यादभित्तिः स्यात् सप्तदण्डप्रमाणतः ॥

नि. ११

अथातः संप्रवक्ष्यामि प्राकारस्य तु लक्षणम् ।
मध्ये चतुष्पदं तत्र प्रासादं कल्पयेद्बुधः ॥

त्रिपादेनावृतं चात्त(त्र?) मण्डलं समुदाहृतम् ।
चतुःषष्टिपदं ह्येतत् तस्माद्वायत्रिया वृतम् ॥

अन्तर्हारपदं तस्य षण्णवत्युत्तरं शतम् ।
मध्ये चतुष्पदं पद्मं द्विपदेनावृतं बहु ॥

षट्त्रिंशत्पदमेवं स्यात् अन्तर्मण्डलमिष्यते ।
त्रिपादेनावृतं बाह्यं चत्वारिंशच्चतुःपदम् ॥

एवं चतुष्पदं मध्ये पदैकेनावृतं बहु ।
पदं षोडशकं तस्मात् अन्तर्मण्डलमिष्यते ॥

द्विपदेनावृतं तत्र चतुःषष्टिपदं भवेत् ।
अन्तराभिभवेत् तस्य कल्पयेत् तन्त्रकोविदः ॥

यावच्चतुर्गुणं तस्य मुखमण्डपपूर्ववत् ।
आलयाभिमुखं तत्र पदैनैकेन वर्धयेत् ॥

अन्तर्मण्डलमेवं स्यात् तावत्कालान्तरं क्रमात् ।
एवमेव यथान्यायं वर्धयेत विचक्षणः ॥

अन्तर्मण्डलविस्तारे स्थानं वाथ भवेद्यदि ।
कुड्यं विनात्र संकल्प्यमन्तर्मण्डलमेव तु ॥

इन्द्रादिपरिवाराणां पीठमेवं प्रकल्पयेत् ।
द्वितीयावरणे स्थाने महापीठयुतं बुधः ॥

सप्तत्येकोत्तरस्थाने उत्तरे वक्ष्यते क्रमात् ।
अल्पैकममिदं(तं?) विद्यात् उत्तरक्रममुच्यते ॥

प्रासादं पूर्ववन्मध्ये पदैकेनावृतं बहिः ।
अन्तर्मण्डलमेवं स्यात् परं षोडशकं भवेत् ॥

अन्तर्हारा चतुःषष्टिः द्विपदेनावृतं बहिः ।
कल्पयेन्मध्यमाभा(हा?)रं षट्पदं चावृतद्वयम् ॥

प्रासादं पूर्ववत् कल्प्य द्विपदेनावृतं बहिः ।
अन्तर्मण्डलमेवं स्यात् षट्त्रिंशत्पदमिष्यते ॥

द्विपदेनावृतं बाह्यमन्तर्भा(र्हा?)रशतं पदम् ।
पूर्ववन्मध्यमा हारा त्रिभेदं तद्युत(?) क्रमात् ॥

स पदं पूर्ववत् कल्प्य भागैकेन समावृतम् ।
अन्तर्मण्डलमेवं स्यात् द्विपदेनावृतं बहिः ।

अन्तर्हारपदं विद्यात् त्रिपदेनावृतं ततः ।
एतन्मध्यमहारः स्याच्चतुर्भागावृतं बहिः ॥

मर्यादात्कुट्टिमं विद्यात् पञ्चभागावृतं बहिः ।
महामर्यादकारः(?) स्यात् कूटप्राकारमिष्यते ॥

भवनं पूर्वमध्ये तु अन्तर्मण्डलसंयुतम् ।
पादैकेनावृतं तस्मादन्तर्हारः स शस्यते ॥

द्विपदेनावृतं बाह्यमध्यहारा शतं पदम् ।
त्रिपादेनावृतं तस्मात् षट्पञ्चाशच्छतद्वयम् ॥

पदमेवं विजानीयात् मर्यादात्कुट्टिमं भवेत् ।
षट्पदेनावृतं बाह्यं महामर्यादकुट्टिमम् ॥

चतुरश्रीत्युत्तरं सप्त(?) शतमेतत्पदं विदुः ।
अन्तर्मण्डलसंयुक्तं पूर्ववत्सदनं भवेत् ॥

अन्तर्हारपदैकेन तस्मात् सम्यक् समावृतम् ।
तस्मात्पद्वयेनैव-- - - वृतं कं पदम् ॥

मध्यहारापद - - - - - नावृतं बहिः ।
मर्यादाभित्तिरेवं स्यात् पञ्चाशैरावृतं बहिः ॥

महामर्यादभित्तिः स्यात् महति क्रममीरितम् ।
प्राकारं नवधा[*] प्रोक्तं - - - - - - - - - ॥

३.८.३ ——— ——— ——— अधस्तलनिम्नताकल्पन-

प्र. ६. ३६-९

षडङ्गुलं क्रमात् कुर्यात् न्यूनप्राकारकं विदुः ।
जलनिर्याणमार्गं स्यात् पदान्ते तटकेऽपि वा ॥

प्रथमावरणं द्वारं प्रमुखें कल्पयेत् तथा ।
द्वितीयावरणद्वारो व्यस्तश्चेन्नास्ति दूषणम् ॥

विमानोत्सेधतुल्यं वा पादोनं चार्धमेव वा ।
पृथग्गोपुरसंयुक्तमुच्छ्रितं तु समं तु वा ॥

पञ्चप्राकारमित्येवं त्रिप्राकारमथापि वा ।
त्रिप्राकारे षडङ्गुल्यं त्रिधाधस्तलनिम्नगम् ॥

३.८.४ ——— ——— ——— अधिष्ठानादिप्रमाण-

वि. ११.५२

तन्नवधा कृत्वा द्विभागमधिष्ठानं सप्तांशं पादायामं मानाङ्गुलेन षष्ट्यङ्गुलादूर्ध्वं षडङ्गुलवृद्ध्याष्टोत्तरशताङ्गुलान्तं स्तम्भोच्चं नवधा भवति । सप्ताङ्गुलं समारभ्यैकाङ्गुलवृद्ध्या पञ्चदशाङ्गुलान्तं नवविधं पादविष्कम्भं सार्धद्विहस्तादूर्ध्वं

---

[*] प्राकाराणां नवविधत्वमस्पष्टम् ।

पादवृद्ध्या सार्धचतुष्करान्तं नवधा भित्तिमानम् उत्तरार्णः परितः प्राक्पश्चिमयोरुत्तराग्रं दक्षिणोत्तरयोः प्रागग्रं संयोज्य तस्योपरि तलादीनि संन्यसेत् । एवमेव शिलाजं चास्तरेत् । ऊर्ध्वे लुपादिभिः संछादयेदिति केचित् । शिलास्तम्भोपरि दारुस्तम्भं प्रयोक्तव्यं दारुस्तम्भोपरि शिलास्तम्भं न योजयेत् । अथवा तन्मुखायामं युग्मभित्तिसमायुक्तं द्वारादिकं नानोत्तराणि संन्यस्य तस्योपरि प्रागन्तमुत्तरान्तं च तुलादीन्यास्तरेत् । द्वारे द्वारशोभादिभेदेष्वेकमार्गेण गोपुरं कारयेत् । अथवाधिष्ठानान्ते द्वारं हित्वा द्वारबाह्ये चोभयोः पार्श्वयोरभ्यन्तरभित्तिवशादेकभित्ति(भक्ति)युक्तं सोपानं कारयेत्। तद्वत्स्तम्भतुलादीनि युग्मं च संयोजयेत् । अत्रानुक्तं सर्वं शिल्पशास्त्रोक्तमार्गेण कुर्यात् ॥

३.८.५ —— —— —— मुखायाम-

प्र. ६.३३

अध्यर्धं द्विगुणं वापि त्रिगुणं वा चतुर्गुणम् ।
मुखायाममिति प्रोक्तं प्राकाराणां विशेषतः ॥

३.८.६ —— —— एकावरणालयप्राकार-

क्रि. ४. ७०-३

एकावरणमात्रं चेत्परितो [*]द्विगुणं भवेत् ।
कृत्वा तच्चतुरश्रं च मुखायामं प्रकल्पयेत् ॥

द्विगुणं द्विगुणार्धं वा त्रिगुणं त्रिगुणार्धकम् ।
चतुर्गुणमुखायामं मुखमण्डपपूर्वतः ॥

---

[*] विमानविस्तारस्य द्विगुणम् ।

समप्रमाणं कुर्वीत दक्षिणोत्तरपश्चिमम् ।
यदि पश्चिमवृद्धिस्तु स्थाननाशो भवेद्ध्रुवम् ॥

दक्षिणोत्तरवृद्धिश्चेद्ग्रामः सर्वोऽपि नश्यति ।

३.८.७ ——— ——— प्रथमावरणप्राकार-

वि. ११.५०

प्रासादं परितश्चतुरश्रीकृत्य तत्पादाधिकमर्धाधिकं पादोनद्विगुणं द्विगुणं द्विगुणार्धं त्रिगुणार्धं चतुर्गुणं वा मुखायामं प्रथमावरणस्य- - - - -।

अ. ६

एवं तं दक्षिणे चैव उत्तरे पश्चिमेऽथवा ।
प्राच्यां वा पादबाह्यं स्यात् कारयेत् सममिश्रकम् ॥

यस्यां दिशि मुखं विष्णोस्तस्यां दिशि सुवर्धयेत् ।
मुखायामं विशेषेण सालमानात् ततो बहिः ॥

पादमर्धं त्रिपादं वा सममर्धाधिकं तु वा ।
त्रिपादादधिकं वापि द्विगुणं त्रिगुणं तु वा ॥

मुखसंख्याक्रमायामं भवन्ति सु(मु?)खमाचरेत् ।
मण्डपादिविशेषार्थमलंकारविशोधनात् ॥

उत्तरे दक्षिणे वापि वर्धयेत् सालमानतः ।
त्रिहस्तान्नवहस्तान्तं सप्तधा हस्तमानकम् ॥

श्रेष्ठं तत्प्रागुदग्वृद्धिर्दक्षिणे वृद्धिमध्यमम् ।
कन्यसं पश्चिमे वृद्धिर्दक्षिणे पश्चिमेऽपि वा ॥

वर्धितं स्याद्विशेषेण कारणं प्रतिमाद्यथा ।

३.८.८ ——— ——— सर्वप्राकार-

वि. ११. ५०,१

अथवा सर्वप्राकाराणां प्रासादं परितश्चतुरश्रीकृत्यैवं मुखायामं योजयेदिति केचित् ।

तत्*परितश्चतुरश्रीकृत्यैव द्वितीयावरणादिसर्वप्राकाराणां मुखायामं प्रयोक्तव्यम् - - - - -एवमेव सप्तप्राकारान्तं कारयेत् । तेषां मुखायामं पूर्ववत्★ ।

३.८.९ ——— ——— प्राकार-उत्सेध-

खि. ७.५२

प्रासादस्यार्धमुद्दिष्टं प्राकारस्योन्नतं बुधैः ॥

३.८.१० ——— ——— प्रथमप्राकार-

प्र. ६. ३४,५

कपोतान्तं समुत्सेधं भित्तिहस्तप्रमाणतः ।
कूटशालायुतं वापि कुर्यात् प्राकारसंयुतम् ॥

मूलजं तु ततोत्सेधं हस्तमेवं विधीयते ।
यथालाभोन्नतं वापि प्रथमावरणं स्मृतम् ॥

३.८.११ ——— ——— तृतीयप्राकार-

खि. ७. ११६,७

द्वितीयावृतिविष्कम्भात् तृतीयं पादतोऽधिकम् ॥

---

* प्रथमावरणं परितः ।

अध्यर्धं द्विगुणं वापि कारयेदधिकं बुधः ।
पादाधिकसमुत्सेधः प्राकारः सर्वथोच्यते ॥

३.८.१२ ——— ——— प्राकार-उत्तमादि-उत्सेधानुरोधेन

प्र. ६. ४०,१

प्राकारे ह्युच्छ्रयं विन्यात् कपोतान्तं तदुत्तमम् ।
मध्यमं चेत्करान्तेन कलशान्तं तथाधमम् ॥

एवं प्राकारसञ्ज्ञेन तूत्सेधं त्रिविधं क्रमात् ।

३.८.१३ ——— ——— ——— भित्तिमान-

वि. ११.५१

प्राकाराणां भित्तिविष्कम्भं हस्तं पादाधिकमर्धाधिकं पादोनद्विगुणं द्विगुणं वा तत्त्रिचतुष्पञ्चषट्सप्ताष्टनवगुणितं. भित्त्युत्सेधं विस्तारादष्टमांशोनमग्रविपुलं प्रासादस्य पादाद्वा प्रागुपानाद्वा प्राकारभित्त्यन्तरमुत्तमं भित्तिमध्ये मध्यमं भित्तिबाह्ये चाधमम् ।

स. ९.२१

[अत्र विमानस्यार्धं प्राकारस्योत्सेध इति निर्दिश्यते इति विशेषः ।]

३.८.१४ ——— ——— ——— भित्तिविस्तार-

प्र. ६.४१,२

उत्सेधात् पञ्चभागैकं चतुरंशकमेव वा ॥

षड्भागैकेन वा कुर्यात् त्रिविधं भित्तिविस्तरम् ।
अथवा प्रासादभित्तिस्तु तत्समं भित्तिमेव च ॥

३.८.१५ —— —— —— पट्टिकादिकल्पन-

खि. ७.५३

प्राकारे पट्टिकां कुर्यात् कपोतं वापि कारयेत ।

३.८.१६ —— —— —— नवविध-हस्तमानानुरोधेन

क्रि. ४. ७३-७

केचित्प्राकारविस्तारं हस्तमानं वदन्ति हि ॥

अधमं मध्यमं श्रेष्ठं विस्तारस्तु त्रिधा त्रिधा ।
एकावरणमात्रं च हस्तमानं यदीच्छति ॥

पञ्चहस्तं समारभ्य द्विद्विहस्तविवर्धनात् ।
एकविंशतिहस्तान्तं नवधा परिकल्पयेत् ॥

विमानं येन हस्तेन प्रमितं तेन बाहुना ।
प्राकारं मण्डपं कुर्यात् नाधिकेन कदाचन ॥

हस्तमानेन कुर्याच्चेदायादि न परीक्षयेत् ।

वि. ११. ५०,१

हस्तमानं त्रिधा प्रोक्तम् अधमं मध्यममुत्तममिति । यथाक्रमेण त्रिपञ्चसप्तहस्तमधमं त्रयम् नवैकादशत्रयोदशहस्तं .मध्यमं त्रयं पञ्चदशसप्तदशैकोनविंशतिहस्तमुत्तमं त्रयम् ।

३.८.१७ —— —— प्रथमावरणविस्तार-

स. ९. १२,३

विमानसमविस्तारं प्रथमावरणं स्मृतम् ॥

अथवाप्यधिकं तत्र कुर्यादर्धाधिकं तथा ।
दक्षिणेऽप्युत्तरे वापि पश्चिमे च तथा भवेत् ॥

क्रि. ३. ४७-५०; ४.६८

विमानसमविस्तारं प्रथमावरणं स्मृतम् ।
पुरस्ताद्द्विगुणं तस्मादग्रमण्डपपूर्वतः ॥

द्विगुणं पश्चिमं केचिदिच्छन्ति मुनिसत्तमाः ।
विमानद्वारदिग्द्वारं प्रथमावरणं स्मृतम् ॥

अन्यथा यदि कुर्वीत राजा राष्ट्रं विनश्यति ।
ग्रामस्य यजमानस्य महती च विपद्भवेत् ॥

तस्मात् सर्वप्रयत्नेन प्रथमावरणक्रमम् ।
- - - - - - - - - - - - - - ॥

विमानसमविस्तारं प्रथमावरणं स्मृतम् ।
अथ पादाधिकं वापि कुर्यादर्धाधिकं तु वा ॥

अ. ६

अत ऊर्ध्वं विधानेन प्राकारविधिरुच्यते ॥

प्रासादस्यार्धविस्तारं त्रिपादं सममेव वा ।
पादाधिकसमं वापि अर्धाधिकसमं तु वा ॥

त्रिपादाधिकसमं वापि द्विगुणं वा विशेषतः ।
प्रथमावरणविस्तारं सप्तधा परिपठ्यते ॥

वि. ११.५०

तत्प्रासादार्धं त्रिपादं समं पादाधिकमर्धाधिकं वा प्रथमावरणम् ।

३.८.१८ —— —— द्वितीयाद्यावरणविस्तार-

वि. ११.५०

तत्समं* पादाधिकमर्धाधिकं पादोनद्विगुणं द्विगुणं त्रिगुणं चतुर्गुणं पञ्चगुणं वा द्वितीयावरणम् । तस्य❋ोक्तप्रमाणेष्विष्टमानेन तृतीयावरणादिसप्तप्राकारान्तं कारयेत् ।

स. ९. २५,६

प्रथमावरणात् तस्माद्द्वितीयं द्विगुणं स्मृतम् ।
द्वितीयावरणात् तस्मात् तृतीयं त्रिगुणं स्मृतम् ॥

सर्वावरणविस्तारः प्रमुखे द्विगुणः स्मृतः ।

३.८.१९ —— —— —— द्वितीयाद्यावरण-द्वारमान-

क्रि. ३. ५०-२

विमानद्वारदिग्द्वारं प्रासादार्धसमुच्छ्रयम् ॥

अवकाशवशाद्द्वारं द्वितीयावरणादिषु ।
विमानगर्भगेहस्य स्नापनस्यालयस्य च ॥

तथैव यागशालायाः प्राकारेषु महानसे ।
द्वारमन्तर्मुखं विद्यादन्येषां तु बहिर्मुखम् ॥

---

*प्रासादसमम् ।

❋ प्राकारस्य ।

३.८.२० ——— ——— **प्रथमाद्यावरणकल्पन-**

य. ९. १-३१

अतः परं प्रवक्ष्यामि प्राकाराणां तु लक्षणम् ।
प्रासादार्धं समं वाथ अध्यर्थं द्विगुणं तथा ॥

प्रथमावरणे प्रोक्तं द्वितीये द्विगुणं तथा ।
तृतीये त्रिगुणं प्रोक्तं चतुर्थं तत्समं तथा ॥

पञ्चमं षष्ठं सप्तमं तृतीयेन समं बुधाः ।
अथवा हस्तमानं च त्रिधा स्यादुत्तमं क्रमात् ॥

आलयार्धं समं वाथ प्रथमावरणं स्मृतम् ।
द्वितीयं गर्भभूतं च धातुहस्ताधिकं क्रमात् ॥

तृतीयं भूतधातुश्च नवहस्ताधिकं बुधाः ।
तत्सप्तनवरुद्रं च कराधिकचतुर्थकम् ॥

पञ्चमं नवरुद्रं च त्रयोदशकराधिकम् ।
महामर्यादया तुल्यमन्यत् सर्वं विशेषतः ॥

चतुरश्रीकृते तस्मिन् पादाधिकमथापि वा ।
अध्यर्धं सत्रिपादं वा द्विगुणं त्रिगुणं तु वा ॥

चतुर्गुणं वा कर्तव्यं प्राकाराणां मुखायतम् ।
अन्तर्मण्डलमारभ्य दक्षिणे चोत्तरेऽथवा ॥

स्नपनार्थं यागशालार्थमास्थानार्थं च मण्डपान् ।
विस्तृतार्थं विनोदार्थमालयायामितस्य च ॥

प्रदक्षिणार्थं भक्तानां वर्धयेत् स्थपतिः शुचिः ।
त्रिहस्तं तत्समारभ्य द्विद्विहस्तविवर्धनात् ॥

पञ्चाशद्धस्तमानं स्यात् सप्तधा वृद्धिमानतः ।
पूर्वोक्तवत् क्रमाद्बाह्ये मङ्गलाय विवर्धनम् ॥

वर्धने नास्य दोषोऽस्ति क्षये दोषो भवेत् तथा ।
प्राकाराभ्यन्तरे चान्यदाश्रितालयमस्ति चेत् ॥

तद्विमानं समारभ्य तन्मानान्ते च कारयेत् ।
स्वयंभूः शंकरो वाथ हरिर्वान्ये च केचन ॥

आश्रिताः परिषद्देवानाश्रितांस्तान् विना चरेत् ।
भित्तिविष्कम्भमानं स्यात् प्रथमं हस्तमानकम् ॥

वर्गं च भागवद्धीरं सन्तमुत्प्रथमादिषु ।
अङ्गुल्या विषयान्तं च वर्धयेदुदयं ततः ॥

विष्कम्भं त्रिगुणं भागं विषयं चोच्छ्रयं क्रमात् ।
अष्टांशोनं ततश्चाग्रं भित्त्यभ्यन्तरमुत्तमम् ॥

मध्यमं भित्तिमध्यं स्याद्भित्तिबाह्यमथोऽधमम् ।
प्रथमावरणं हित्वा दक्षिणे चोत्तरेऽथवा ॥

क्षुद्रद्वारं च कर्तव्यं हीनेऽन्ये प्रथमेऽथवा ।
पश्चिमे वा यथा युक्त्या हीनं नेष्टं च सर्वदा ॥

यद्दिग्द्वारं विमानं तत् तद्दिग्द्वारं तथा चरेत् ।
प्रथमावरणे कुर्याद्द्वितीयादौ विशेषतः ॥

दिक्षु कोणेषु वा कुर्याद्दिशोर्मध्येऽथवा बुधः ।
मार्गो यस्यां दिशि द्वारं तद्दिशीति च केचन ॥

नेष्टं तत् प्रथमे विद्वानन्ययोश्चेति केचन ।
प्रथमेऽप्येवं कृतं चेद्राष्ट्रस्य कलहो भवेत् ॥

तयोः शिरांसि क्रमशश्छत्रस्याकृतिवच्चरेत् ।
साधिष्ठानादिकं श्रेष्ठं कनिष्ठमृजुभित्तिकम् ॥

प्राकाराणामुदीच्यां वा प्राच्यां वा दक्षिणेऽथवा ।
उपानाधश्च कर्तव्यं यथार्हं जलमार्गकम् ॥

भित्तियुक्तमयुक्तं वा बहुभूमियुतं तु वा ।
प्रथमावरणेऽशक्तौ मुखायामसमं बुधाः ॥

यथाभित्तिस्थितं तद्वत् तथाभित्तिं च कारयेत् ।
विमानपरितो मध्ये स्तम्भं चैव सभित्तिकम् ॥

कुर्यात् किंचिद्व्यवक्तत्त (विविक्तं तद्?) विश्वतः सममेव वा ।
विधिना भित्तिविष्कम्भं कारयेत् तन्निरुक्तवत् ॥

प्रासादोपानमारभ्य उत्तरान्तं यथोदयम् ।
धात्वंशे मसूरयुग्मं पादोच्चं भूतमेव वा ॥

षष्ट्यङ्गुलं समारभ्य षट्षडङ्गुलवर्धनात् ।
नवधाष्टोत्तरान्तं स्यात् तत्तन्मानाङ्गुलेन वै ॥

धात्वङ्गुलं समारभ्य चाम्बराङ्गुलवर्धनात् ।
तिथ्यङ्गुलान्तं नवधा पादविष्कम्भमुच्यते ॥

भित्तिपार्श्वस्थितान् स्तम्भान् भित्त्यर्धान्वितमाचरेत् ।
परितश्चोत्तराग्राणि प्रागुदगन्तं न्यसेत् क्रमात् ॥

सन्धिकर्म यथा कृत्वा वाजनं च यथाक्रमम् ।
तुलया च यथास्थाने विन्यसेत् तद्विचक्षणः ॥

अ. ६

अन्तश्चितमानं(?) स्यात् श्रेष्ठं चेद्भित्तिसंस्थितः ॥

बाह्ये चेत्कन्यसं विद्यान्मध्यमं मध्यमं भवेत् ।
हस्तमानं च विस्तारम् उत्सेधं प्रस्तरान्तिकम् ॥

ग्रीवान्तं वेदिकान्तं वा मूलादग्रं क्रमात् कृशम् ।
मार्गमण्डपसंयुक्तं वियुक्तं वा यथोचितम् ॥

दक्षिणे चोत्तरे वापि क्षुद्रद्वारयुतं भवेत् ।
अथ प्रासादमर्धं वा त्रिपादं पादमेव वा ॥

बहुभूमियुते तत्र मुखायामं तु पूर्ववत् ।
स्थानसंकटनाशार्थं मण्डपाद्यैः सकल्पनम् ॥

प्रथमावरणं भित्ति तस्य बाह्यैव चाचरेत् ।
द्वितीयावरणे न्यस्य भित्तिना तत्र रक्षयेत् ॥

पार्षदानामालयं च प्रथमे च समाचरेत् ।
न दोषाय भवेत् तेन कुड्यं वै प्रथमं विना ॥

द्वितीयावरणे भित्तिं व्यपोह्यैवाचरेत् तथा ।
यथाशोभं तथा कुर्यात् यथाशोभं यथादृढम् ॥

कर्तुरिच्छा यथामार्गं तथैव परिकल्पयेत् ।
द्वितीयावरणादीनि गोपुरादीन् विशेषतः ॥

वासाधिकारे यत्प्रोक्तं तथा तल्लक्षणान्वितम् ।

क्रि. ४. ६८,९

[अत्र प्रथमादिपञ्चमान्तानि आवरणानि अन्योन्यद्विगुणं प्रकल्पयेदिति निर्दिश्यते इति विशेषः ।]

खि. ७. ४९-५१

द्वितीयावरणं कुर्यात् पूर्वोक्तेन* विधानतः ।
खननं पूरणं चैव भूमेर्भित्त्यादि पूर्ववत् ॥

प्रथमावरणं यावत् तावन्मानं द्वितीयकम् ।
पुरस्ताद्द्विगुणं प्रोक्तम्- -- - - - - - - -॥

३.८.२१ ——— आलय❋ - अधमादि - प्राकारसंख्यानुरोधेन

वि. ११.५१

एकप्राकारमधमं✻ द्विप्रकारं मध्यमं त्रिप्रकारमुत्तमं स्यात् । त्रिप्राकारं मध्यमाधमं चतुष्प्राकारं मध्यममध्यमं पञ्चप्राकारं मध्यमोत्तमं स्यात् । पञ्चप्राकारमुत्तमाधमं षट्प्राकारमुत्तममध्यमं सप्तप्राकारमुत्तमोत्तमं स्यात् ।

स. ३६.८

[अत्र मध्यमाधम-मध्यममध्यम-मध्यमोत्तम उत्तमाधम-उत्तममध्यमानां निर्देशो नास्ति,चतुष्पञ्चषट्प्राकारयुतमुत्तमोत्तममिति निर्दिश्यते इति च विशेषः ।]

ज्ञा. ३९.७१

[अत्र सप्तप्राकारमत्युत्तममेकं त्वधमाधममिति निर्दिश्यते इति विशेषः ।]

---

* प्रथमावरणविधानेन ।

❋आलयविमानशब्दौ पर्यायवाचकौ ज्ञेयौ ।

✻- विमानमित्यध्याह्रियते ।

९. परिवारालयकल्पनम्

३.९.१ आलयनिर्माण-परिवारालयकल्पन-स्थान-

वि. ११.५४

परिवाराणामालयं मुखमण्डपं कूटं वा प्राकाराश्रयमेव कर्तव्यं पीठं चेदालयाश्रयमेव कारयेदित्येके ।

स. ९.१९

[अत्र परिवारालयं प्राकाराश्रयमेव कल्पयेदिति निर्दिश्यते इति विशेषः ।]

अ. ६

[अत्र आलयाश्रयमित्यस्य स्थाने गर्भागाराश्रितमिति निर्दिश्यते इति विशेषः ।]

य. १०.३०

३.९.२ ——— ——— परिवारालयस्वरूप-

अ. ६

दक्षिणोत्तरमायामं यथाशोभं यथोचितम् ॥

षड्वर्गसहितं कुर्यात् चतुर्वर्गमथापि वा ।
प्रस्तरग्रीवसंयुक्तं कारयेत् तानि च क्रमात् ॥

३.९.३ ——— ——— परिवारालय - उत्तम-

वि. ११.५४

परिवाराणां ध्रुवकौतुकसंयुक्तमुत्तमम् ।

अ. ६

[अत्र उत्तममित्यस्य स्थाने श्रेष्ठमिति निर्दिश्यते इति विशेषः ।]

क्रि. ५.३११
नि. ९

प्र. ७.२
[अत्र वर्णयुक्तं ततः श्रेष्ठमिति निर्दिश्यते इति विशेषः ।]
य. १०.२८

[अत्र अर्चनाधिकारवत् ।]

३.९.४ ——— ——— ——— मध्यम-

वि. ११.५४

कौतुकं विना तत्स्थाने पीठं कृत्वार्चयेन्मध्यमम् ।

अ. ६

[अत्र कौतुकं वर्णसंयुक्तं पीठे पूजनं मध्यमम् इति निर्दिश्यते इति विशेषः ।]

क्रि. ५.३११

[अत्र एकबेरं तु मध्यमम् इति निर्दिश्यते इति विशेषः ।]

नि. ९

[अत्र चित्रार्धमेकबेरं वा ध्रुवबेरं तु मध्यमम् इति निर्दिश्यते इति विशेषः ।]

य. १०. २८,९

३.९.५ ——— ——— ——— अधम-

वि. ११.५४

आलयं ध्रुवकौतुकं च विना यथोक्ते देशे शैलान्यैष्टकानि वा मानाङ्गुलेन मात्राङ्गुलेन वा द्वादशाङ्गुलोत्सेधानि तद्द्विगुणायतविस्ताराणि त्रिवेदिसहितानि पीठानि कुर्यात् । अथवा एकवेदिकं यथालाभप्रमाणेन पीठं कृत्वा कारयेदिति केचित् । एतदधममार्गार्चनं स्यात् ।

अ.६

[अत्र कन्यसं वर्णहीनं तु तत्पीठार्चनमिति निर्दिश्यते इति विशेषः ।]

क्रि. ५.३१२

[अत्र भागतालोन्नताभिः तिसृभिः वेदिभिर्युतं हस्तविस्तारसंयुक्तं पीठं कृत्वा तत्रार्चनम् अधममिति निर्दिश्यते इति विशेषः ।]

नि. ९

[अत्र अधमं पीठमिति निर्दिश्यते इति विशेषः ।]

प्र. ७.२

[अत्र अर्चनाधिकारवत् ।]

य. १०.२९

[अत्र पूर्ववत् ।]

३.९.६ ——— ——— अशक्तविषय-

स. ९.२४

अशक्तः परिवाराणामालयं प्रतिमां विना ।
देशे यथोक्ते सर्वेषां पीठं तत्रैव कारयेत् ॥

अ. ६

कारयेदथवा सर्वं वर्णहीनं शिलामयम् ॥

अशक्तं प्रतिमाभावं यथोक्तस्थानयोर्द्विधा ।
इष्टकां शैलजादीनि यथायोग्यं च कारयेत् ॥

य. १०.२९

[अत्र अर्चनाधिकारवत् ।]

३.९.७ —— —— परिवारालयमान-

वि. ११.५४

अथ परिवाराणामालयं गर्भव्याससमं पादहीनमर्धं वा अथवा त्रिहस्तं पञ्चहस्तं वा मुखमण्डपसहितं स्थापयेत् ।

स. ९.२३

[अत्र मूलालयस्यार्धं त्रिहस्तं वा परिवारालयं कारयेदिति निर्दिश्यते इति विशेषः ।]

अ. ६

[अत्र गर्भतारार्धं पादहीनं तदर्धं वा परिवारालयं कारयेदिति निर्दिश्यते इति विशेषः ।]

खि. ७.४०

[अत्र प्रासादार्धसमुत्सेधः प्राकारोन्नतः कपोतोन्नतः मण्डपोन्नतो वा परिवारालय इति निर्दिश्यते इति विशेषः ।]

नि. ९

[अत्र पार्षदां पञ्चहस्तालयं कुर्यादिति निर्दिश्यते इति विशेषः ।]

प्र. ७.१

[अत्र विमानात् पादहीनं वा तदर्धं वा परिवारालयं कारयेदिति निर्दिश्यते इति विशेषः ।]

य. १०.२७

[अत्र विमानार्धं समं पादहीनं वा परिवारालयं कुर्यादिति निर्दिश्यते इति विशेषः ।]

३.९.८ —— —— परिवारालय-मूलधामाभिमुख्य-

वि. १२.५६

परिवाराणामालयं- - - - - -मूलधामप्रेक्षं- - - - आरभेत ।

३.९.९ —— —— परिवारदेवता-अधमाधमकल्प-

वि. १४.६५

आलयान्तर्गतदेवा द्वारदेवा द्वारपालाश्च सर्वत्र समाना उच्यन्ते । विष्वक्सेनगरुड-श्रीभूतन्यक्षभूतपीठानि एते पञ्च परिवारा अधमाधमम् ।

स. ११. १,२

विष्वक्सेनश्च गरुडो भूतपीठस्त्रयस्तथा ॥

परिवार इति प्रोक्तो देवेशस्याधमाधमे ।

३.९.१० —— —— —— अधममध्यमकल्प-

वि. १४.६५ ❋

एतैः सार्धमिन्द्रादि(दिग्)देवा भास्करः प्रमुखे चक्रशङ्खौ च एते षोडशपरिवारा अधममध्यमम् ।

❋ अधमाधमकल्पोक्तैः पञ्चभिः परिवारैः ।

स. ११. २,३

★पूर्वोक्तैः सहितं न्यक्षश्रीभूतं चैव पञ्चशः ॥

परिवारानिति प्राहुरेतानधममध्यमे ।

३.९.११ —— —— —— अधमोत्तमकल्प-

वि. १४.६५,६

☆एतैः सहिता: विवस्वन्मित्रक्षत्तारः अभिमुखे ध्वजयूथाधिपौ च एकविंशतिदेवा अधमोत्तमम् ।

स. ११. ३,४

अष्टाविन्द्रादिदिग्देवा भास्करेण समायुताः ॥

विवस्वन्मित्रक्षत्तारौ परिवारविधावथ ।

देवाः सप्तदश प्रोक्ताः ❋पूर्वोक्तैरधमोत्तमे ॥

३.९.१२ —— —— —— मध्यमाधमकल्प-

वि. १४.६६

⁂एतैः सहिताः सिद्धिश्रीहविःपालकस्कन्दविघ्नेशसप्त*मातृपुरुषज्येष्ठाभार्गवब्रह्मचन्द्राश्चैते द्वात्रिंशद्देवा मध्यमाधमम् ।

स. ११. ५,६

★ अधमाधमकल्पोक्तैस्त्रिभिः परिवारैः ।

☆ अधममध्यमकल्पोक्तैः षोडशभिः ।

❋ अधममध्यमकल्पोक्तैः पञ्चभिः ।

⁂ अधमोत्तमकल्पोक्तैः एकविंशतिसंख्याकैः ।

* सप्तमातृशब्देन सप्तमातॄणां समूह एक एव स्वीकरणीयः ।

तथैव देवैः पूर्वोक्तैः[❋] परिवारैर्यथाविधि ।
प्रथमावरणंद्वाग्राद्बाह्ये चोभयपार्श्वतः ।।

विघ्नेशं नागराजं च कल्पयेद्द्वे यथाक्रमम् ।
एकोनविंशतिः प्रोक्ता देवा वै मध्यमाधमे ।।

३.९.१३ —— —— —— मध्यममध्यमकल्प-

वि. १४.६६

[★]एतैः सह तृतीयावरणे भास्कराङ्गारकस्कन्ददुर्गासप्तरोहिणी[☆]मन्दसप्तमातृबुधबृहस्पतिपुरुषाश्चैते द्विचत्वारिंशद्देवा मध्यममध्यमम् ।

स. ११. ९-१४

महेन्द्रं श्रियमग्निं च पश्चिमाभिमुखान् क्रमात् ।
हविःपालं तथा स्कन्दं यमं विघ्नेशमेव च ।।

उत्तराभिमुखानेतान् दक्षिणाभित्तिमाश्रितान् ।
निर्ऋतिं सप्तमातॄंश्च विष्णुं वरुणमेव च ।।

ज्येष्ठां वायुं तथा चैतान् प्राङ्मुखानेव कल्पयेत् ।
तथा भृगुं च ब्रह्माणं कुबेरं रुद्रमेव च ।।

तथैव विष्वक्सेनं च दक्षिणाभिमुखान् क्रमात् ।
दुर्गां सरस्वतीं चापि पश्चिमाभिमुखीं न्यसेत् ।।

गरुडेन युतान् देवान् एकविंशतिकान् विदुः ।
प्रथमावरणे चैवं देवानेतान् प्रकल्पयेत् ।।

❋ अधमोत्तमकल्पोक्तैः सप्तदशसंख्याकैः ।

★ मध्यमाधमकल्पोक्तैः द्वात्रिंशत्संख्याकैः ।

☆ सप्तरोहिणीशब्देन सप्तरोहिणीनां समूहः एक एव स्वीकरणीयः ।

मध्यमे मध्यमं चैतन्मार्गमाहुस्तपोधनाः ।

३.९.१४ ——— ——— ——— मध्यमोत्तमकल्प-

वि. १४.६६

*एतैः सह ज्येष्ठाशुक्रगङ्गासप्तर्षिब्रह्मचन्द्ररुद्राश्विकपिलपञ्चभूतसरस्वत्यश्च एते मध्यमोत्तमम् ।

स. ११. १४-२३

प्रथमावरणे देवानिन्द्रादींश्चाष्ट भास्करम् ॥

नवैतान् विधिना प्रोक्तान् द्वितीयावरणे क्रमात् ।
दक्षिणे पूर्वद्वारस्य स्कन्दं भौमं श्रियं तथा ॥

भूदेवीं हविःपालं पश्चिमाभिमुखानिमान् ।
अग्निं दुर्गां च विघ्नेशं रोहिणीं सप्तसंयुताम् ॥

ऋतून् देवांश्च मन्दं च मातृसप्तकसंयुतान् ।
उत्तराभिमुखानेतान् कल्पयेत यथाक्रमम् ॥

नरं धर्मं बुधं धात्रीं विष्णुं ज्येष्ठां सुरप्रियाम् ।
व्याहृतिं पुष्पपालं च प्राङ्मुखानेव कल्पयेत् ॥

गङ्गामपि मुनीन् सप्त ब्रह्माणं सोममेव च ।
दस्रौ तथा भवानीशं विष्वक्सेनमपि क्रमात् ॥

तथा पञ्च महाभूतान् दक्षिणाभिमुखानिमान् ।
सरस्वतीं मनुं चैव हरिं शंकरमेव च ॥

---

* मध्यममध्यमकल्पोक्तैः द्विचत्वारिंशत्संख्याकैः ।

हरिणीं गरुडं चैव कल्पयेत् पश्चिमामुखान् ।
द्वितीयावरणे चैतांश्चतुस्त्रिंशच्च कल्पयेत् ॥

विघ्नेशं नागराजं च द्वारपार्श्वे प्रकल्प्य च ।
प्रमुखे च तथा तत्र ध्वजं शङ्खं प्रकल्पयेत् ॥

चत्वारिंशत् तथाष्टौ च देवताः परिकीर्तिताः ।
मध्यमोत्तममार्गं तु प्राहुरेनं पुरातनाः ॥

३.९.१५ —— —— —— उत्तमाधमकल्प-

वि. १४.६६

*एतैः सह चतुर्थावरणे पृथिव्या तु नरधर्मदात्रीसुरप्रियापुष्पेशव्याहृतिदस्रभावमनुहरिशाङ्कराश्चेतेऽप्युत्तमाधमम् ।

स. ११. २४,३५

देवाभिमुखं ब्रह्माणं ब्रह्मस्थाने प्रकल्प्य च ।
प्रथमावरणेऽष्टौ च दिग्देवान् भास्करं तथा ॥

नव देवान् प्रकल्प्यैव द्वितीयावरणे तथा ।
भौमं श्रियं हविःपालं पश्चिमाभिमुखानिमान् ॥

स्कन्दं दुर्गां च मन्दं च विश्वकर्माणमेव च ।
रोहिणीं सप्तसंयुक्तां बृहस्पतिमपि क्रमात् ॥

मातृसप्तकसंयुक्तांश्चोत्तराभिमुखान् क्रमात् ।
बुधं धात्रीं च पुरुषं मित्रं ज्येष्ठां कविं तथा ॥

पुष्पपालमिमान् देवान् प्राङ्मुखानेव कल्पयेत् ।
गङ्गां महामुनीन् सप्त ब्रह्माणं च तथैव च ॥

---

* मध्यमोत्तमकल्पोक्तैः परिवारैः ।

क्षत्तारमपि सोमं च महाभूतं महीमपि ।
विष्वक्सेनं च रुद्रं च दक्षिणाभिमुखान् पुनः ॥

बलिपालं च वाग्देवीं न्यक्षं प्रत्यङ्मुखानिमान् ।
गरुडं पूर्ववत् कुर्यात् त्रिंशद्देवानिमान् विदुः ॥

तद्बाह्ये पूर्ववद्विघ्नं नागराजं च कल्पयेत् ।
दक्षिणोत्तरपार्श्वस्थावन्योन्यमभिवीक्षकौ ॥

शक्त्यादिदक्षिणस्थाने शङ्खचक्रौ च कारयेत् ।
तच्चक्रोत्तरतः पार्श्वे शार्ङ्गादीन् कारयेत् क्रमात् ॥

तस्माद्बहिर्ध्वजं कुर्याद्दक्षिणे दन्तिनायकम् ।
तद्ध्वजस्योत्तरे शालं(लां?) कृत्वा तत्र रथं न्यसेत् ॥

तस्माद्बहिस्तथा शङ्खं दक्षिणेऽप्यक्षहं तथा ।
शङ्खस्योत्तरतः स्थाने चक्रं च परिकल्पयेत् ॥

देवानेकादशैतांश्च कल्पयेदिति शासनम् ।
उत्तमाधममित्येवं मार्गमाहुर्मनीषिणः ॥

३.९.१६ ——— ——— ——— उत्तममध्यमकल्प-

वि. १४.६६

एतैः★ सह एकादशरुद्रा द्वादशादित्या एते चोत्तममध्यमम् ।

स. ११. ३६-४८

प्रथमावरणे देवान् षण्मुखान्तान् यथाक्रमम् ।
रविमिन्द्रं तथैवाग्निं पश्चिमाभिमुखानिमान् ॥

★ उत्तमाधमकल्पोक्तैः परिवारैः ।

भौमं यमं च मन्दं च दक्षिणे चोत्तरामुखान् ।
निर्ऋतिं त्रिदशाचार्यं पुरुषं वरुणं तथा ॥

बुधं ध्रुवं च वायुं च प्राङ्मुखानेव कारयेत् ।
गङ्गां शुक्रं कुबेरं च सोमं रुद्रं तथैव च ॥

दक्षिणाभिमुखान् कुर्यादुत्तरे भित्तिपार्श्वतः ।
ईशमुत्तानपादं च वेदषष्टिं प्रियं तथा ॥

पश्चिमाभिमुखान् कुर्याद्द्वाविंशदेवतास्त्विमाः ।
द्वितीयावरणे देवान् वक्ष्यमाणांस्तु कल्पयेत् ॥

तथा न्यक्षं सुरादेवीं श्रियं च हविरक्षकम् ।
पश्चिमाभिमुखान् कृत्वा विघ्नेशं पुष्परक्षकम् ॥

दुर्गामपि विवस्वन्तं रोहिणीं सप्तसंयुताम् ।
मातॄस्तथैव सप्तैतानुत्तराभिमुखान् क्रमात् ॥

संध्यां च वादिकं काळं रमणं धात्रिमेव च ।
तथा भृशाश्वं ज्येष्ठां च मायामपि च नारदम् ॥

प्राङ्मुखानेव कृत्वैव ब्रह्माणं ऋषिसप्तकान् ।
क्षत्तारं दक्षिणे भित्तौ वरुणं पञ्चभूतकान् ॥

महीं च विष्वक्सेनं च नासत्यं दक्षिणामुखान् ।
व्याहृतिं च स्वधां स्वाहां कारयेत् पश्चिमामुखाः ॥

गरुडेन युतास्त्वेता[★]स्त्रयस्त्रिंशच्च देवताः ।
एकादश च पूर्वोक्तान् देवानपि च कल्पयेत् ॥

एकस्यां दिशि ये देवाः प्रोक्तास्तांस्तत्र युक्तितः ।
समभागं च कृत्वैव कारयेत यथाक्रमम् ॥

[★] परिगणने तु एकत्रिंशदेवोपलभ्यन्ते ।

एकादशापि पूर्वोक्तैः षट्षष्टिर्देवताः स्मृताः ।
एवमेव क्रमेणैव कुर्यादुत्तममध्यमम् ॥

३.९.१७ ——— ——— ——— **उत्तमोत्तमकल्प-**

वि.★ १४.६६

एतैः सह बलिरक्षकवसुजया दश एते चोत्तमोत्तममिति ।

स. ११. ४९-६१

प्रथमावरणे देवानिन्द्रादीन् लोकपालकान् ।
कल्पयित्वा रविस्थाने प्रह्लादं तत्र कल्पयेत् ॥

विपर्यये तु द्वारस्य वामपार्श्वे प्रकल्पयेत् ।
द्वितीयावरणे सूर्यं भौमं स्कन्दं तथैव च ॥

पश्चिमाभिमुखान् कृत्वा काश्यपं मन्दमेव च ।
गुरुं चोदङ्मुखान् विद्यात् धर्मः सौम्यं हरिं पुनः ॥

शुक्रं ध्रुवं च वेदांस्तु पश्चिमाभिमुखान् विदुः ।
गङ्गां सोमं स्मरं चैतान् दक्षिणाभिमुखानपि ॥

रुद्रमुत्तानपादं च देवान् वै पश्चिमामुखान् ।
देवान् ☆सप्तदशैतांस्तु कारयेत यथाक्रमम् ॥

तृतीयावरणे न्यक्षं सुरां पद्मं च पावकम् ।
पश्चिमाभिमुखान् कृत्वा विघ्नेशं पुष्पदन्तकम् ॥

भौमं दुर्गां तथा सप्तरोहिणीसंयुतां क्रमात् ।
विवस्वन्तं तथा मातॄरुत्तराभिमुखानिमान् ॥

★ उत्तममध्यमकल्पोक्तैः परिवारैः ।

☆ परिगणने सप्तत्रिंशत् उपलभ्यन्ते ।

पर्जन्यं च तथा संध्यां वादिकं कालमेव वै ।
प्रजापतिं तथा मित्रं श्रीदेवीं च भृशाश्वकम् ॥

ज्येष्ठामपि तथा मायां नारदं प्राङ्मुखं विदुः ।
ऋषींश्च सप्त ब्रह्माणं क्षत्तारं दक्षमेव च ॥

तीर्थमप्यरुणं शान्तं महाभूतं महीमपि ।
सतीं चोत्तरपार्श्वे तु दक्षिणाभिमुखान् विदुः ॥

दस्रं च व्याहृतिं सिद्धिं स्वाहां वै पश्चिमामुखाम् ।
गरुडेन युतान् देवांश्चतुस्त्रिंशदिमान् विदुः ॥

पूर्ववद्वै बहिर्देवानेकादश च कल्पयेत् ।
विष्णुभूतयुतान् देवान् परिवारान् द्विसप्ततिः ॥

उत्तमोत्तममोर्गेण परिवारानिमान् विदुः ।
समर्थश्चोत्तमं कुर्यादसमर्थोऽधमं चरेत् ॥

३.९.१८ —— —— —— मध्यममध्यमादिकल्पपञ्चक-
अशक्तविषय-

स. ११. ७,८

तथा मध्यममध्ये च मध्यमस्योत्तमेऽपि च ।
उत्तमेऽप्यधमे मध्ये चोत्तमेषु च पञ्चसु ॥
☆तथैकोनविंशतिभिश्चक्रध्वजधरान(अ ?)पि ।
द्वात्रिं(विं ?)शदिति देवांस्तानशक्तः कल्पयेदिति ॥

☆ मध्यमाधमकल्पोक्तपरिवारवत् ।

३.९.१९ —— —— —— आश्रितालयक - प्रथमावरण-

अ. ६

प्रथमावरणे न्यस्येदाश्रितालयसंभवे ॥

ब्रह्मभागे हरिर्वाथ दुर्गा लक्ष्मीः सरस्वती ।
आश्रितानि च एतानि न चान्यपार्षदानि च ॥

तद्दिक्प्राकारमाने तु आश्रितालयपार्श्वतः ।
अन्यानि पार्षदानां च तस्माद्देवस्य वर्धयेत् ॥

अन्यदावरणं चैव वर्धयेदाश्रितं प्रति ।

३.९.२० —— —— प्रथमावरण-श्रीभूतादिपरिवारस्थान-

वि. १२. ५६-८

मुखमण्डपसोपानयोर्मध्ये श्रीभूतं प्रथमावरणाद्यग्रायामं चतुर्धा कृत्वा सर्वत्रापि तृतीयांशे श्रीभूतगरुडचक्रध्वजशङ्खमहाभूताक्षहन्तान् क्रमेण परिकल्पयेत् । अथवा द्वितीयावरणे द्वितीयांशे गरुडं तृतीयांशे चक्रं तृतीयावरणे द्वितीयांशे शङ्खं तृतीयांशे ध्वजं चतुर्थावरणे तृतीयांशे यूथाधिपं पञ्चमावरणे तृतीयांशेऽक्षहन्तम्। अथवा गोपुराद्बाह्ये प्रासादस्यार्धसमायामं नीत्वा तत्रैव अक्षहन्तस्य पीठं परिकल्पयेत् । अथवा सर्वत्र प्रथमावरणाद्यङ्कणस्याग्रायामं चतुर्धा कृत्वा विमानपार्श्वादिद्वितीयांशे गरुडं तृतीयांशे बलिपीठं च कल्पयेदिति केचित्। - - - - - - सोमेशानयोरन्तरे विष्वक्सेनं प्रथमावरणाद्यङ्कणे चतुर्भागद्विभागे श्रीभूतगरुडचक्रशङ्खध्वजयूथाधिपाक्षहन्तानेताननपायिनश्च तत्तत्सूत्रे संयोज्यैवार्चयेदिति केचित् । प्रथमावरणे द्वितीये वा प्रागादीशानान्तम् इन्द्रादीन् प्राग्द्वारादि द्वारदक्षिणपार्श्वेषु कोणेषु च - - - - - - - - -।

स. ९. १५-९,३४

प्रमुखे तत्र विस्तारं त्रिभागं परिकल्प्य च ।
तत्पश्चिमाद्द्विभागं स्यात् पूर्वभागस्य चान्तरम् ॥

स देशो गरुडस्योक्तस्तत्सूत्रे पश्चिमाश्रिते ।
कुबेरेशानयोर्मध्ये चोत्तरे भित्तिपार्श्वतः ॥

विष्वक्सेनस्य देशः स्यात् प्राच्यां द्वारस्य दक्षिणे ।
इन्द्रस्याग्नेस्तथाग्नेय्यां याम्ये चैव यमस्य च ॥

नैर्ऋत्यां निर्ऋतेः स्थानं वारुण्यां वरुणस्य च ।
वायुदेशे तु वायोश्च सौम्ये सोमस्य चोच्यते ॥

ईशस्यैशान्यकोणे तु दक्षिणे भास्करस्य तु ।
- - - - - - - - - - - - - - - - -।
विष्वक्सेनं तथेन्द्रादीन् तत्तद्दिक्ष्वेव कल्पयेत् ॥

अ. ६

कुबेरेशानयोर्मध्ये स्थानं तदमितस्य च ।
नवहस्तं प्रकल्प्यैव पञ्चहस्तमथापि वा ॥

ब्रह्मसूत्रात् समीपे चेत् वामे तद्भागहीनतः ।
श्रीमह्योः भूतहस्तं वा सूत्रेशस्य प्रकल्पयेत् ॥

प्रथमावरणे धीमान् यदि कुर्यात् समीपतः ।
यथाशोभं यथारक्षं कारयेच्छान्तमन्दिरम् ॥

खि. ७.३४-९,४१,८,१

द्वारस्य दक्षिणे पार्श्वे इन्द्रस्थानं प्रकल्पयेत् ।
आग्नेय्यां स्थानमग्नेश्च यमं याम्ये प्रकल्पयेत् ॥

नैर्ऋत्यां निर्ऋतेः स्थानं वारुण्यां वरुणालयम् ।
वायुस्थानं च वायव्यां सौम्ये सोमं प्रकल्पयेत् ॥

ईशानं च तथैशान्ये स्थापयेत् विधानतः ।
ईशानमिन्द्रमग्निं च स्थापयेत् पश्चिमामुखान् ॥

उत्तराभिमुखं कुर्याद्यमं याम्ये समर्चयेत् ।
निर्ऋतिं वरुणं चैव वायुं वै प्राङ्मुखांश्चरेत् ॥

दक्षिणाभिमुखं सौम्ये सोमं संस्थाप्य चार्चयेत् ।
दक्षिणाभिमुखं शान्तमासीनं सम्यगाचरेत् ॥

इन्द्रादीनां च सर्वेषां विष्वक्सेनेन चैव हि ।
आलयं संप्रकुर्वीत प्रथमावरणेऽपि वा ॥
- - - - - - - - - - - - - - --॥

गोपुरेशानयोर्मध्ये भास्करं सम्यगर्चयेत् ।
- - - - - - - - - - - - - - - - -॥

गोपुरात्तु बहिः पार्श्वे दक्षिणे विघ्नमर्चयेत् ।
वामे तु नागराजं च आलयस्थं समर्चयेत् ॥

एवमेव प्रकारेण प्रथमावारणे चरेत् ।

नि. ९

सद्मगोपुरयोर्मध्ये गरुडस्थानमुच्यते ॥

तत्सूत्रात् पश्चिमे चैव चोत्तरेऽमितमाचरेत् ।
द्वारस्य दक्षिणे भागे चैन्द्रस्थानमुदाहृतम् ।
पावकस्थानमाग्नेय्यां यमं याम्ये तु कल्पयेत् ॥

नीलस्थानं च नैर्ऋत्यां वारुण्यां वरुणस्य च ।
वायव्यमालयं वायोः सौम्ये यज्ञं तथैव च ॥

ऐशान्ये तु भवं चैव - - - - ततेत्रयोः(?) ।
आदित्यस्थानमेवं च कल्पयेद्गोपुरोत्तरात् ।
भवं च भास्करं चेन्द्रं पावकं पश्चिमामुखम् ॥

उत्तराभिमुखं कृत्वा मध्यस्थं च समर्चयेत् ।
नीलं प्रचेतसं चैव जवनं प्राङ्मुखं बुधः ॥

उत्तरे सोमसूत्रस्य विष्वक्सेनं तथैव च ।
इन्द्रादिलोकपालांश्च गरुडं शान्तभास्करम् ॥

प्रथमावरणे कुर्याद्द्वारदक्षिणवामयोः ।
- - - - - - - - - - - - - - - - -॥

विभवानुरूपमालक्ष्य द्वितीये प्रथमेऽपि वा ।
परिवारभूतस्थानानि कल्पयेत विचक्षणः ॥

स्वामिरूपं समीक्ष्यैव गरुडं संप्रकल्पयेत् ।
श्रीभूतं च तथा चक्रं ध्वजं शङ्खं तथैव च ॥

यूथाधिपं तथा चैव कल्पयेत् तु बहिर्मुखान् ।
ये देवाः पुरतः प्रोक्ताः विष्वक्सेनं तथैव च ॥

मनीषिणस्तथा सर्वे तानाहुरनपायिनः ।

प्र. ७.२, ७-९

सोमेशानद्वयोर्मध्ये विष्वक्सेनं प्रकल्पयेत् ॥
- - - - - - - - - - - - - - - - -॥

विमानपालान् दिक्पालान् भास्करेण समायुतम् ।
चक्रं ध्वजं च शङ्खं च भूतं वै भूतनायकम् ॥

प्रथमावरणे देवान् तत्तद्देशे समर्चयेत् ।
उत्सवं बलिमारभ्य अनपायिविशेषतः ॥

अमितस्यापि तं तत्र प्रदक्षिणमथाचरेत् ।

य. १०.२१-६

अर्चयेत् प्रमुखे वीशं द्वारे वै प्रथमस्य तु ॥

दक्षिणोत्तरयोर्बाह्ये किष्किन्धं तीर्थमेव च ।
किष्किन्धदक्षिणे चेन्द्रम् आग्नेय्यामग्निमेव च ॥

याम्यां यमं च नैर्ऋत्यां निर्ऋतिं वरुणं तथा ।
वायव्यां जवनं सौम्ये सोममीशं च तद्दिशि ॥

द्वितीयावरणेऽभ्यर्च्य तद्धीने प्रथमेऽथवा ।
चक्रं ध्वजं च शङ्खं च भूतं वै भूतनायकम् ॥

तत्तत्स्थाने समभ्यर्च्य तत्तदावरणे बुधाः ।
अर्चयेत् तन्निरुक्तोक्तक्रमेण प्रथमेऽथवा ॥

विमानपालदिक्पालान् हीनेऽन्ये प्रथमेऽर्चयेत् ।
निरुक्तोक्तक्रमेणैव परिवारान् समर्चयेत् ॥

३.९.२१ ——— ——— द्वितीयावरण-भास्करादिपरिवारस्थान-

वि. १२.५८

द्वितीये - - - - - - - -प्राग्द्वारादुत्तरे भास्करमिन्द्रात् दक्षिणाद्यन्तराले चन्द्राङ्गारकबुधबृहस्पतिकाव्यमन्दराहुकेतूनेतान् ग्रहांश्च ।

स. ९.२९-३४

द्वितीयावरणे वाथ तृतीयावरणे तथा ।
चतुर्थावरणे वापि यावत्प्रमुखविस्तृति ॥

तद्विस्तारं त्रिभागं तु कृत्वा तत्र च तत्र च ।
द्विभागं पश्चिमे हित्वा महाभूतस्य तत्र वै ॥

देवालयस्याधिष्ठानसमं पीठं प्रकल्पयेत् ।
तत्पीठात् पश्चिमे चक्रं ध्वजं शङ्खं च कारयेत् ॥

द्वितीयावरणे तद्वत् द्विभागं संव्यपोह्य च ।
तत्र चक्रं प्रकल्प्यैव तृतीये वा चतुर्थके ॥

ध्वजं शङ्खं तथा वीशं पूर्ववत् परिकल्पयेत् ।
ये देवाः प्रमुखे प्रोक्तास्तानाहुरनपायिनः ॥

दक्षिणादिशि द्वारे तान् न कुर्यात् प्रमुखे तथा ।

खि. ७. ५६-६३

द्वितीयावरणे कुर्यात् पूर्वोक्तेन विधानतः ।
भौममैन्द्रे प्रकुर्वीत आग्नेय्यां तु शनैश्चरम् ॥

याम्ये बृहस्पतिं कुर्यान्नैर्ऋत्यां तु बुधं चरेत् ।
वारुण्यां शुक्र उद्दिष्टः जाह्नवी वायुगोचरे ॥

सौम्ये सोमं प्रकुर्वीत ऐशान्यां सूर्यमेव च ।
यमाग्न्योर्मध्यमे स्थाने श्रीदेवीं सम्यगर्चयेत् ॥

यमनैर्ऋतयोर्मध्ये रोहिणीमपि पूजयेत् ।
नीलवारुणयोर्मध्ये धात्रीं चैव समर्चयेत् ॥

वरुणोदानयोर्मध्ये ज्येष्ठां सम्यक् सुपूजयेत् ।
धनदोदानयोर्मध्ये ऋषीनपि सुपूजयेत् ॥

धनदेशानयोर्मध्ये भूम्यादीन् स्थापयेत् क्रमात् ।
सुरेन्द्रेशानयोर्मध्ये धिषणां सम्यगर्चयेत् ॥

किंचिद्दक्षिणमाश्रित्य ऐन्द्रद्वारस्य दक्षिणे ।
सुब्रह्मण्यं समुद्दिश्य आलयं परिकल्पयेत् ॥

यमाग्न्योरन्तरे चैव दुर्गां चैव समर्चयेत् ।
त्रिहस्तमालयं कुर्यात् सर्वालंकारसंयुतम् ॥

नि. ९

द्वितीयावरणे चैन्द्रे रविस्थानमुदाहृतम् ॥

तस्यैव किंचिदाश्रित्य दक्षिणेन धरासुतम् ।
आग्नेय्यां सूर्यपुत्रं च गुरुं याम्ये प्रकल्पयेत् ॥

श्रविष्टं चैव नैर्ऋत्यां वारुण्यां परिसर्पिणम् ।
वायव्यां जाह्नवीं चैव यज्ञाङ्गं चैव सौम्यके ॥

ऐशान्ये रुद्रमेव स्यात् स्थापयेत विधानतः ।
रुद्रं रविं तथा भौमं मन्दं वै पश्चिमामुखम् ॥

उत्तराभिमुखं तैष्यं श्रविष्ठं परिसर्पिणम् ।
जाह्नवीं प्राङ्मुखां कृत्वा यज्ञाङ्गं दक्षिणामुखम् ।
- - - - - - - - - - - - - - - - - -॥

द्वितीयावरणे चैव प्राङ्मुखे सूत्रमध्यतः ।
चक्रस्थानं - - - - - - - - - - -॥

३.९.२२ ——— ——— तृतीयावरण-गङ्गादिपरिवारस्थान-

वि. १२.५८

तृतीयावरणे गङ्गायमुनानर्मदासिन्धूः प्रागादिचतुर्दिक्षु तत्तद्द्वारदक्षिणपार्श्वे पूर्वद्वारोत्तरे दुर्गाम् आग्नेयादिषु कोणेषु सिद्धिं श्रियं ज्येष्ठां धात्रीं च अन्तराले सुधासुन्दरीसुव(स्वा?)हास्वधामायासंह्लादिनीराकासिनीवालीश्च

नि. ९

तृतीयावरणे प्राच्यां ब्रह्मसूत्रात् तु दक्षिणे ।
गुहस्थानं प्रकल्प्यैव आग्नेय्यां हविरक्षकम् ॥

यमपावकयोर्मध्ये यागस्थानं प्रकल्पयेत् ।
प्रेतेशनीलयोर्मध्ये रोहिणीं संप्रकल्पयेत् ॥

नीलवारुणयोर्मध्ये मातॄणां स्थानमेव च ।
वरुणोदानयोर्मध्ये ज्येष्ठावासं प्रकल्पयेत् ॥

सोमोदानकयोर्मध्ये ऋषीणां स्थानमाचरेत् ।
सोमेशानकयोर्मध्ये पुष्परक्षकमाचरेत् ॥

इन्द्रेशानकयोर्मध्ये ज्येष्ठावासं प्रकल्पयेत् ।
गुहादीनं मुखाः सर्वे रुद्रादिमुखवन्मुखान् ॥

३.९.२३ ——— ——— चतुर्थावरण-गविष्ठादिपरिवारस्थान-

वि. १२.५८

चतुर्थावरणे पूर्वद्वारोत्तरे गविष्ठं दक्षिणे पृथिवीं पश्चिमे दक्षिणे अग्निम् उत्तरे वायुं च आग्नेय्यादिषु कोणेषु ऋग्यजुःसामाथर्वणश्च अन्तराले शिवं विष्णुं तक्षकं शुभं भूतनायकं पवित्रं पावनं क्षितिजं च ।

नि. ९

चतुर्थावरणे चैव शङ्खस्थानं प्रकल्पयेत् ।

३.९.२४ ——— ——— पञ्चमावरण-चक्रादिपरिवारस्थान-

वि. १२.५८,९

पञ्चमावरणे पूर्वद्वारोत्तरे चक्रं ह्रीमनुमतिं दक्षिणे ब्रह्माण्याद्याः सप्तमातृः पश्चिमे जयाद्यप्सरसश्च उत्तरे कुण्ठिन्यादिसप्तरोहिणीश्च आग्नेयादिकोणेषु वत्सरादीन् प्राणा(दीन् म)रुतः(?) शतरुद्रानन्तराले वा ईशानेन्द्रयोरन्तराले अजैकपदम् एकादशरुद्रादीन् इन्द्राग्न्योरन्तराले धात्रादिद्वादशादित्यान् यमाग्नेययोरन्तरे गन्धर्वान् यमनीलयोर्मध्ये मुनीन् नीलवरुणयोर्मध्ये अमृतजान् वरुणोदानयोर्मध्ये अश्विनौ सोमोदानयोर्मध्ये विद्याधरांश्च कारयेत् ।

नि. ९

पञ्चमे च महाभूतस्थानं तत्रैव कारयेत् ॥

दक्षिणे तु समीपे तु हविरक्षकमाचरेत् ।
यत्रैव तु महाभूतं तत्पार्श्वे बलिरक्षकम् ॥

तृतीये स्थानहीने तु भूतस्थानस्य मध्यमे ।
चक्रध्वजाम्बुजानां च स्थानमेवं प्रकल्पयेत् ॥

३.९.२५ ——— ——— षष्ठावरण-तुम्बुर्वादिपरिवारस्थान-

वि. १२.५९

षष्ठावरणे प्राग्द्वारादुत्तरे तुम्बुरुं तद्दक्षिणे नारदं दक्षिणे ऋतून् पश्चिमे प्रजापतिम् उत्तरे मुद्गलम् आग्नेय्यां हलेशं नैर्ऋत्यां यक्षं वायव्यां जाम्बवन्तम् ऐशान्यामसुरम् अन्तराले प्राच्यामुत्तरे किंनरमिथुनं तद्दक्षिणे प्रह्लादं दक्षिणे कामं विपां च पश्चिमे व्याजिनीं कामिनीं च उत्तरे प्रभां सुन्दरीं च- - - -।

३.९.२६ ——— ——— सप्तमावरण-ब्रह्मादिपरिवारस्थान-

वि. १२.५९

सप्तमावरणे पूर्वद्वारोत्तरे ब्रह्माणं तद्दक्षिणे अर्यम्णं दक्षिणे दण्डभृतम् उत्तरे

धनदम् आग्नेयादिकोणेषु सवितृसावित्रौ इन्द्रेन्द्रानुजौ रुद्ररुद्रानुजौ अपापवत्सौ चान्तराले प्रागादिचतुर्दिक्षु ईशादिपददेवान् क्रमेण कारयेत् । अत्रानुक्तान् सर्वान् बाह्ये महत्पीठं कृत्वा सर्वे देवा इति संकल्प्यार्चयेत् । एतेषामनुक्तं सर्वं भृगूक्तविधिना कारयेत् ।

३.९.२७ —— —— प्राकार-चक्रादिपरिवारस्थान-

क्रि. ४. ८३,४

प्राकाराणां मुखायामं चतुर्धा परिकल्प्य च ।
चक्रं ध्वजं च शङ्खं च यूथेशं चाक्षहन्तकम् ॥

तत्र तत्र तृतीयांशे स्थापयेच्च यथाक्रमम् ।

नि. ९

प्राकारेषु यथान्यायं तत्र तत्र विधानतः ।
ईशं वाथ गुहं वाथ विकटं विन्ध्यवासिनीम् ॥

बलिबेरं विष्णुवासं वामे क(कु?)बेरं तथैव च ।
स्वतन्त्रविधिना वापि चान्यतन्त्रेण वा तथा ॥

घटिकद्वारं यथाकामं दिग्द्वारं यथाविधि ।
विभवानुरूपं ज्ञात्वा तु कल्पयित्वा विधानतः ॥

कारयेन्नित्यपूजां च नेष्यते च ततः परम् ।
उत्सवादीनि कार्याणि मूलस्थाने तु कारयेत् ॥

३.९.२८ —— —— सोपानमण्डप-श्रीभूतादिपरिवारस्थान-

क्रि. ४.८९

श्रीभूतं चैव गरुडं कुर्यात् सोपानमण्डपे ॥

प्र. ७.६

[अत्र बहिराननं श्रीभूतं सोपानमध्ये देवाभिमुखं गरुडं पुरस्ताच्चार्चयेदिति निर्दिश्यते इति विशेषः ।]

खि. ७.३३

[अत्र मण्डपमध्ये गरुडं तस्य पश्चिमपङ्क्तेरुत्तरे शैषिकं च कल्पयेदिति निर्दिश्यते इति विशेषः ।]

नि. ९

[अत्र सोपानमध्ये पुरतः बहिर्मुखं श्रीभूतं कल्पयेदिति निर्दिश्यते इति विशेषः ।]

य. १०.१८

[अत्र मण्डपद्वारमध्ये न्यक्षं तत्पूर्वे श्रीभूतगरुडौ कल्पयेदिति निर्दिश्यते इति विशेषः ।]

३.९.२९ ——— ——— विमान-विवस्वदादिपरिवारस्थान-

य. १०.२०

विमानदक्षिणे मध्ये विवस्वन्तं समर्चयेत् ।
मित्रं च पश्चिमे कुर्यात् क्षत्तारं चोत्तरेऽथवा ॥

नि. ९

विमानस्य बहिः प्राच्यां दक्षिणे पश्चिमे तथा ।
उत्तरे च यथान्यायं दधीत्यकविवस्वतौ ॥

मित्रं महीधरं चैव मूले मूलालयस्य तु ।
एतान् बहिर्मुखान् चैव कल्पयेत विधानतः ॥

क्रि. ५.३९

दक्षिणादिदिशि द्वारे द्वाराग्रे न्यक्षमर्चयेत् ।
तद्वशेनेतरान् कुर्यात् सर्वानितान् बहिर्मुखान् ॥

३.९.३० ——— ——— अनेकतलविमान-मार्कण्डेयादिपरिवारकल्पन-

अ. ९

अनेकतलसंयुक्तं विमानं पर्षदादिनाम् ।
विशेषं कर्तुकामस्तु कारयेद्विधिचोदितम् ॥

मार्कण्डेयं च मां चैव ब्रह्मेशौ द्वितलादिषु ।
धात्रादिविमलं संध्यां द्वारपालौ समर्चयेत् ॥

तयोर्मध्ये हरेरग्रे भूतदेवं च तेष्वपि ।
नान्यानि परिवाराणि पूजयेद्बहुभूमिषु ॥

३.९.३१ ——— ——— द्वारदेवकल्पन-अनिवार्यता-

प्र. ३.१०

अयुक्तद्वारदेवस्य भजनं नाभिधीयते ॥

३.९.३२ ——— ——— मण्डप-तापसादिद्वारदेवतास्थान-

य. १०.१८

तापसं सिद्धिदं तस्य* द्वारस्योभयपार्श्वयोः ।

३.९.३३ ——— ——— मूलद्वार-धात्रादिद्वारदेवतास्थान-

य. १०.१५,६

---

* मण्डपस्य ।

मूलद्वारकवाटे तु धातारं दक्षिणे न्यसेत् ॥

कीनाशमधरे पट्टे भृतिमूर्ध्वे पतङ्गकम् ।
दक्षिणोत्तरयोः स्तम्भे पतिरं वरुणं तथा ॥

३.९.३४ ——— ——— मूलद्वारवाह्यभित्त्यादि - मणिकादिद्वारदेवतास्थान-

य. १०.१७

तद्बाह्ये भित्तिपार्श्वे तु मणिकं च प्रभावतीम् ।
अथवा मण्डपद्वारे धात्रादीनपि पूजयेत् ॥

३.९.३५ ——— ——— प्रथमावरण-ब्रह्मादिद्वारदेवतास्थान-

नि. ९

प्रथमावरणे कुर्यात् द्वारदक्षिणवामयोः ॥

ब्रह्माणं चैव किष्किन्धं तीर्थं चैव तमेव वा ।
द्वाराभ्यन्तरपार्श्वे तु तद्बहिस्तदनु क्रमात् ॥

विघ्नेशं च तथानन्तं कल्पयेत विचक्षणः ।

३.९.३६ ——— ——— अभ्यन्तरद्वारादि-मणिकादिद्वारपालस्थान-

वि. १२.५७,८

मणिकसंध्ये अभ्यन्तरद्वारे मुखमण्डपद्वारे विखनसतापसौ प्रथमावरणादिसप्तप्राकारद्वारेषु किष्किन्धतीर्थौ विघ्नेशनागेशौ शङ्खपद्मौ तुहिनबलिन्दौ नन्दकशार्ङ्गौ चक्रशूलिशङ्खचूलिनौ चण्डप्रचण्डौ चेत्येतानष्टादश द्वारपालानर्चयेत् ।

नि. ९

द्वारे गर्भालयस्यैव दक्षिणे विमलं तथा ।
संध्यामुत्तरतः पार्श्वे द्वितीये तु विशेषतः ॥

तापसं विखनसं चैव स्थापयेद्द्वारपार्श्वयोः ।

३.९.३७ ——— ——— द्वारादि-वक्रतुण्डादिद्वारपालकल्पन-

क्रि. ५·४०-२,५३

द्वारेषु द्वारपालांश्च प्रकल्प्यावाह्य पूजयेत् ।
द्वारपालान् प्रकुर्वीत किंचिद्द्वारनिरीक्षकान् ॥

अन्तरालं यदि भवेत् तत्र वै पार्श्वयोः क्रमात् ।
वक्रतुण्डं च दुर्गां च बहिर्भित्तौ प्रकल्प्येत् ॥

अग्रमण्डपभित्तौ वा पादवर्गे प्रकल्पयेत् ।
- - - - - - - - - - - - - - - ॥

द्वारेशान् पादवर्गेषु गोपुरेषु प्रकल्पयेत् ।

३.९.३८ ——— ——— पञ्चमूर्त्याद्यालय-परिवारार्चनादि-

अ. ६

पञ्चमूर्तौ तथा धीमान् षण्मूर्त्यादौ विशेषतः ।
परिवाराणि सर्वाणि चादिमूर्तौ समर्चयेत् ॥

पुरुषादितलेष्वष्टगर्भगेहाधिपैः सह ।
द्वितीयद्वारपालान्तं तत्तद्देवं समर्चयेत् ॥

तथैव बलिहोमं च तथा नित्योत्सवं क्रमात् ।
स्नपनं महोत्सवं चैव सर्वमादौ चरेद्बुधः ॥

पुरुषादौ भवेच्छ्रद्धा यजमानस्य पञ्चसु ।
तस्मान्नैव च कर्तव्या इत्याहुः मुनयः क्रमात् ॥

३.९.३९ ——— ——— महाभूतपीठकल्पन-

वि. १२.५९,६०

यूथेशपीठं यथोक्तदेशे गर्भागारविस्तृताद्द्वारोत्तुङ्गाद्वा पञ्चभागत्रिभागैकभागमर्धं वा हस्तमानेन त्रिहस्तं द्विहस्तम् एकहस्तं वा पीठस्यायामविस्तारं तत्समोत्सेधं तन्मध्ये पूर्ववत् प्रथमेष्टकां शिलां वा विन्यस्य पीठोत्तुङ्गं षोडशांशं कत्वा एकांशमुपानं चतुरंशा जगती त्र्यंशं कुमुदम् अर्धांशं कम्पं चतुरंशं कण्ठम् अर्धांशं कम्पं द्व्यर्धांशा महापट्टिका तदूर्ध्वं कम्पमर्धांशं (चतुर्दिङ्मध्यमहद्गु?) शङ्खनादसमतद्भूताकारयुक्तं वियुक्तं वा कृत्वा समाप्तेष्टकां विन्यस्य तत्तुरीयांशमूर्ध्वपद्मं तत्पद्मं पञ्चधा कृत्वा एकांशं पद्माधारवृत्तकम्पं तस्योर्ध्वे द्व्यंशमधोदलं शेषांशमूर्ध्वदलम् ऊर्ध्वाधः षोडशदलैर्युक्तं कुर्यात् । पद्मतुङ्गस्य पादांशेनार्धांशेन वा उपपीठं कारयेदिति केचित् ।

१०. मण्डपकल्पनम्

३.१०.१.० आलयनिर्माण-मण्डपकल्पन-मण्डप-त्रिविध-उत्तमादि-श्रीवत्सादि-

खि. ७. ६५,६

मण्डपं च त्रिधा प्रोक्तं सर्वालंकारसंयुतम् ।
उत्तमं मध्यमं चैव कनिष्ठं त्रिविधं भवेत् ॥

श्रीवत्सं स्वस्तिकं चैव पद्मकं च प्रकीर्तितम् ।

३.१०.१.१ ——— ——— ——— उत्तम-श्रीवत्स-

खि. ७.६६-७७

श्रीवत्समुत्तमं प्रोक्तम्- - - - - - - - - -।-
- - - - - - - - - - - - - - - - - -॥

श्रीवत्सस्य क्रमं पूर्वं वक्ष्यामि शृणुतर्षयः ।
षट्त्रिंशद्धस्तमुद्दिष्टं चतुरश्रं समन्ततः ॥

पादानां तु शतं प्रोक्तमुत्तमं स्नपनालये ।
पादान्तरं चतुर्हस्तं स्तम्भमानेन संयुतम् ॥

मध्ये कूटं च कृत्वा तु षोडशस्तम्भसंयुतम् ।
हस्तद्वयं तलोत्सेधमेकहस्तमथापि वा ॥

तन्मध्ये श्वभ्रमुद्दिष्टं तोयमार्गसमायुतम् ।
पादायामं घनं चैव पादाधारसमायुतम् ॥

बोधिका चोत्तरा चैव अनुमार्गसमायुता ।
इष्टकाधारकं चैव अन्यद्वा दारुसंस्क्रियाम् ॥

आचार्यः शिल्पिभिः सार्धं युक्तियुक्तं च कारयेत् ।
यथासौन्दर्यकं कुर्यान्मतिमान् शिल्पिसंमतम् ॥

बाह्यपादं विवर्ज्यैव मध्यपादं च सर्वशः ।
पादानां च चतुःषष्टिमुन्नतानां समारभेत् ॥

पादानां च चतुर्भागं हीनं बाह्ये च पादयोः ।
बाह्यपादं च षट्त्रिंशद्भित्तिमाश्रित्य कारयेत् ॥

भित्तिं विना कारयेद्वा युक्त्या परमया युतः ।
एवमेव प्रकारेण शेषं सर्वं समाचरेत् ॥

कूटं विनापि वा कुर्यान्मण्डपं वा समाचरेत् ।
पादानां चैव सर्वेषामुन्नतं सममेव च ॥

मण्डपं वा प्रपां वापि कारयित्वा विचक्षणः ।
देवस्याभिमुखे कुर्यात् श्रीवत्सं मण्डपोत्तमम् ।
ऐशान्ये वा प्रकुर्वीत पूर्वोक्तेनैव वर्त्मना ॥

३.१०.१.२ —— —— —— मध्यम-स्वस्तिक -

खि. ७.६६, ७८-८९

- - - - - - - मध्यमं स्वस्तिकं भवेत् ॥
- - - - - - - - - - - - - - - - - - ॥

अत् ऊर्ध्वं प्रवक्ष्यामि लक्षणं स्वस्तिकस्य तु ।
■ पूर्वोक्तेन विधानेन कर्षणादीनि कारयेत् ॥

उपानादिक्रमं सर्वं ✽ पूर्ववच्च समाचरेत् ।
हस्तमेकाधिकं चैव चतुरश्रं तथैव च ॥

■ आलयनिर्माणोक्तेन ।

✽ प्रथमावरणे गोपुरादिनिर्माणवत् ।

पादानां च चतुःषष्टिं स्वस्तिके च निवेशयेत् ।
पादान्तरं त्रिहस्तं तु पादभागेन संयुतम् ॥

स्नानालयं तु प्राग्द्वारम् आदिगोपुरमानतः ।
पादाधिकं वा कुर्वीत पादयोरन्तरं तथा ॥

पादयोरन्तरं कुर्यादुत्तरद्वारमुन्नतम् ।
तदर्धं वा प्रकुर्वीत शालालंकारसंयुतम् ॥

ऐन्द्रे द्वारं विवर्ज्यैव भित्तिं सर्वत्र कारयेत् ।
भित्तिबाह्ये तु पादांश्च यथायुक्ति समाचरेत् ॥

दक्षिणे च तथा कृत्वा मध्ये भित्तिं न कारयेत् ।
अथवा कारयेत् विद्वान् त्रिपङ्क्त्या सममेव च ॥

भित्तिं विवर्ज्य यत्नेन स्तम्भं चैव यथार्हतः ।
पश्चिमे च तथा कुर्यादुत्तरे भित्तिमाचरेत् ॥

भित्तिहीने तु कुर्वीत पादं सम्यग्यथार्हतः ।
पादोपरि च कुर्वीत उत्तराश्च सलक्षणाः ॥

मध्ये पादेषु सर्वत्र बोधिकाः* सम्यगर्पयेत् ।
बोधिकादीनि सर्वाणि पूर्वोक्तेनैव वर्त्मना ॥

कारयित्वा यथान्यायं सर्वालंकारसंयुतम् ।
मध्ये कूटसमायुक्तं षोडशस्तम्भसंयुतम् ॥

यथायुक्ति प्रकुर्वीत शिल्पिभिः शास्त्रवित्तमैः ।
कूटं विना वापि कुर्यान्मण्डपक्रमतः क्रमात् ।
मानाधिकारे यत्प्रोक्तमलंकारं तु कारयेत् ॥

◆श्रीवत्समण्डपनिर्माणोक्तेन ।

३.१०.१.३ ——— ——— ——— अधम - पद्मक-

खि. ७.६६, ९०-६

अधमं पद्मकं चैव- - - - - - - - - -।
- - - - - - - - - - - - - - - - - - ॥

अत ऊर्ध्वं प्रवक्ष्यामि पद्मकस्य च लक्षणम् ।
पञ्चाधिकशतं हस्तं चतुरश्रं समन्ततः ॥

पादाः षट्त्रिंशदुद्दिष्टाः प्रत्येकं तु विशेषतः ।
पादान्तरं त्रिहस्तं तु पादभागेन संयुतम् ॥

चतुर्द्वारसमायुक्तं द्वारमानेन संयुतम् ।
अथवा दक्षिणे चैव उत्तरे च विशेषतः ॥

शालाद्वारं प्रकुर्वीत शालालकारसंयुतम् ।
प्राग्द्वारं कारयेत् तद्वत् पश्चिमद्वारमेव च ॥

द्वारमानेन वै कुर्यात् द्वारालंकारसंयुतम् ।
तन्मध्ये च चतुःस्तम्भस्थलं कृत्वातिसुन्दरम् ॥

हस्तोत्सेधं तथा कुर्यान्मध्ये श्वभ्रं च कारयेत् ।
श्वभ्रादुत्तरतो गच्छेज्जलं संस्रावमार्गतः ॥

द्वारं भित्तेस्तु कुर्वीत जलस्थानं तु कारयेत् ।
एवं पद्मकमुद्दिष्टं सर्वालंकारसंयुतम् ॥

३.१०.२ ——— ——— ——— श्रीवत्सादि - व्यावर्तकचिह्नकल्पन-

खि. ७.९७-१००

भित्तौ स्तम्भे तले चैव बोधिकासूत्तरासु च ।
क्वचित् क्वचित् प्रदेशे तु कुर्याच्छ्रीवत्सलाञ्छनम् ॥

स्वस्तिके पूर्णकुम्भं च पद्मके पद्मकं तथा ।
आलयस्य तलस्यैव मण्डपस्य तलस्य च ॥

कुर्याद्गोलकमानेन त्रियङ्गुलमथापि वा ।
भागप्रमाणं वा कुर्याद्यथाविभवविस्तरम् ॥

एवमेव विधानेन प्रथमावरणे भवेत् ।

३.१०.३ ——— ——— ——— श्रीप्रतिष्ठित-

प्र. ६.२१

स्तम्भैः षोडशभिर्युक्तं मण्डपं श्रीप्रतिष्ठितम् ।

३.१०.४ ——— ——— ——— बीजासन-

प्र. ६.२१

द्वादशस्तम्भसंयुक्तं बीजासनमिति स्मृतम् ।

३.१०.५ ——— ——— ——— जयभद्र-

प्र. ६.२२

द्वात्रिंशत्स्तम्भसंयुक्तं जयभद्रेति कीर्त्यते ।

३.१०.६ ——— ——— ——— नन्द्यावर्त-

प्र. ६.२२

षट्त्रिंशद्गात्रसंयुक्तं नन्द्यावर्तं सुशोभनम् ॥

३.१०.७ ——— ——— ——— श्रीभद्रक-

प्र. ६.२३

चतुर्भिः षष्टिभिः स्तम्भैर्युतं श्रीभद्रकं स्मृतम् ॥

३.१०.८ ——— ——— ——— विशाल-

प्र. ६.२३

स्तम्भानां तु शतैर्युक्तं विशालमिति संज्ञितम् ॥

३.१०.९ ——— ——— आस्थानमण्डपादिकल्पन-

वा.३

अथ वक्ष्ये विशेषेण मण्डपादीन् यथाक्रमम् ॥

आस्थानं स्थाननृत्तं तु स्नपनं मुखमण्डपम् ।
अलंकारमण्डपादि पूर्वमेव मयोदितम् ॥

स्वस्तिकं गोमुखाख्यं तु महापद्मं तु पद्मकम् ।
पादबन्धं ततः कुर्यात् प्रतिबन्धं तथैव च ॥

सर्वतोभद्रकं चैव दिशास्वस्तिकमेव च ।
एवमादीन्यधिष्ठानमुपपीठं तथैव च ॥

एतैस्तु लक्षणं चैव विस्तृतं दीर्घमेव च ।
उच्छ्रितादीनि सर्वं च पूर्वमेव प्रचोदितम् ॥

३.१०.१० ——— ——— मण्डप - मान-

क्रि. ४.६१-६

(क्रूहताद्यादिरहितं(?) पादमात्र सबोधिकम् ।
पद्भ्यां भाव्यं पादमध्यं शालामण्डपयोः स्मृतम् ॥)

मण्डपं तत् त्रिवर्गाढ्यमृजुभित्तिकमेव वा ।
ऋजुभित्तितले पादं केवलं स्यात् सबोधिकम् ॥

मध्यस्तम्भविहीनं च लुपाच्छन्नं च मण्डपम् ।
तन्मध्ये स्नपनश्वभ्रमौपासनविधानतः ॥

आस्थाने पश्चिमे भागे कुर्यादौपासनं शुभम् ।
पञ्चभागे तदुत्सेधे भागं पद्मं सपादकम् ॥

पादोत्सेधं सपादं स्यादेकांशं प्रस्तरं भवेत् ।
उपपीठतलोत्सेधे अधिष्ठानोक्तवद्भवेत् ॥

तत्र लाङ्गलकुड्यस्थमधिष्ठानं प्रकल्पयेत् ।
तलोपरितले नेष्टमिति पूर्वजशासनम् ॥

अत्रानुक्तानि सर्वाणि शिल्पशास्त्रोदितानि वै ।
शिल्पशास्त्रोक्तमार्गेण शिल्पिभिः कारयेद्बुधः ॥

प्र. ६.२४-९

प्रासादवत् समाख्यातं प्रस्तारं तत्प्रमाणतः ।
वाजिनोपरि कर्तव्यं धारकस्तु कलास्तथा ॥

स्तम्भविष्कम्भमुत्सेधं चतुर्भागेन विस्तृतम् ।
तुलाविस्तारमानेन जयन्ती स्यात् समोन्नता ॥

ततो दण्डार्धबाहुल्यामनुमार्गं तदूर्ध्वतः ।
इष्टकाभिस्तदूर्ध्वं तु छादयेद्दलकान्वितम् ॥

पादाधिकमथाध्यर्धं द्विगुणं पादहीनकम् ।
चतुर्विधमथायामं कर्तव्यं मण्डपस्य तु ॥

आयामे तु यथायुक्तं स्तम्भानां विधिरुच्यते ।
द्विहस्तं वा त्रिहस्तं वा चतुर्हस्तमथापि वा ॥

स्तम्भान्तर प्रकर्तव्यं यथायुक्ति विशेषतः ।
एवं क्रमात् समाख्यातं - - - - - - - - - ॥

३.१०.११ —— —— —— **स्तम्भस्थापन-**

वा. ३

अत ऊर्ध्वं प्रवक्ष्यामि स्तम्भस्य स्थापनक्रमम् ।
यथोक्तदिवसात् पूर्वम् अङ्कुरं तत्र चार्पयेत् ॥

पूर्वेद्युः पूर्व एवाह्नि ऋत्विजो वरयेत् क्रमात् ।
षोडश द्वादशाष्टौ च चत्वारो वरयेद्बुधः ॥

गर्भालयादि सर्वत्र मण्डपादीन् पृथक् पृथक् ।
तन्मध्ये शालिमाहृत्य वेदिं चास्तरणं चरेत् ॥

यावत् स्तम्भस्य चायामं तावद्वेदिप्रमाणकम् ।
विस्तृतं हस्तमात्रेण पृथक् पङ्क्तीस्तु कारयेत् ॥

तस्यैव चोत्तरे कुर्यात् वास्तुहोमं सुहूयताम् ।
पञ्चगव्यैः समभ्युक्ष्य पुण्याहं तत्र कारयेत् ॥

कलशैः चतुर्दशैः स्थाप्य प्रत्येकं देशिकोत्तमः ।
स्तम्भान् संप्रोक्ष्य तत्काले अर्घ्यान्तं तत्र चार्चयेत् ॥

देवस्य रूपं ध्यात्वा तु नववस्त्रेण वेष्टयेत् ।
पश्चात् सभ्यं परिस्तीर्य हुत्वा तद्देशिकोत्तमः ॥

चतुर्वेदादिमन्त्रेण हुत्वा मन्त्रान् पृथक् चरेत् ।
अष्टोत्तरशतं वाथ अष्टाविंशतिपर्ययम् ॥

गारुडं वैष्वक्सेनं च वैष्णवं रुद्रसंयुतम् ।
ब्राह्ममैन्द्रं च वायव्यं वारुणं पाञ्चभौतिकम् ॥

प्रत्येकं तु सकृद्धुत्वा काश्यपात्रिविधानतः ।
सर्वान् बीजान् सुसंग्राह्य अर्चयित्वाधिदैवतम् ॥

नवरत्नयुतं तत्र कुर्यात् तदधिवासयेत् ।
रात्रिशेषं नयेत् स्नात्वा रत्नन्यासादि चाचरेत् ॥

नववस्त्रेण संछाद्य सुधया परिपूरयेत् ।
मुहूर्ते समनुप्राप्ते स्तम्भानुद्धृत्य बुद्धिमान् ॥

प्रदक्षिणक्रमेणैव आग्नेयादि यथाक्रमम् ।
मध्ये प्रधानवेद्याख्यं मुहूर्ते स्तम्भमुत्तमम् ॥

दक्षिणाद्युत्तरान्तं तु पूर्वान्तं पश्चिमादिकम् ।
यावत् स्तम्भप्रतिष्ठा च तावद्द्वारं प्रतिष्ठितम् ॥

एवमेव प्रकारेण दारवं तं प्रतिष्ठितम् ।
भूरसीत्यादिना जप्त्वा स्थापयेद्देशिकोत्तमः ॥

अवक्रं सुस्थितं चैव शिल्पिना चैव कारयेत् ।
सर्ववाद्यैश्च संघोष्य पुण्याहमपि वाचयेत् ॥

यथोक्तमाचार्यादिभ्यः सोदकं दक्षिणां ददेत् ।
महाहविः प्रभूतं वा देवेशाय निवेदयेत् ॥

पश्चादूर्ध्वे तु संप्रोक्तं कवाटस्थापनाक्रमम् ।

३.१०.१२ —— —— —— पूजनीयदेवता-

क्रि. ५.५८-६१

मण्डपेष्वथवान्येषु तत्तद्दिक्पालसंयुतम् ।
विष्वक्सेनं समभ्यर्च्य यथाशक्ति निवेदयेत् ॥

एतेषु च समाप्तेषु वास्तुहोमावसानके ।
कुम्भं संसाध्य विधिना तत्तन्मन्त्रं सवैष्णवम् ॥

व्याहृत्यन्तं यजित्वा तु पुनरावाह्य पूजयेत् ।
मण्डपादिषु देवेशं संस्थाप्य च शुभोदये ॥

सप्तविंशतिभोगैश्च संपूज्यान्तः प्रवेशयेत् ।

३.१०.१३ —— —— महामण्डपकल्पन-

वि. ११.५४,५

अथ आलयाभिमुखे महामण्टपं मूलालयस्य सममध्यर्धं द्विगुणार्धं त्रिगुणं त्रिगुणार्धं चतुर्गुणमिति समचतुरश्रमायतचतुरश्रं वा युग्मपादयुग्मभक्तिकं मूलधाम्न आदिभूमिप्रमाणेनाधिष्ठानपादप्रस्तराणि कृत्वा संछाद्य मध्ये सभां युत्त्या कल्पयेत्। तत्प्रमुखे तथैव नृत्तमण्डपम् आग्नेयादिकोणेषु तथैवास्थानमण्डपं कारयेत् ।

स. ९.२०-८

[अत्र महामण्टपमित्यस्य स्थाने मण्डपमिति आलयाभिमुखे इत्यस्य स्थाने प्रमुखे परितश्चापि इति द्वितीयावरणे तृतीयावरणेऽपि चेति च निर्दिश्यते इति विशेषः ।]

३.१०.१४ —— —— स्नपनमण्डप-स्थान-

वि. ११.५५

प्रथमावरणे द्वितीये वा मालिकाविहीने च आलयाभिमुखे मण्डपपूर्वे सोपानपूर्वे वा स्नपनागारं मण्डपं कूटं- - - - - -कृत्वा- - - - -

य. १०. ७,८

[अत्र ऐशान्ये चोत्तरे इत्यधिकमिति विशेषः ।]

क्रि. ४.८५, ८,९

द्वितीयांशे द्वितीये तु कुर्यात् स्नपनमण्डपम् ।
- - - - - - - - - - - - - - - --॥

- - - - - - - - - -तथा स्नपनमण्डपम् ॥

दक्षिणामुखमैशान्ये सौम्ये वापि प्रकल्पयेत् ।

खि. ७.६४,१००,१२९

स्नानालयं प्रकुर्वीत द्वितीयावरणे तथा ।
गोपुरस्य प्राग्दिशि तु चतुर्हस्तं व्यपोह्य च ।
पञ्चषट्सप्तहस्तान् वा अष्टहस्तानथापि वा ॥

- - - - - - - - - - - - - - - - - - - ।
द्वितीयावरणे कुर्यात् स्नपनालयमण्डपम् ॥

- - - - - - - - - - - - - - - - - -॥

यत्रैव स्थानविस्तारः तत्र स्यात् स्नपनालयः ।
सर्वालंकारसंयुक्तं मण्डपं चात्र कारयेत् ।
वापीकूपतटाकांश्च आरामाद्यांश्च कारयेत् ॥

नि.१२

प्रथमावरणे तत्र द्वितीये वा तृतीयके ।
प्रमुखे चोत्तरे वापि ऐशान्यां वा तथैव च ॥

खिलाधिकारे यत् प्रोक्तं स्नपनालयमीरितम् ।
अथवा षोडशस्तम्भैर्द्वादशैर्वा तथैव च ॥

शिल्पशास्त्रविधानेन यथायुक्ति तथा चरेत् ।
प्रमुखे दक्षिणे वापि नैर्ऋत्यां वायवे तथा ॥

आस्थानमण्डपे तत्र कारयित्वा विधानतः ।

३.१०.१५ ——— ——— ——— स्वरूप-

क्रि. ४.९०

चतुःसोपानसंयुक्तं कुर्यात् स्नपनमण्डपम् ।

वि. ११.५५

[अत्र अनेकद्वारयुतम् एकद्वारयुतं वा इति निर्दिश्यते इति विशेषः ।]

३.१०.१६ ——— ——— ——— मान-

खि. ७.५१,२

- - - - - - - - तन्मध्ये[☆] स्नपनालयम् ।
पादाधिकं वा कुर्वीत अध्यर्धं वापि कारयेत् ॥

द्विगुणं वापि कुर्वीत यथाविभवविस्तरम् ।

३.१०.१७ ——— ——— ——— उत्तमादि-मानानुरोधेन-

क्रि. ४.९१

होमाद्वा(?) प्राच्यपादाद्वा भित्त्यभ्यन्तरमुत्तमम् ।
मध्यमं भित्तिमध्यं स्यात् भित्तिबाह्यमथाधमम् ॥

[☆] द्वितीयावरणमध्ये ।

३.१०.१८ —— —— —— स्नपनश्वभ्र - स्थान-

य. १०.१३,४
प्रासादस्योत्तरे पार्श्वे श्वभ्रं कुर्याद्विचक्षणः ॥

नित्यं नैमित्तिकं स्नानं स्नपनं तत्र कारयेत् ।

खि. ७.१०७
नि. ९

३.१०.१९ —— —— —— बहिराभिमुख्य-

वि. १२.५६
स्नपनमण्डपं- - - - - - - बहिर्मुखं- - - - -आरभेत ।

३.१०.२० —— —— —— पूजनीयदेवता-

क्रि. ५.५७
प्रागादि चतुरो वेदान् पूजयेत् स्नपनालये ।
तथैव यागशालायाम् - - - - - - - - -॥

खि. ७.११३,४
स्नपनालये तु पङ्क्तीशपश्चिमे चक्रमर्चयेत् ।
चक्रस्य पूर्वभागे तु ध्वजदेवं समर्चयेत् ॥

ध्वजस्य पूर्वभागे तु शङ्खं चैव समर्चयेत् ।
स्नानालयस्य च प्राच्यां भूतपीठं प्रकल्पयेत् ॥

३.१०.२१ —— —— पचनालय-स्थान-

स. ९.२६

द्वितीयावरणे कुर्यादाग्नेय्यां पचनालयम् ।

खि. ७.११५

[अत्र इन्द्राग्न्योः मध्ये पचनालयं कुर्यादिति निर्दिश्यते इति विशेषः ।]

प्र. ७.३

य. १०.९

[अत्र प्रथमावरणे इत्यधिकमिति विशेषः ।]

वि. ११.५५; १२.५७.

[अत्र तृतीये वा इत्यधिकमिति सर्वत्रापि आग्नेय्यामेव पचनालयं कुर्यादिति च निर्दिश्यते इति विशेषः ।]

३.१०.२२ —— —— —— स्वरूप-

वि. ११.५५

पचनालयं विमानसमं पादाधिकमर्धाधिकं पादोनद्विगुणं द्विगुणं द्विगुणार्धं त्रिगुणमिति विस्तारं सप्तधा भवति । विस्तारात् पादाधिकमर्धाधिकं वा आयामं चतुरश्रं चतुरश्चतुःशालोपेतं तन्मध्ये कूपं तद्दक्षिणतो मूलधाम पादुकादिप्रस्तरान्तोत्सेधं चतुर्धा कृत्वा एकांशमधिष्ठानं सोपपीठं वा द्व्यंशं पादवर्गम् एकांशं प्रस्तरं प्राकाराभ्यन्तरं प्राकारमध्यं प्राकारबाह्यं वा अस्य भित्तिविष्कम्भं हस्तमात्रं पादहीनं पादाधिकं वा मण्डपाकारं लुपायुक्तं वा कारयेत् । तद्द्वारदक्षिणे पूर्ववत् प्रथमेष्टकाः शिला वा संस्थाप्य तथैवान्ते च स्थापयेत् । सुधाकर्म कृत्वा अभ्यन्तरे प्राच्यां दक्षिणाद्युत्तरान्तां चुल्लिं युग्मायुग्मसंख्या(ख्य)दक्षिणशालामध्ये नित्याग्निकुण्डम् पश्चिमशालामध्ये सोपानद्वा-

रम् उत्तरतो हविर्द्रव्योपसंचयस्थानम् अधस्ताद्दक्षिणतः प्राच्यां वा वारिमार्गं च कारयेत्।

३.१०.२३ —— —— —— मान-

नि. ९

सर्वालंकारसंयुक्तं कारयेत् पचनालयम् ।
प्रासादार्धमथोत्सेधं कपोतसममेव वा ॥

दीर्घशालां चतुःशालां कूपस्थानसमायुतम् ।
नित्याग्निकुण्डसंयुक्तमेवं मानं तु संभवेत् ॥

३.१०.२४ —— —— —— मूलधामाभिमुख्य-

वि. १२.५६

- - - - - - -पचनालयं- - - - - -
मूलधामप्रेक्षम् - - - - - - - - - - - -आरभेत ।

३.१०.२५ —— —— —— पूजनीयदेवता-

क्रि. ५.६३

हवीरक्षकमाग्नेय्यां पूजयेत् तु महानसे ।
देवदेवं समभ्यर्च्य पश्चात् पाकक्रियां चरेत् ॥

वि. १२.५८

३.१०.२६ —— —— यागमण्डप - स्थान-

वि. १९.५५,६

प्रथमावरणे द्वितीये वा दक्षिणे होमस्थानं कारयेदिति केचित् । यागशालां[★] द्वितीयावरणे आग्नेय्यां वा पञ्चहस्तनवहस्तायतविस्तारं चतुर्द्वारयुतं मण्डपं कूटं वा कुर्यात् । अत्रानुक्तं सर्वं शिल्पशास्त्रोक्तविधिना कारयेत् ।

खि. ७.१०५
[अत्र आलयस्य याम्ये यागमण्डपं समाचरेदिति निर्दिश्यते इति विशेषः ।]

नि. ९
[अत्र आवरणनिर्देशं विना इन्द्रपावकयोर्मध्ये चाग्निहोमस्य मध्यमे यागमण्डपं कुर्यादिति निर्दिश्यते इति विशेषः ।]

प्र. ७.
[अत्र आवरणनिर्देशं विना याम्ये शयनमण्डपात् पूर्वे यागमण्डपं कुर्यादिति निर्दिश्यते इति विशेषः ।]

य. १०.९
[अत्र दक्षिणे यागमण्डपम् इत्येव निर्दिश्यते इति विशेषः ।]

३.१०.२७ —— —— —— पूजनीयदेवता-

क्रि. ५.५७,६२
प्रागादि चतुरो वेदान् पूजयेत् स्नपनालये ।
तथैव यागशालायाम् - - - - - - - ॥
- - - - - - - - - - - - - - - - - - --॥

आधाय यागशालायां मुहूर्ते हव्यवाहनम् ।
वैष्णवेन शतं हुत्वा नित्यहोमं समाचरेत् ॥

[★] यागशालाशब्दः यागमण्डपपर्यायवाचकः ।

वि. १२.५८

[अत्र होमस्थाने बलिरक्षकमर्चयेदिति निर्दिश्यते इति विशेषः ।]

३.१०.२८ —— —— हविर्द्रव्यादिसंचयस्थान- ——

वि. ११.५८

हविर्द्रव्यादिसंचयस्थाने सर्वेश्वरं[★] - - - - -।

३.१०.२९ —— —— नृत्तमण्डप-स्थान

य.[☆] १०.९

नैर्ऋत्यां चैव वायव्यां नृत्तमण्डपमाचरेत् ।

क्रि. ४.८८

[अत्र स्नपनमण्डपे नित्यनृत्तं कुर्वीत इति निर्दिश्यते इति विशेषः ।]

खि. ७.१११,२

[अत्र द्वितीयावरणे स्नपनालये नित्यनृत्तं कुर्वीत इति निर्दिश्यते इति विशेषः।]

नि. ९

[अत्र मुखमण्डपे नित्यनृत्तं समाचरेदिति निर्दिश्यते इति विशेषः ।]

३.१०.३० —— —— —— मूलधामाभिमुख्य-

वि. ११.५६

[★] अर्चयेदित्यग्रिमेणान्वयः ।

[☆] प्रथमावरणे द्वितीयावरणेऽथवा इत्यनुवर्तते ।

- - - - - - - - - -नृत्तमण्डपं च मूलधामप्रेक्षं - - - - - -आरभेत ।

३.१०.३१ —— —— पुष्पसंचयमण्डप-स्थान-

स. ९.२७

पुष्पसंचयदेशं च कुर्यादैशान्यपश्चिमे ।

खि. ७.१०६

[अत्र तोयेशवायुमध्ये पुष्पसंचयमन्दिरं कुर्यात् इति निर्दिश्यते इति विशेषः ।]

नि. ९

[अत्र खिलाधिकारवत् ।]

प्र. ७.४

[अत्र ऐशान्ये पुष्पदेशं तु इति निर्दिश्यते इति विशेषः ।]

य. १०.११

[अत्र खिलाधिकारवत् ।]

वि. १२.५६,७

[अत्र प्रथमावरणे द्वितीये वा इन्दैशानयोरन्तरे पुष्पसंचयस्थानं कुर्यादिति निर्दिश्यत इति विशेषः ।]

३.१०.३२ —— —— —— मूलधामाभिमुख्य-

वि. १२.५६

- - - --पुष्पसंचयस्थानं- - - - मूलधामप्रेक्षं- - - -अरभेत।

३.१०.३३ ——— ——— ——— पूजनीयदेवता-

वि. १२.५८

पुष्पमण्डपे पुष्परक्षकम्★ ।

३.१०.३४ ——— ——— स्नानोदकादिद्रव्यसंचयस्थान-स्थान-

वि. १२.५६,७

प्राग्द्वारे देवतागारे प्रथमावरणे द्वितीये वैन्द्रैशानयोरन्तरे स्नानोदकपानीय- - - - - -स्थानं- - - - - -उत्तरद्वारं चेत् सोमोदानयोर्मध्ये स्नानोदकादिद्रव्यसंचयस्थानम्☆

३.१०.३५ ——— ——— ——— मूलधामाभिमुख्य-

वि. १२.५६

- - - -उदकपानीयस्थानं - - -मूलधामप्रेक्षं - - - आरभेत ।

३.१०.३६ ——— ——— आभरणस्थापन-स्थान-

खि. ७.१०१,२

रत्नजातं च यत्सर्वं मकुटादिपरिच्छदम् ॥

सौवर्णं चापि यत्सर्वं राजतं बहुमूल्यकम् ।
स्थापयेद्गर्भगेहे तु मण्डपे वा सुरक्षिते ॥

नि.९

★ अर्चयेदित्यग्रिमेणान्वयः ।

☆ कारयेदित्यग्रिमेणान्वयः ।

३.१०.३७ ——— ——— शयनमण्डप-स्थान-

वि. १२.५६,७

प्राग्द्वारे देवतागारे प्रथमावरणे द्वितीये वा- - - - - - - ऐन्द्राग्न्योर्मध्ये शय्यादेशम् उत्तरद्वारं चेत् - - - - - -सोमेशानयोर्मध्ये *शय्यास्थानं च☆

स. ९.२०

[अत्र विमानं परितः पार्श्वे शय्यादेशं प्रकल्पयेत् इति निर्दिश्यते इति विशेषः ।]

खि. ७.१०४

[अत्र प्रथमावरणे यमपावकयोर्मध्ये शय्यास्थानं प्रकल्पयेति निर्दिश्यते इति विशेषः ।]

नि.९

[अत्र खिलाधिकारवत् ।]

प्र. ७.४

[अत्र याम्ये शयनमुदिष्टम् इति निर्दिश्यते इति विशेषः ।]

य. १०.११

[अत्र खिलाधिकारवत् ।]

---

* शय्यास्थानपदं शयनमण्डपवाचकम् ।

☆ कारयेदित्यग्रिमेणान्वयः ।

३.१०.३८ —— —— —— पूजनीयदेवता-

वि. १२.५८

शय्यास्थाने कौमोदकीम् ।☆

३.१०.३९ —— —— अर्चनपात्रन्यास-स्थान-

खि. ७.१०३

अर्चनार्हाणि सर्वाणि लोहजानि तु सर्वतः ।
शङ्खशुक्त्यादिवस्तूनि मण्डपे तु तथा न्यसेत् ॥

नि. ९

य. १०.१०

३.१०.४० —— —— पानीय- ——-

खि. ७.१०५

यमस्य पश्चिमे भागे पानीयस्थानमुच्यते ।

स. ९.२७

[अत्र पचनालयस्य पश्चिमे पानीयस्थानमुच्यते इति विशेषः ।]

नि. ९

प्र. ७.३

[अत्र समूर्तार्चनाधिकरणवत् ।]

य. १०.११

☆ अर्चयेदित्युत्तरेणान्वयः

३.१०.४१. ——— ——— स्नानतोयन्यास- ———

स. ९.२७

न्यसेत् तत्✽पश्चिमे देशे स्नान- - - - तोयकम् ।

नि. ९

३.१०.४२ ——— ——— वारिसंचयस्थान-पूजनीयदेवता-

वि. १२.५८

वारिसंचयस्थानपार्श्वे पुरुषम् ।★

३.१०.४३ ——— ——— लौकिकप्रतिमान्यास-स्थान-

खि. ७.१०६

तोयेशनीलयोर्मध्ये प्रतिमां लौकिकीं न्यसेत् ।

नि. ९

य. १०.११

३.१०.४४ ——— ——— अङ्कुरार्पणमण्डप- ———

खि. ७.१०७

उदानसोमयोर्मध्ये अङ्कुरार्पणशालिका ।

नि. ९

य. १०.१३

[अत्र कुबेरेशानयोर्मध्ये अङ्कुरार्पणमण्डपं कुर्यादिति निर्दिश्यते इति विशेषः ।]

✽ पचनालयस्य पश्चिम ।-

★ अर्चयेदित्युत्तरेणान्वयः ।

३.१०.४५ —— —— वस्त्रादिनिक्षेप- ——

खि. ७.१०९

ईशानसोमयोर्मध्ये वस्त्रादीनि विनिक्षिपेत् ।

नि. ९

प्र. ७.४

[अत्र दक्षिणे वस्त्रसंचयम् इति निर्दिश्यते इति विशेषः ।]

य. १०.१३

[अत्र ईशानशक्रयोर्मध्ये वस्त्रादिस्थानमाचरेदिति निर्दिश्यते इति विशेषः ।]

३.१०.४६ —— —— वितानादिपरिच्छदस्थापन- ——

खि. ७.१०८,९

सोमस्य पश्चिमे भागे वितानादिपरिच्छदम् ।
मध्ये च सोमामितयोर्न्यसेदन्यान् परिच्छदान् ॥

प्रक्षालनं च कृत्वा तु स्थापयेत् तान् यथार्हकम् ।

नि. ९

य. १०.१४

[अत्र चामरादिपरिच्छदं सोमपश्चिमपार्श्वे न्यसेदित्येव निर्दिश्यते इति विशेषः ।]

३.१०.४७ —— —— वाद्यस्थापन- ——

खि. ७.११०,१

शचीशेशानयोर्मध्ये भास्करस्योत्तरेऽपि च ।
दुन्दुभीनपि संन्यसेत् शङ्खादीन् वाद्यसाधनान् ॥

एवमाद्यावृतौ कुर्यात् द्रव्यन्यासार्थमालयान् ।

नि. ९

३.१०.४८ —— —— प्लोताद्यर्चनाद्रव्यसंचयस्थान-

वि.१२.५७

प्रथमावरणे द्वितीये वैन्द्रेशानयोरन्तरे - - - प्लोतवस्त्रोत्तरीयगन्धताम्बूलाद्यर्चनाद्रव्यसंचयस्थानम्★

३.१०.४९ —— —— —— पूजनीयदेवता

वि. १२.५८

प्लोतवस्त्रोत्तरीयादिद्रव्यसंचयस्थानपार्श्वे त्वष्टारम् ☆ - - - - -

३.१०.५० —— —— विप्रभोजन - स्थान-

खि.७.११९,२०

विप्राणां भोजनस्थानमाग्नेय्यां पश्चिमे भवेत् ॥

ऐशान्यां वा प्रकुर्वीत भोजनस्थानमुत्तमम् ।

नि. ९

३.१०.५१ —— —— नैमित्तिककर्म- ——

खि. ७.११९

★ कारयेदित्यग्रिमेणान्वयः ।

☆ अर्चयेदित्यग्रिमेणान्वयः ।

कर्म नैमित्तिकं कुर्यादाग्नेय्यां तु विशेषतः ।

३.१०.५२ ——— ——— धान्यागार- ———

खि. ७.१२१

❁तस्य पश्चिमभागे तु धान्यागारं प्रकल्पयेत् ।

नि. ९

तृतीयावरणे चैव यमाग्न्योर्मध्यमे तथा ॥

धान्यानां संचयस्थानं तोयेशानिलयोस्तु वा ।

प्र. ७.५

इन्द्रग्न्योर्मध्यमे चैव धान्यस्थानं प्रशस्यते ॥

३.१०.५३ ——— ——— गोष्ठागार- ———

खि. ७.१२०

यमाग्न्योरन्तरे कुर्याद्गोष्ठागारं प्रयत्नतः ॥

नि. ९

*तस्यैव याम्यभागे तु गोष्ठागारं विधीयते ॥

३.१०.५४ ——— ——— कूप- ———

स. ९.३९

द्वितीयावरणे वाथ तृतीयावरणे तथा ।
चतुर्थे वाप्यथैशान्ये कूपं प्राकारपार्श्वतः ॥

❁ गोष्ठागारस्य ।
* धान्यागारस्यैव ।

खि. ७.११५

[अत्र कूपं कुर्यात् तथैशान्ये किञ्चित्सौम्यसमाश्रिते इत्येव निर्दिश्यते इति विशेषः ।]

३.१०.५५ ——— ——— आस्थानमण्डप- ———-

वि. ११. ५१,५

मुखोय: (प्रमुखे?) दक्षिणे पश्चिमे उत्तरे वा विस्तीर्णे देशे तत्तद्दिशि बाह्यप्राकारसममायामं तत्समं त्रिपादमर्धं वा विस्तारमङ्कणं कृत्वा तस्मिन्नास्थानमण्डपं कारयेत् । - - - - ☆तत्तीरे मनोरमे वा आस्थानमण्डपं कुर्यादिति केचित् । -

★आग्नेयादिकोणेषु तथैवास्थानमण्डपं कारयेत् ।

क्रि. ४.८६,८,९

तृतीयांशे तृतीये तु कुर्यादास्थानमण्डपम् ।

- - - - - - - - - - - - - - - - - - -।

आस्थानमण्डपं चैव- - - - - - - - - -॥

दक्षिणामुखमैशान्ये सौम्ये वापि प्रकल्पयेत् ।

३.१०.५६ ——— ——— ——— वहिराभिमुख्य-

वि. १२.५६

- - - - -आस्थानमण्डपं - - - - - बहिर्मुखं - - - - - -आरभेत ।

☆ तटाकतीरे ।

★ सभामण्डपस्येत्यध्याह्रियते ।

३.१०.५७ —— —— —— पूजनीयदेवता-

क्रि. ५.५७

- - - - - शक्रमास्थानमण्डपे※।

३.१०.५८ —— —— तटाक - स्थान-

वि. ११.५१

आलयाभिमुखे वोत्तरे वा बहूदकं विस्तीर्णं तटाकं कृत्वा तत्परितः शिलया इष्टकया वा तीरं कारयेत्।

स. ९.४०

प्रमुखे बाह्यतः पार्श्वे तटाकमपि कारयेत्।

क्रि. ४. ८६,७

चतुर्थावरणे वाथ पञ्चमावरणेऽथवा ॥

द्वितीयांशे तटाकं च मण्डपं च तदुत्तरे।

खि. ७.१२२

सौम्यादीशानपर्यन्तं तटाकं परिकल्पयेत्।

नि. ९

३.१०.५९ —— —— जलक्रीडार्थमण्डप-पूजनीयदेवता-

क्रि. ५.५८

वरुणं★ यादसां नाथं जलक्रीडार्थमण्डपे।

※ पूजयेदिति पूर्वेणान्वयः।
★ पूजयेदिति पूर्वेणान्वयः।

३.१०.६० ——— ——— तीर्थमण्डप-स्थान-

वि. ११.५१

तटाकस्य पश्चिमे तीरे तीर्थस्थानं प्राङ्मुखं त्रिपञ्चसप्तनवैकादशहस्तैः समाश्रमायताश्रं वा युग्मयुग्माङ्घ्रिभित्तिकं मण्डपं कूटं प्रपां वा कुर्यात् । तद्बाह्ये प्राकारं कारयेदिति केचित् ।

३.१०.६१ ——— ——— आराम- ———-

नि. ९

याम्यादिसौम्यपर्यन्तमारामं पञ्चमे तथा ।

क्रि. ४.८७

[अत्र तटाकं परितः पुष्पवृक्षान् कल्पयेदित्युच्यते इति विशेषः ।]

खि. ७.१२१.

[अत्र तृतीयावरणे याम्यादिसौम्यपर्यन्तमारामं परितश्चरेत् इति निर्दिश्यते इति विशेषः ।]

३.१०.६२ ——— ——— शालाकल्पन-

क्रि. ४.९२

कुर्याच्छालां त्रिवर्गाढ्यां ऋजुभित्तिमथापि वा ।
विमानोत्सेधतुल्यां वा त्रिपादं वोदयं मतम् ॥

३.१०.६३ ——— ——— चतुर्थ - स्थान-

नि. ९

यमपावकयोश्चैव चतुर्थाश्च* विशेषतः ।

---

*शूद्राः

११. गोपुरकल्पनम्

३.११.१ आलयनिर्माण - गोपुरकल्पन - गोपुरादि - स्थान-

वि. ११. ५१,२

तेषां[*] प्रमुखद्वारं गोपुरं कृत्वाऽधस्ताद्वारिमार्गं प्राच्यामुदीच्यां वा दक्षिणोत्तरपश्चिमेषु क्षुद्रद्वारं च युक्तितः कारयेत् । एतेषां बहिरावरणपृष्ठेऽप्येवं द्वारं गोपुरं वा कुर्यात् । प्रथमावरणं विनान्येषां कारयेदित्येके ।

स. ९.३६

[अत्र प्रमुखे चापरे वापि गोपुरं परिकल्पयेदित्येव निर्दिश्यते इति विशेषः ।]

३.११.२ ——— ——— गोपुर-मान-

नि. ११ & १२

- - - - - - - - - -गोपुरं वक्ष्यतेऽधुना ॥

- - - - - - - - - - - - - - - - -॥

प्राकाराद्वाथ हस्ताद्वा तद्विस्तारं विधीयते ।
प्रासादतारपञ्चाशविभागं वा त्रियंशके ॥

द्वियंशं वा चतुर्भागे त्रिभागं वाथ विस्तृतम् ।
पञ्चभागं चतुर्भागमल्पविस्तारमुच्यते ॥

प्रासादतारवेदांशे मध्यमांशमथापि वा ।
भूतांशे वर्णमेवं स्यात् रसे पञ्चाङ्गमेव च ॥

---

[*] प्राकाराणाम् ।

अर्णवे रसभागं वा वस्वंशे त्वद्रिरेव वा ।
व्यन्तरे गोपुरन्यासं प्रासादवशतस्ततः ॥

सप्तषड्वसप्तांश(?) भवांशाष्टांशमेव च ।
अवस्थान ध्रु(?) रुद्रांशं दशांशं क्रमशः सुधीः ॥

महतो गोपुरव्यासं द्विद्विहस्तं तु वर्धयेत् ।
नन्दादिसप्तदश्यन्तं वर्धयेद्गोलकं क्रमात् ॥

महतो गोपुरव्यासं कल्पयेत् तद्विचक्षणः ।
तारादण्डं समारभ्य यावत् तत्त्रिगुणं क्रमात् ॥

चतुर्भागैकभागेन वर्धयेदायतं बुधः ।
मध्यमाश्रयभूतोच्चमामार्धं (?) तदिष्यते ।
गोपुरस्ताप्त(?) विस्तारं एभूतासंक्रमाद्बुधः ॥

निभमैकद्वयोरुश्च(?) प्राकाराद्बाह्यनिर्गमः ।
अथवा प्राकारतुल्यं स्यादमुख्यस्यानुकूलतः ॥

द्वारकर्मणि सर्वत्र भेड्याधिष्ठानमुच्यते ॥

तत्प्रासादमसूरोच्चमर्मादिवनसुन्दराः ।
अवतारभवादित्यभेदेष्वेकक्षयं तु वा ॥

गोपुरस्य मसूराश्च नायुधं परिकीर्तिता ।
खननादिक्रियायोगं पूर्वत् परिकल्पयेत् ॥

सीमान्ता तत्र विस्तारं प्राकारं चैव हस्तकम् ।
हस्तत्रयमथारभ्य चैकहस्तविवर्धनात् ॥

ग्रहहस्तावसानः स्यात् सालकुड्योन्नतं विदुः ।
अथवा गोपुरस्योच्चं पूर्ववच्छान्तिकादिना ॥

प्रथमद्वारमारभ्य बहिर्द्वारावसानकम् ।
गोपुराद्गोपुरं तत्र द्विगुणं मध्यमेव वा ॥

कुर्यात् पादाधिकं वापि सर्वालंकारसंयुतम् ।
प्रासादाभिमुखे चैव प्राकारेषु च पञ्चसु ॥

गोपुरं तत्र तत्रैव कारयेत यथाक्रमम् ।
प्रमुखे गोपुराः सर्वे प्रासादमुखपद्मतः ॥

गोपुराणि चतुर्दिक्षु सालेषु च यथाक्रमम् ।
पूर्वपश्चिमयोर्वापि कल्पयेत यथाक्रमम् ॥

अन्येषां च मुखाः सर्वे दुकूलस्पन्ददर्शनम् ।
पर्वताग्रे यथा पार्श्वे नदीपार्श्वे तथैव च ॥

तटाकार्णवयोस्तीरे प्राकारस्य विशेषतः ।
अलिश्चेत्(?) स्थानविस्तीर्णे हीने यत्र विशेषतः ॥

संगृह्य लब्धविस्तीर्णे तत्र तत्र यथाविधि ।
प्राकारं परितः कुर्यात् परिवारसमायुतम् ॥

३.११.३ ——— ——— ——— वहिराभिमुख्य-

वि. १२.५६

- - - - - - - -गोपुरं च- - - - - - - बहिर्मुखं - - - - - -आरभेत ।

३.११.४ ——— ——— ——— पञ्चविध-द्वारशोभादिभेदेन-

य. १०. १,२

अत ऊर्ध्वं प्रवक्ष्यामि गोपुराणां तु लक्षणम् ।
प्रथमं द्वारशोभा च द्वारशाला द्वितीयकम् ॥

तृतीयं द्वारप्रासादं द्वारहर्म्यं चतुर्थकम् ।
द्वारगोपुरमित्यन्तं पञ्चधा स्यात् क्रमेण वै ॥

वि. ११.५२

३.११.५ —— —— —— द्वारशोभादि-मान-

वि. ११.५२-४

तेषां* क्रमेण विस्तारो वक्ष्यते-मूलप्रासादविशालं द्वित्रिचतुष्पञ्चषडंशं कृत्वा एकांशोनं द्वारशोभादीनामाभासानां विशालं स्यात् । सप्ताष्टनवदशैकादशभागं कृत्वा एकांशोनं विकल्पानां चतुष्पञ्चषट्सप्ताष्टांशं कृत्वा एकांशं व्यपोह्य शेषांशैर्मध्यमानां त्रिभागैकमर्धं त्रिभागं द्विभागं चतुष्पञ्चांशयोरेकोनमिति द्वारशोभादीनामुत्तमानां विशालं स्यात् । अथवा हस्तमानेन द्विहस्तादि-द्व्यष्टहस्तान्तमेकहस्तविवृद्ध्या द्वारशोभादीनामेकैकं त्रित्रिभेदे (क्षुद्रां) त्रिःपञ्चभेदं त्रिहस्ताद्येकत्रिंशत्करान्तं द्विद्विहस्तविवृद्ध्या द्वारशोभादीनामल्पानां विस्तारं त्रिःपञ्चभेदं स्यात् नवहस्तादिसप्तत्रिंशत्करान्तं द्विद्विहस्तविवृद्ध्या मध्यमानां विशालं त्रिःपञ्चभेदं स्यात् । अथोत्तमानां विशालं पञ्चहस्तादित्रयोदशहस्तान्तं द्विद्विहस्तविवृद्ध्या द्वारशोभाविशालं पञ्चविधं भवति।

पञ्चदशहस्तादित्रयोविंशतिहस्तान्तं द्विद्विहस्तविवृद्धया द्वारशालाविशालं स्यात् पञ्चविंशतिहस्तादित्रयस्त्रिंशद्धस्तान्तं द्वारप्रासादविशालं पञ्चत्रिंशत्करादि त्रिचत्वारिंशद्धस्तान्तं द्वारहर्म्यविशालं नवपञ्चकरादित्रिपञ्चाशत्करान्तं द्वारगोपुरव्यासमित्येवं पञ्चानां व्यासं पञ्चविंशतिभेदं विधीयते । तेषामुदितं विशालस्य पादार्धं त्रिभागाद्द्विभागं पादोनद्विगुणं द्विगुणं वायामं पञ्चविधं स्यात्। उत्सेधविन्यास-

---

* द्वारशोभादिगोपुराणाम् ।

गण्यालंकारादीनि सर्वाणि मूलप्रासादस्योक्तमार्गेणैकतलाद्यर्कतलान्तं समूह्यैव गोपुराणि कारयेत् ।

अधिष्ठानं पादबन्धमेव द्वारविस्तारं सार्धहस्तं त्रिपादहस्तं द्विहस्तं सार्धद्विहस्तं पादोनत्रिहस्तं त्रिहस्तमिति सप्तधा भवति तत्तद्द्विगुणमुत्सेधं स्यात् ।

अथवा मूलभूमेरधिष्ठानाङ्घ्रितुङ्गद्वारतुङ्गतदर्धविस्तारम् अथवा द्विहस्तविस्तारात् त्र्यङ्गुलाद्येकविंशत्यङ्गुलान्तं द्व्यङ्गुलविवृद्ध्या द्वारविस्तारं दशधा भवति । गोपुराणां निर्गमं विस्तारार्धं त्रिभागैकं पञ्चभागाद्द्विभागं प्राकारभित्तिबाह्यतः कुर्यात् । अन्यत् सर्वं मूलप्रासादस्योक्तविधिना कारयेत् ।

य. १०.३-६
त्रिभूतमुनिनन्दं च रुद्रहस्तादिकं क्रमात् ।
त्रिभागीकृत्य विस्तारं तस्मिन् न्यूनाधिकं ततम् ॥

तथा द्वित्रिचतुर्हस्ताद्येकहस्तेन वर्धनात् ।
तथा षोडशहस्तान्तं नवधा हस्तमानकम् ॥

सार्धहस्तं तत्त्रिपादं द्विहस्तार्धं तथा क्रमात् ।
पादोनत्रिकरान्तं च त्रिहस्तं निर्गमं क्रमात् ॥

विस्तारार्धं त्रिभागैकं पञ्चभागं द्विभागकम् ।
नीत्वा तद्भित्तिबाह्ये तु शिष्टं वासाधिकारवत् ॥

३.११.६ —— —— प्रथमावरणगोपुर-उच्छ्राय-

खि. ७.४७
प्रासादपादहीनस्तु गोपुरोच्छ्राय उच्यते ॥

स. ९.२१

३.११.७ ——— ——— प्रथमावरणगोपुरकल्पन-

खि. ७.५-२७

युष्माभिश्चोदितं सर्वं प्रवक्ष्याम्यनुपूर्वशः ।
आलयं मण्डपं चैव प्राकारं गोपुरं तथा ॥

यावत्प्रमाणमुत्सेधः तावद्भूमौ तु खानयेत् ।
शोधयित्वा तु विधिना समीकृत्य विचक्षणः ॥

तदर्धं वालुकैः पूर्य जलेन सहितं शनैः ।
तदर्धं वापि कुर्वीत यथाविभवमादरात् ॥

उत्सेधात् तु चतुर्भागं भित्तिमूलघनं विदुः ।
उत्सेधाध्यर्धमुद्दिष्टा भूमेर्भित्तिरुदाहृता ॥

भूमेरुर्ध्वं चतुर्भित्तिरेकहस्तप्रमाणतः ।
द्विहस्तं वा त्रिहस्तं वा भित्तिं सम्यक् समाचरेत् ॥

तस्योपरि विधानेन उपानादि क्रमात् चरेत् ।
मानाधिकारे यत् प्रोक्तमलंकारं च सर्वशः ॥

तेन मार्गेण कर्तव्यं समाप्तेष्टकया सह ।
विपरीतं न कुर्वीत यदि कुर्यान्न सिध्यति ॥

प्रासादस्य तु विष्कम्भं चतुर्भागं विभज्य च ।
एकमाद्यस्य विस्तारः दक्षिणे पश्चिमेऽपि च ॥

उत्तरे च तथा कुर्यादुपानसममुच्यते ।
उपानस्यैव विस्तारं चतुर्भागं विभज्य च ॥

एकभागं व्यपोह्यैव त्रिभागं चोत्तमं भवेत् ।
मध्यमं तु द्विभागं स्यादधमं चैकभागकम् ॥

उत्सेधात् तु चतुर्भागमथवा चाष्टभागकम् ।
एवं स्थलं प्रकुर्वीत दक्षिणे पश्चिमेऽपि वा ॥

उत्तरे चाथवा कुर्यात् पादं पङ्क्तिं च कारयेत् ।
पादं युक्त्या प्रकुर्वीत भित्तिपादेन संयुतम् ॥

उत्तमा शैलजा भित्तिर्मध्यमा त्विष्टकामयी ।
मृण्मयी त्वधमा प्रोक्ता इति शास्त्रस्य निश्चयः ॥

उत्तमं शैलजं प्रोक्तं मध्यमं दारुसारजम् ।
अधमं च मृदा कुर्यात् तृणजन्यैरथापि वा ॥

पादास्ते चतुरश्राः स्युः सर्वे वृत्ताः अथापि वा ।
त्रिहस्तं नाहमुद्दिष्टं द्विहस्तं वापि कारयेत् ॥

एवं कर्तुमशक्तश्चेदेकहस्तमथापि वा ।
एवं नाहं प्रकुर्वीत युक्त्या बोधिकया युतम् ॥

हस्तद्वयं तथायामं बोधिकानां विधीयते ।
अध्यर्धं वापि कुर्वीत एकहस्तमथापि वा ॥

तालद्वयं तु विस्तारमध्यर्धं वापि कारयेत् ।
तालं वापि च कुर्वीत विस्तारस्य समं घनम् ॥

शेषं युक्त्या प्रकुर्वीत बोधिकानां विशेषतः ।
बोधिकानां समं कुर्याद्विस्तारं चोत्तरासु च ॥

तन्मानं च समं प्रोक्तं पादहीनमथापि वा ।
उत्तरे परिपार्श्वे तु अनुमार्गं च कारयेत् ॥

विस्तरं च घनं चैव भागमात्रं प्रचक्षते ।
तस्योपरि तुलाधारबोधिकाः परिकल्पयेत् ॥

तुलां पश्चात् प्रकुर्वीत तालमात्रप्रमाणतः ।
यथालाभघनं कुर्याद्यथावित्तानुसारतः ॥

एवमेव प्रकुर्वीत शेषं युक्त्या समाचरेत् ।
एवं दक्षिणतः कुर्यात् पश्चिमे चोत्तरेऽपि च ।

३.११.८ —— —— द्वितीयावरणगोपुरकल्पन-

खि. ७.५३-८

गोपुरं तु द्वितीये तु प्रासादसममुन्नतम् ॥

त्रिपादं वापि कुर्वीत तदर्धं वापि कारयेत् ।
मानाधिकारोक्तपथा गोपुरं सम्यगाचरेत् ॥

द्वितीयावरणे कुर्यात् कपोतं वापि कारयेत् ॥

गोपुरं- - - - - -गृहान् सर्वान् विधानतः ।

स. ९.३५
द्वितीयं गोपुरं तुल्यमधिकं वा विशेषतः ।

३.११.९ —— —— तृतीयावरणगोपुरकल्पन-

खि. ७.११८
गोपुराद्गोपुरं कुर्यादध्यर्धं द्विगुणाधिकम् ।
पादाधिकं वा कुर्वीत सर्वालंकारसंयुतम् ॥

विमानेन तुल्यं विमानादधिकं वा इति यावत् ।

१२. मूर्धेष्टकान्यासः

३.१२.१ आलयनिर्माण - मूर्धेष्टकान्यास - काल-

खि. ९. १-६

अत ऊर्ध्वं प्रवक्ष्यामि समाप्ते त्विष्टकाविधिम् ।
अयने चोत्तरे कुर्याद्दक्षिणे वा त्वरान्वितः ॥

मार्गशीर्षमाघौ द्वौ निन्दितौ ब्रह्मणा पुरा ।
शेषेष्वपि च कर्तव्यं त्वरितेनेति मे मतिः ॥

त्रिषूत्तरेषु रोहिण्यां हस्ते स्वात्यां पुनर्वसौ ।
श्रवणे चैव रेवत्यामप्ये वा वसुदैवते ॥

यजमानानुकूलेषु दिनेष्वेतेषु शस्यते ।
युग्माश्च तिथयः सर्वाः प्रशस्ता विष्टिवर्जिताः ॥

गुरुशुक्रबुधेन्दूनां वाराः शस्ताः भवन्ति हि ।
चरराशिं विवर्ज्यैव स्थिरराशिं च संग्रहेत् ॥

ग्रामस्य यजमानस्य चानुकूले दिने चरेत् ।

स. १०.४५

[अत्र शुभे मुहूर्ते पूर्वाह्ने कुर्यात्तत्र समाप्तिकाम् इत्येव निर्दिश्यते इति विशेषः ।]

अ. ७

[अत्र माघमासस्थाने आषाढमासः पैतृकमासश्च निषिध्यते इति विशेषः ।]

वि. १३.६३

[अत्र पूर्वपक्षे कर्तुरनुकूलर्क्षे शुभे मुहूर्ते समाप्तिकां कुर्यादित्येव निर्दिश्यते इति विशेषः ।]

३.१२.२ ——— ——— अङ्कुरार्पण - काल-

खि. ९. ६,७

तस्मात्★ तु दिवसात् पूर्वं नवमे वाथ सप्तमे ॥
पञ्चमेऽहनि वा कुर्यात् विधिना चाङ्कुरार्पणम् ।

अ. ७

[अत्र तस्मात् तु दिवसात् पूवम् अङ्कुरार्पणं कुर्यादित्येव निर्दिश्यते इति विशेषः ।]

३.१२.३ ——— ——— मूर्धेष्टकाद्रव्य-

वि. १३.६३

एकद्रव्यकृतविमाने तद्द्रव्येण मूर्धेष्टकां विन्यसेत् । अन्ययोर्यद्द्रव्यकृतमुपरिस्थलं तेनैव मूर्धविन्यासं कारयेत् । इष्टकोपरि पादुकात् पट्टिकान्तं शिलयैव कृतं चेन्न दोषाय भवेत् ।

३.१२.४ ——— ——— मूर्धेष्टकान्यासप्रकार-

वि. १३.६४,५

तदालयपादविस्ताराद्द्विगुणायामां तदर्धविस्तारां तदर्धबाहल्यामेव इष्टकां शिलां वा कृत्वा- - - - - -आद्येष्टकावदन्त्येष्टकानामधिवासहोमाद्यं सर्वं स्थूपिकीलसहितं कृत्वा कीले विष्णुं तदाधारे महीं प्रागादिष्विष्टकासु पुरुषाद्या

★ मूर्धेष्टकान्यासोक्तात् ।

मूर्तीः तद्बाह्ये प्रागाद्युत्तरान्तं न्यक्षं विवस्वन्तं मित्रं क्षत्तारं चाभ्यर्च्य शयने शाययेत् । प्रतिसरमाबद्ध्योत्तराच्छादनं कृत्वा आहवनीयादिषु पूर्ववद्धोमं हुत्वा रात्रिशेषं व्यपोह्य प्रभाते स्नात्वा आलयमाविश्य प्रदक्षिणं कुर्यात्। यजमान आचार्यादीन् नववस्त्रोत्तरीयाद्यैरलंकृत्य दक्षिणां दद्यात् । स्थापकाः शिलां वाथेष्टकां वा कीलसहितं समादाय ग्राममालयं वा प्रदक्षिणं कृत्वा ताश्चासंकरं विमानं समारोप्य शिल्पिना सार्धं सूत्रं प्रसार्य शिला वाथेष्टका वा तन्मध्ये छिद्रे पूर्ववत् प्रागग्रं तच्छिद्रे तन्मूलं तद्दक्षिणे छिद्रे दक्षिणे मूलं पश्चिमे छिद्रे (अग्रं) पश्चिमे मूलम् उत्तरे छिद्रे उत्तराग्रमेवं छिद्रं पूर्ववच्चतुर्वेदादिमन्त्रैरूर्ध्वाननं संन्यस्य सुधामालिप्य[*]

स. १०.४४-५६

अथ मूर्धेष्टकान्यासविधिं वक्ष्ये समासतः ॥

कल्पिते च विमाने तु पूर्वोक्तेन विधानतः ।
शुभे मुहूर्ते पूर्वाह्णे कुर्यात् तत्र समाप्तिकाम् ॥

शिलाः पञ्चेष्टका वाथ निर्व्रणाश्च घनाः शुभाः ।
यथावत् ताः प्रगृह्यैव स्थूपीशूलसमन्विताः ॥

प्रथमेष्टकावदायामा यथोक्तं तत्क्रमेण वै ।
अधिवासं च होमं च तथैवाभ्यर्चनादिकम् ॥

अत्रापि संप्रकुर्वीत यथावद्विधिकोविदः ।
न्यक्षं पूर्वे समभ्यर्च्य धान्यपीठे यथाक्रमम् ॥

दक्षिणे भरतं चैव मित्रं वै पश्चिमेऽर्चयेत् ।
विमानपालं क्षत्तारमुत्तरे त्वर्चयेत् क्रमात् ॥

ततः प्रभाते त्वाचार्यो यजमानसमन्वितः ।
स्नात्वा शुद्धाम्बरधरो यथाशक्ति स्वलंकृतः ॥

---

[*] विन्यसेदित्युत्तरणान्वयः ।

शिला वाथेष्टकास्तद्वत् कारयित्वा प्रदक्षिणम् ।
स्थापयेत् पूर्वभागे तु दक्षिणे पश्चिमे तथा ॥

उत्तरे च प्रतिष्ठाप्य लम्बयेत् सूत्रमत्र वै ।
गर्भागारस्य मध्ये तु स्थूपीमध्यं तथा भवेत् ॥

मूर्धेष्टकाः शिलास्तद्वत् संन्यसेदूर्ध्वतोमुखाः ।
तथैव नवरत्नानि प्रक्षिपेदुपरि क्रमात् ॥

यथाशक्ति समृद्ध्यर्थं सुवर्णं तत्र निक्षिपेत् ।
सुधयाच्छादयित्वा तु स्थापयेत् स्थूपिशूलकम् ॥

सूक्तमात्मादिकं जप्त्वा प्रोक्षणैः प्रोक्षयेत् त्रिभिः ।
सुधाकर्माद्यलंकारं तद्विमानोदितं क्रमात् ॥

कारयेदुक्तमार्गेण शिल्पिभिः परिवारवत् ।

ज्ञा. ३२.६१

आद्येष्टकाविधानेन हुत्वा न्यक्षं दधित्यकं पीवरमार्यकमिति प्राच्यां याम्ये विवस्वन्तं भरतं विश्वकर्माणं मरीचिमन्तमिति पश्चिमे मित्रं ह्रित्वरं राजिष्मन्तं रमणकमिति उत्तरे क्षत्तारं महीधरमुर्वरोहं शेवधिमित्यभ्यर्च्य पृथक् पृथक् हुत्वा प्रभाते स्नात्वा शिल्पिनं संपूज्य आचार्यमभिवन्द्य स्रग्वस्त्राभरणादिभिरलंकृत्य अभ्यर्च्यारभेत । समाः श्लक्ष्णाः दोषविवर्जिताः पञ्चेष्टकाः समाहृत्य प्रोक्षणैः प्रोक्ष्य धान्योपर्यहताम्बरे संस्थाप्य अभ्यर्च्य वज्रेन्द्रनीलमरकतवैडूर्यपद्मरागान् सुवर्णबद्धान् सुवर्णशकलानि वा 'इन्द्रं प्रणवन्तं' 'यमो दाधार' 'ये ते शतं' 'मिश्रवाससः' 'ब्रह्म जज्ञान' मिति प्रागादिमध्यान्तं पञ्च रत्नान्याक्षिप्य श्रीसूक्तेनेष्टकाः संविमृश्य स्थिरराश्युदये शुभग्रहेक्षिते लग्ने ध्रुवसूक्तेन देवमनुस्मृत्य प्रागग्रं पञ्चेष्टकाः सुदृढं संस्थाप्य सर्वरत्नमयं नागरूपमुपर्युपर्यर्पयित्वा सुधया परिलिप्य[*]

---

[*] विन्यसेदित्युत्तरेणान्वयः ।

अ.७

यथारुचि यथाशोभं पूर्वोक्तेन प्रमाणतः ॥

एतेषामपि शूलानि तथाहृत्य विचक्षणः ।
स्थूपिदण्डेन सर्वाणि सहैवाप्स्वधिवासयेत् ॥

यागशालां ततः कृत्वा अग्निकुण्डानि कारयेत् ।
मध्ये शयनवेदिं च स्थूपिशूलानि चेष्टकाम् ।
अन्येषां बेरशूलानां नैर्ऋत्यां शयनं भवेत् ॥

आघारं विधिवत् कृत्वा पूर्वोक्तं होममाचरेत् ।
पूर्वोक्तेन विधानेन शयनानि प्रकल्पयेत् ।
धान्यराशिं च पूर्वोक्तं दर्भानुपरि संस्तरेत् ॥

वस्त्रैराच्छाद्य यत्नेन पुष्पाण्युपरि विन्यसेत् ।
सर्ववाद्यसमायुक्तं सर्वालंकारसंयुतम् ॥

इष्टकादीनि संगृह्य शिरसा धृत्य यत्नतः ।
प्रदक्षिणं ततः कृत्वा ग्रामे वा मन्दिरेऽपि वा ॥

यागशालां प्रविश्यैव कलशैरभिषेचयेत् ।
संन्यस्य शयने सर्वान् कौतुकं बन्धयेत् तथा ॥

प्रत्येकं नववस्त्रेण वेष्टयित्वा विचक्षणः ।
आद्येष्टकाविधानेन होमं कृत्वा सलक्षणम् ॥

अथाधिवास्य शूलानि दिशामूर्तेर्यथाक्रमम् ।
पश्चादभ्यन्तरं गत्वा देवेशमभिवन्द्य च ॥

औत्सवं बेरमादाय सर्वालङ्कारसंयुतम् ।
तदभावे च स्नपनं तदभावे च कौतुकम् ॥

आदाय यागशालायां संस्थाप्यैवं विचक्षणः ।
स्नपनं सप्तकलशैः अभिषिच्य हरिं तथा ॥

वायव्यां शयनं कल्प्य तस्मिन् देवं सुसंन्यसेत् ।
समभ्यर्च्य यथान्यायं कौतुकं बन्धयेत् ततः ॥

शयने शाययेद्देवमलंकारैश्च राजवत् ।
संन्यस्यैव च रत्नानि हरेः पार्श्वे निधाय च ॥

नृत्तगेयैश्च वाद्यैश्च तथा चाध्ययनादिभिः ।
निशाशेषं व्यपोह्यैव प्रभाते च पुनर्गुरुः ॥

स्नात्वा स्नानविधानेन देवालयमुपाव्रजेत् ।
प्रदक्षिणं ततः कृत्वा शयनं संप्रवेश्य च ॥

शयनादुद्धरेद्देवं यजमानः सह भवेत् ।
निर्माल्यं संव्यपोह्यैव अर्चयित्वा विधानतः ॥

मुहर्ते समनुप्राप्ते स्थिरराशौ सुसंहरेत् ।
चरलग्नं विवर्ज्यैव दैवज्ञं संप्रपूजयेत् ॥

कर्ता तत्र गुरुं पूज्य वस्त्रं चैवोत्तरीयकम् ।
सुवर्णपुष्पाङ्गुलीयैर्गन्धमाल्यैरलंकृतम् ॥

पादौ प्रक्षाल्य चाचम्य देवेशं मनसा स्मरन् ।
तत्काले शिल्पिनं पूज्य वस्त्राभरणकुण्डलैः ॥

उष्णीषाद्यैश्च गन्धैश्च पुष्पैरन्यैश्च संयुतम् ।
शयनस्योद्धृतं देवं घोषयेत् पटहादिभिः ॥

इष्टकां च समुद्धृत्य रत्नादींश्च समुद्धरेत् ।
स्थूपिदण्डं समुद्धृत्य देवेशस्याग्रतो भवेत् ॥

छत्रपिञ्छवितानाद्यैः चामरैरुपवीजयेत् ।
धूपदीपसमायुक्तं नृत्तगेयसमायुतम् ॥

तोयधारासमायुक्तं प्रादक्षिण्यक्रमेण ह ।
मूलालयस्य पश्चिमतो देवेशस्य स्थितिर्भवेत् ॥

आचार्यः कर्तृणा(?) चैव दैवज्ञं शिल्पिना सह ।
भक्तैरन्यैः समाचारैर्विमानस्योद्धृतं भवेत् ॥

इष्टकास्थूपिकादण्डं रत्नादींश्च समुद्धरेत् ।
चतुर्वेदादिमन्त्रैश्च चत्वारश्चेष्टका न्यसेत् ॥

आवर्ताकृतिकं कुर्यात् सुधया च सुबन्धयेत् ।
धातुवीजं सरत्नं च पूर्वोक्तं मन्त्रमुच्चरन् ॥

स्थूपिदण्डं स्थितं कुर्यात् शिल्पिना सुदृढं भवेत् ।
शूलानि च दिशामूर्त्यै संस्थाप्यैव तथैव च ॥

शूलस्थापनवत्सर्वमाचरेत्स्थापनान्तरे ।
इन्द्रादीन् गरुडादींश्च तत्तन्मन्त्रेण मन्त्रवित् ॥

संस्थाप्यैव सुधाद्यानि कारयेच्छिल्पिना तथा ।
घोषयित्वा विधानेन सर्ववाद्यसमायुतम् ॥

कारयित्वा च कृत्वा तु आचार्यः शिल्पिना सह ।
अवरोहणं च कृत्वा तु देवेशमभिवन्द्य च ॥

प्रदक्षिणं ततः कृत्वा बालागारं च राजवत् ।
आस्थाने तत्र संस्थाप्य कौतुकं संविसृज्य च ॥

शुद्धोदैरभिषिच्यैव समभ्यर्च्य यथाक्रमम् ।
महाहविर्निवेद्यैव प्रणम्यैवानुमान्य च ॥

स्वस्थाने तु सुसंन्यस्य नित्यपूजां समाचरेत् ।

क्रि. ५. ३३-८

समाप्ते तु विमाने तु पुनर्मूर्ध्नेष्टकां न्यसेत् ॥

पूर्वोक्तलक्षणोपेताः शिला वा पञ्च वेष्टकाः ।
गृहीत्वा स्थूपिशूलं च सर्वमाद्येष्टकोक्तवत् ॥

अधिवासं च होमं च स्नपनं चार्चनादिकम् ।
न्यक्षादीन् धान्यपीठे तु पूजयेत् प्रागुपक्रमात् ॥

स्थूप्याधारेष्टकायां तु पूजयेत् प्रकृतिं पराम् ।
प्रातः स्नात्वा विधानेन स्रग्वस्त्रालंकृतो गुरुः ॥

पूर्वोक्तैरेव मन्त्रैस्तु संन्यसेत् मूर्ध्नि चेष्टकाः ।
भूमिसूक्तं समुच्चार्य स्थूप्याधारेष्टकां न्यसेत् ॥

'आ त्वा हार्षेण' सूक्तेन स्थूपिशूलं पुनर्न्यसेत् ।
तत्तद्दिक्षु विमानेशान् समावाह्यार्चयेत् पुनः ॥

खि. ९. १९-३०

शिला वा इष्टका वापि नव वा पञ्च वाऽऽहरेत् ।
शोधयित्वा विशेषेण कुर्यादप्यधिवासनम् ॥

आद्येष्टकायां यः प्रोक्तस्तेनैव विधिना चरेत् ।
यागशालां तथा कृत्वा अग्निकुण्डांश्च कारयेत् ॥

आघारं विधिवत् कृत्वा पूर्वोक्तं होममाचरेत् ।
धान्यराशिं समास्तीर्य दर्भानुपरि संस्तरेत् ॥

सर्ववाद्यसमायुक्तं सर्वालंकारसंयुतम् ।
शिलेष्टकाः सुसंगृह्य शिरसोद्धृत्य यत्नतः ॥

ग्रामे वा नगरे वापि पत्तने खर्वटेऽपि वा ।
प्रदक्षिणं ततः कृत्वा यागशालां प्रवेशयेत् ॥

अधिवासं ततः कृत्वा बद्ध्वा प्रतिसरं ततः ।
प्रत्येकं चैव वस्त्रैश्च वेष्टयेद्यत्नतो गुरुः ॥

पूर्वोक्तेनैव विधिना रात्रौ होमं समाचरेत् ।
पूर्वोक्तेन विधानेन होमं कृत्वा विचक्षणः ॥

पुनः प्रभाते धर्मात्मा यजमानयुतो गुरुः ।
स्नात्वा स्नानविधानेन पश्चात् कार्यं समाचरेत् ॥

मुहूर्ते समनुप्राप्ते सर्ववाद्यैश्च घोषयेत् ।
शिलेष्टकाः संप्रगृह्य विमाने रोपयेत् तदा ॥

प्राङ्मुखोदङ्मुखो वापि पाणिभ्यां संप्रगृह्य च ।
शिलेष्टकाः ह्लादिविभुं देवेशं मनसा स्मरन् ॥

चतुर्वेदादिमन्त्रैस्तु दिक्ष्वैन्द्रादिषु संन्यसेत् ।
विष्णुसूक्तं जपित्वा तु मध्ये स्थूपिं न्यसेत् ततः ॥

काले शिल्पिनमाहूय पूजयित्वा विशेषतः ।
सुधेष्टकादिभिः सम्यक् दृढीकरणमाचरेत् ॥

प्र. ६. १-१५

अथ वक्ष्ये विशेषेण क्रमं मूर्धेष्टकाविधेः ।
प्रमुखे यागशालां च कृत्वा चैव विचक्षणः ॥

मध्ये वेदिं प्रकल्प्यैव स्थूपिकीलप्रमाणतः ।
सभ्यं प्रकल्प्यैव च प्राच्याम् आघारं विधिवद्यजेत् ॥

वेदिमध्ये न्यसेद्विद्वान् सुस्निग्धा निर्व्रणा दृढाः ।
वैष्णवं च जपित्वैव चतस्रश्चेष्टकाः क्रमात् ॥

किञ्चिदग्रं भवेन्निम्नं मूले वै किञ्चिदुन्नतम् ।
अधोभागे भवेत्पृष्ठम् ऊर्ध्वभागे मुखं भवेत् ॥

शालिपिष्टमयेनाथ लेखयेदक्षराणि तु ।
यकारं पूर्वतो लेख्य रकारं दक्षिणे न्यसेत् ॥

लकारं पश्चिमे लेख्य वकारं चोत्तरे लिखेत् ।
लोहजां दारुजां वाथ स्थूपिं तत्र न्यसेद्बुधः ॥

पादायामसमं दीर्घं विस्तारं पादसंमितम् ।
अग्रमङ्गुलिविस्तारं आनुपूर्व्यात् कृशं तथा ॥

चतुरश्रं भवेन्मूलं त्रिभागैकं समं तथा ।
वृत्तं तदूर्ध्वतः कुर्यात् चीलीपादमधो न्यसेत् ॥

विस्तारत्रिगुणायामं विस्तारसमविस्तरम् ।
तद्द्वयेन समायोज्य समं शूलं स्थितं यथा ॥

पञ्चगव्यैः समभ्युक्ष्य पुण्याहमपि वाचयेत् ।
वास्तुहोमं च हुत्वैव पर्यग्निकरणं चरेत् ॥

मूर्धेष्टकाविधानेन होमं कृत्वा विचक्षणः ।
पुनः प्रभाते धर्मात्मा यजमानयुतो गुरुः ॥

शिलादीन् संप्रगृह्यैव विमाने रोपयेत् तथा ।
पाणिभ्यां संप्रगृह्यैव प्राङ्मुखोदङ्मुखोऽपि वा ॥

चतुर्वेदादिमन्त्रैश्च शिला इन्द्रादिषु न्यसेत् ।
ध्रुवसूक्तं जपित्वा तु मध्ये स्थूपिं न्यसेत् तथा ॥

काले शिल्पिनमाहूय पूजयित्वा विशेषतः ।
शिलाद्युपरि विन्यस्य दृढीकरणमाचरेत् ॥

पादबन्धे गले चैव विमाने परितः क्रमात् ।

य. १४. ३-९

प्रथमेष्टकायां यत् प्रोक्तं तेनैव विधिना चरेत् ।
स्थूपिशूले च देवेशमाधारे च महीमपि ॥

पूजयेत् पुरुषादींश्च न्यक्षादीन् परितः क्रमात् ।
तथाधिवास्य होमादीन् कुर्यादाद्येष्टकोक्तवत् ॥

प्रभाते स्थूपिकीलं च इष्टकाश्च सुमन्त्रवित् ।
समारोप्य विमाने तु प्राङ्मुखो वाप्युदङ्मुखः ॥

शिलादीन् संप्रगृह्यैव देवेशं मनसा स्मरन् ।
चतुर्वेदादिमन्त्रैस्तु दिक्ष्वैन्द्रादिषु संन्यसेत् ॥

विष्णुसूक्तं जपित्वा तु स्थूपिकीलं सुसंन्यसेत् ।
पश्चाच्छिल्पिनमाहूय पूजयित्वा मनःप्रियम् ॥

सर्वलक्षणसंयुक्तं दृढीकरणमाचरेत् ।
अत्राप्यनुक्तं यत् सर्वं खिलोक्तविधिना बुधः ॥

समाप्य शिखरं पश्चात् सुवर्णेनानुलेपयेत् ।

* * *

शोधनानि (CORRIGENDA)

Page	Line	Read	For
5	14	°शोभितम्।	°शेभितम्।
7	18	नित्य°	निन्य
18	4	ब्राह्मणा°	व्राह्मणा°
”	5	°दीनाम्	°दीनां
”	16	°पाषाणं	°पाषणं
21	16	अङ्कोल°	ङ्कोल°
26	1	वैखा°	वखा°
”	12	तिल-	तिल
”	17	कृष्णर-	कृष्णर
”	18	वामाद्द-	वामाद्द
28	13	प्रागुत्तरान्त-	प्रागुत्तरान्त
31	9	शिबिराणि	शिबिरा:
34	3	नगरम्	नगरम
37	2	दण्डकादि-	दण्डकादि
”	14	दण्डकसंज्ञका	दण्डका
41	14	तिर्यग्र°	तियग्र°
51	10	इति।	इति
67	18	नाभि°	न भि°
69	3	कर्षण-	कर्पण-
”	5	वायव्योत्त-	वायव्योत्त
70	14	देवतारि:	देन‾ :
”	15	भवन्ति।	वन्ति।
71	4	°ष्ट्ये°	°ष्ट्यै°
71	11	गृहश्रेणीं कुर्यात्।	गृहश्रेणीं ।
74	4	स्थूण(?)मुप°	स्थूणमुप°
75	11	द्विजो नित्यं	द्वि नित्यं
78	16	पूर्वम्	पूर्वं
82	11	देवागारे	देवगारे
83	3	°पूपस-	°पूपस
84	2	श्वेत°	वेत°
86	19	°रालयं	°रलयं
90	15	भास्क°	ास्क°

Page	Line	Read	For
90	16	°य्याम्	°य्यां
91	,,	°लयं	°लय
92	1	वैखानसागम°	वैखान म°
98	13	प्र.१.	.१.
,,	–	Line 17 with भूमी for भूमिः	Line 15
,,	–	Line 15	Line 17
107	12	कुर्यात्	कुर्यात
111	11	पङ्°	पङ°
114	3	शकुनैश्च	शकुनश्च
116	2	काल-	काल
123	1	Page No.to right corner	Page No.left corner
124	5	वैश्यस्य धातकी°	वै तकी°
135	3	°द्वीजानि चा°	°द्वीजानिचा°
140	4	उच्यते।	उच्यत।
141	17	अधिकारिन्-	अधिकारिन्--
143	13	तृणैः	तृणः
147	16	सप्ताङ्गुलं	सप्ताङ्गुलम्
153	1	आलयनि°	आल नि°
158	3	°सूक्तं	°सूक्त
,,	11	°देवाना°	°दवाना°
161	20	°करण-	°करण- –
162	10	वदन्ति।	वदन्ति-
,,	11	गच्छति।	ग ति।
163	15	समारोप्य	समारेप्य
,,	19	विष्णुसूक्तम्	विष्णुसूक्तं
168	22	शैलं	—लं
,,	23	ब्राह्मादि°	ब्रह्मादि°
174	4	वपुषं	—षं
,,	7	तापसं	।पसं
175	17	सुरुण्ड	सुणुण्ड
176	4	धर्मात्मा	ध
,,	5	°विधानेन	—नेन
177	19	गुह्यम्	गुह्यं

Page	Line	Read	For
180	17	°वाद्यै°	°वाद्ये°
182	11	तस्मात् सर्व°	तस्मात्सर्व°
183	15	°पक्ष-	°पक्ष
184	10	[अत्र यज्ञाधिकारवत्]	अत्र यज्ञाधिकारवत्
’’	13	मेदिनीतिमन्त्रेण	मेदिनीति मन्त्रेण
187	20	त्र्यङ्गुला°	त्र्यङ्गुलो°
216	7	चैव	—व
217	21	तदर्धा°	तद °
219	23	°मायसं	°मापसं
221	24	मौक्तिक°	भौक्तिक°
226	21	अर्जुनं	अजुनं
238	14	°समं	°सनं
240	10	धारयेत्	—रयेत्
269	13	भवेत्	भ त्
290	2	चतुर्भागस्य	चतुभागस्य
291	19	°मिहोच्यते॥	°मि ॥
291	20	°गृहं विदुः।	°गृ :।
’’	21	समन्ततः	सम ॥
304	13	षड्वर्ग°	पड्वर्ग°
315	16	द्वितीये	दितीये
334	14	प्राच्यां	प्राच्या
341	27	वेत्रम्	वेत्रं
343	2	आद्वादश°	।द्वादश°
’’	4	नवहस्तान्तमेव	नवह न्तमे
’’	5	°देकतलं	°दे लं
’’	6	सत्रयोदशहस्त°	स दश स्त°
’’	12	पञ्च°	—ञ्च°
343	14	°तलं	°तल
346	8	भुवङ्गा°	वङ्गा°
347	11	°भागं	°भाग
351	13	°बिम्ब°	°विम्व°
363	8	बहु	—हु
370	4	कारयेत्	कारयेत

Page	Line	Read	For
375	14	षष्ट्य°	षष्टय°
377	12	मध्यमोत्तम-	मध्यमोत्तम
378	14	चतुर्वर्ग°	चर्तुवर्ग°
379	18	निर्दिश्यते	—र्दिश्यते
383	1	आलयनिर्माणप्रकरणम्	——णम्
,,	3	न्यक्षं श्रीभूतं	न्य——भू
,,	4	प्राहुरेतानधममध्यमे।	प्राहु ।
,,	12	°त्कैरधमो°	°त्कै——मो°
,,	15	सिद्धि°	सिद्वि°
386	2	हरिणीं	——रिणीं
,,	3	द्धि°	द्ध°
,,	8	उत्तमाधमकल्प-	उत्तमाधम प-
,,	10	एतैःसह	एतैः——
389	20	सप्तरोहिणी°	सप्तोहिणी°
390	10	कल्पयेत्	कल्पयेत
403	9	ब्रह्मादि°	व्रह्मादि°
431	17	बहि°	वहि°
435		Delete line 24	
438	12	तस्मिन्	तस्मिन


K.B. Babunath




R.B.Babunath



Wrapper printed at T.T.D. Press, Tirupati